ISSN– 2320–5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
संस्कृतदर्शनविभागस्य peer-reviewed शोधपत्रिका)

## त्रयोदशः अङ्कः

उपदेष्टा

स्वामी आत्मप्रियानन्दः

सम्पादकः

डॉ. राकेशदाशः

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्
वेलुडमठम्

प्रज्ञालोकः
(संस्कृतदर्शनविभागस्य वार्षिकी द्विभाषामयी विशेषज्ञसमीक्षिता शोधपत्रिका)
*Prajñāloka*
(Annual Bi-lingual **Peer-reviewed Research Journal** of the Department of Sanskrit & Philosophy)
ISSN– 2320–5911

**सम्पादकः**– डॉ. राकेशदाशः
**सम्पादकमण्डली**– डॉ. गोपीकृष्णन् रघुः, डॉ. नीरजकुमारभार्गवः, (डॉ.) स्वामी जपसिद्धानन्दः, डॉ. शन्तनुः अयाचितः, डॉ. सुखदेवभट्टः, (डॉ.) ब्रह्मचारी लोकेशचैतन्यः (शुभदीपः)

**Editor :** Dr. Rakesh Das
**Board of Editors :** Dr. Gopikrishnan Reghu, Dr. Neeraj Kumar Bhargave, (Dr.) Swami Japasiddhananda, Dr. Shantanu Ayachita, Dr. Sukhdev Bhat, (Dr.) Brahmachari Lokeshachaitanya (Shubhadip)

**प्रकाशकः**– कुलसचिवः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु, भारतवर्षे

**Publisher :** Registrar
Ramakrishna Mission Vivekananda Educational and Research Institute (RKMVERI)
Belur Math, Howrah, West Bengal, India
E-mail : prajnaloka.rkmvu@gmail.com
website : https://sanskrit.rkmvu.ac.in/prajnaloka/

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्– २०२५
Year of Publishing– 2025

मूल्यम्– ₹ १५०/–
Price– ₹ 150/–

Powered by LaTeX 2ε

Printer : Rama Art Press, 6/30, Dum Dum Road, Kolkata 30

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
|---|---|---|
| १. | Foreword<br>Swami Atmapriyananda | i |
| २. | निवेदनम्<br>सम्पादकस्य | iii |
| ३. | सन्दर्भशैली | v |
| ४. | Karma Kāṇda and Jñāna Kāṇda : Pravṛtti and Nivṛtti<br>Swami Bhajanananda | १ |
| ५. | ऋग्वेदे प्रतिफलिता परिवेशभावना<br>प्रलयः शङ्करः अधिकारी | १२ |
| ६. | वेदप्रामाण्ये विभिन्नानि आस्तिकदार्शनिकमतानि<br>हिरण्मयदत्तः | १७ |
| ७. | अग्निपुराणे अनुजीविचरितेन स्फुटः प्रतिष्ठानधर्मः<br>डॉ. अभिषेकघोषः | २५ |
| ८. | शाब्दिकनैयायिकाभिमतकरणलक्षणसमीक्षणम्<br>पीताम्बरनिराला | ३८ |
| ९. | शाब्दिकदिशा कर्मणि प्रयोगे मुख्यविशेष्यताविचारः<br>प्रलयनन्दी, डॉ. गोपीकृष्णन् रघुः | ४५ |
| १०. | द्वितीयादियोगविभागसमीक्षणम्<br>सैकतमोहान्तः | ५८ |
| ११. | तद्धितप्रत्ययविमर्शः<br>डॉ. कादम्बिनीपाढिः | ६६ |
| १२. | परवर्तिवैयाकरणैः न्यासमतखण्डनम्<br>मानसीमालः | ७२ |

| | | |
|---|---|---|
| १३. | रावणार्जुनीयमहाकाव्ये अष्टाध्यायीसूत्रक्रमानुसारं विभक्तिप्रयोगः<br>अरिजित् गुप्तः | ७८ |
| १४. | आशाधरभट्टविरचिताया मङ्गलवाक्यार्थविवेचनायाः समीक्षात्मकं सम्पादनम्<br>श्रीमन्तभद्रः, सुमन्तचौधुरी | ९१ |
| १५. | आत्मन ईक्षणपूर्वकसृष्टिविचारः<br>देवज्योतिकुण्डुः | ११२ |
| १६. | तदभावाधिकरणविमर्शः—<br>शङ्कररामानुजनिम्बार्कबलदेवमतसमीक्षणम्<br>बुद्धदेवदासः, डॉ. राकेशदाशः | ११८ |
| १७. | ईक्षत्यधिकरणस्य पूर्वपीठिका<br>ब्रह्मचारी अच्युतचैतन्यः (मनोमयः) | १२९ |
| १८. | आधुनिकसंस्कृतसाहित्ये लोकधर्मिच्छन्दसाम् समीक्षात्मकमध्ययनम्<br>भास्करगङ्गोपाध्यायः | १३३ |
| १९. | नारायणदाशकृतस्य लज्जा इति कथासङ्ग्रहस्य समीक्षात्मकमध्ययनम्<br>विकाससिंहः, डॉ.वन्दनाशर्मा | १४६ |
| २०. | कालिदासस्य कृतौ वैदिक-प्रभावः<br>दीपङ्करदत्तः | १६६ |
| २१. | श्रीश्रीरामकृष्णपरमहंसस्य अपाररामभक्तिः<br>डॉ. विष्णुपदपालः | १७५ |
| २२. | Reflections on the Tarkasaṅgraha and Modern Onto-epistemology<br>Mrittunjoy Guha Majumdar | १८७ |
| २३. | Health and Human Values<br>N. Sai Prashanthi, V. Naga Srinidhi | २०४ |
| २४. | Aṣṭāṅgayoga in the Triśikhibrāhmaṇopaniṣad<br>P Kaushik | २२० |

RAMAKRISHNA MISSION VIVEKANANDA
EDUCATIONAL AND RESEARCH INSTITUTE
(Deemed to be University)
as declared by Government of India under Section 3 of UGC Act, 1956
P.O. Belur Math, Dist. Howrah 711202, West Bengal, India
Phone : (033) 26549999, Email : mail@gm.rkmvu.ac.in, Website : www.rkmvu.ac.in

# Foreword

ॐ वाङ्मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम् । आविराविर्म एधि । वेदस्य म आणीस्थः श्रुतं मे मा प्रहासिनीरनेनाधीतनाहोरात्रान् सन्दधाम्यृतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु मामवतु वक्तारम् ।
ॐ शान्तिः शान्तिः शान्तिः ॥

Om. May my speech be established in the mind, and in turn let my mind be established in speech. O Self-effulgent Brahman (the Supreme Being) ! Reach me through and through ! May my speech and mind be capable of revealing to me the inner meaning of the Vedic mantras. Let my learning never leave me [but be a constant source of inspiration and guidance]. May I be attuned day and night to the spirit of the Holy Scriptures that I have learnt. May I be truthful in speech and in thought. May the Supreme Being (Brahman) protect me (the disciple). May Brahman protect my teacher. [I repeat,] may He protect me and protect my teacher. May He protect my teacher. Om Peace, Peace, Peace !

The present issue (13th issue) of our Research Journal *Prajñāloka* of the Department of Sanskrit Studies, which has since been rechristened as the Department of Sanskrit and Philosophy with enlarged scope of academic achievement, under the School of Indian Heritage, Ramakrishna Mission

Vivekananda Educational and Research Institute, is now being published. This journal, as mentioned in my Foreword to an earlier issue, is a reverential attempt to worship *Surabhārati* by our faculty of the Department of Sanskrit & Philosophy. Our hearty congratulations to the faculty members of the Department on this sustained effort and tenacious pursuit of this literary endeavour. May *Surabhārati Medhādevi Vāgdevi Sarasvatī* illumine our hearts by making them Her eternal abode and bless us with the awakening and blazoning of the Light of Wisdom, *Prajñāloka*, is the humble prayer of

Belur Math
4 July 2025

Swami Atmapriyananda
Pro-Chancellor & Secratary

# निवेदनम्

भगवतः अहैतुककरुणया बाणपक्षनभो तमे सामान्याब्दे प्रज्ञालोकपत्रिकायाः त्रयोदशाङ्कः प्राकाश्यमानीयते । अयमङ्कः लेखानां विंशत्या सन्दृब्धः विभाति । प्रबन्धानानाम् इमां विंशतिम् अतिरिच्य अस्य अङ्कविशेषस्य किरीटायते सभाजनीयचरणसरसिजानां रामकृष्णसङ्घस्य सहसङ्घाध्यक्षपदवीभाजां श्रीमतां भजनानन्दस्वामिचरणानां कश्चन विशिष्टः प्रबन्धः ।

समग्रपृथिव्यां मानवजीवनं यन्त्रानुगं यन्त्रप्रायं लक्ष्यहीनं प्रवर्तते साम्प्रतिके काले । अस्यां विरूपजघन्यायां दशायां शास्त्रोपदिष्टयोः प्रवृत्तिनिवृत्तिमार्गयोः कीदृशी प्रासङ्गिकता वर्तत इति स्वीयसाधनाविद्योतितविज्ञानेन अनितरसामान्यया शैल्या च प्रतिपादितवतां स्वामिनां कार्तज्ञ्यविज्ञापने सर्वथा अक्षमा वाणी इति नतिततिं केवलं वितन्मः ।

ऋग्वेदस्य विविधेषु सूक्तेषु परिवेशभावना कथमन्तर्लीना राजते इति निरूपितवान् प्रलयशङ्कराधिकारिवर्यः अभिनन्द्यते । हिरण्मयदत्तेन विरचितः “वेदप्रामाण्ये आस्तिकदर्शनानि” इति प्रबन्धे आस्तिकदर्शनेषु षट्सु वैदिकाः विचाराः एव प्राकट्यमानीताः इति प्रतिपादितम् ।

अनुजीविषु प्रभोः आचरणस्य कीदृशः निर्देशः अग्निपुराणे उपदिष्टः इति विचारितम् अभिषेकघोषेण । आधुनिके काले मानवसम्पद्व्यवस्थायां पौराणिकं ज्ञानं सुतराम् उपयोगि भवेद् इति अस्मात् प्रबन्धात् ज्ञातुं शक्यते ।

वेदान्तशास्त्रम् आदाय प्रकाशितेषु त्रिषु प्रबन्धेषु ब्रह्मसूत्रस्य अधिकरणद्वयम् आदाय त्रिभिः प्रबन्धृभिः शोभना विचाराः प्रावर्तिषत । रामकृष्णसङ्घस्य ब्रह्मचारिणा मनोमयेन ईक्षत्यधिकरणस्था विचाराः प्रकटिताः । प्रायः समनामेव विषयं प्रकारान्तरेण प्रतिपादितवान् देवज्योतिकुण्डुमहोदयः । बुद्धदेवदासः तदभावाधिकरणस्य विमर्शं उपस्थापितः बहूनां भाष्याणां प्रकाशे । समेऽपि अभिनन्दनीयाः ।

शब्दशास्त्रे अनेके निबन्धाः प्रकाशिताः । एतेषु करणलक्षणविषये शाब्दिकानां गौतमानां च मतभेदं सुष्ठु न्यरूपयत् पीताम्बरनिरालामहाभागः । कर्मणि प्रयोगे मुख्यविशेष्यता कस्य भवतीति विषयं शोभनं निर्णीतवान् प्रलयनन्दी । तत्पुरुषसमासविधायकेषु सूत्रेषु द्वितीयादियोगविभागाः केन मुखेन प्रवर्तन्त इति विस्तारेण प्रादर्शयत् सैकतमोहान्तः ।

आशाधरभट्टः कश्चिद् अल्पश्रुतः वैयाकरणः। तेन विरचिताः नैके ग्रन्थाः विविधपाण्डुलिपिभ्यः सम्पाद्य प्रकाश्य व्याकरणविज्ञानक्षेत्रे स्वीयं यशोध्वजं उड्डायितवान् श्रीमन्तभद्रः आशाधरस्य मङ्गलवाक्यार्थविषयकान् विचारान् विपश्चिच्चित्तविद्राविकया रीत्या समुपस्थाप्य श्रियं मङ्गलं चातनीद् ग्रन्थस्यास्य । तद्धितप्रत्ययस्य विषये कांश्चन रोचकान् विचारान् उपास्थापयत् कादम्बिनीमहोदया । एवं न्यासमतस्य खण्डने उत्तराः वैयाकरणाः कीदृशीं गतिं भेजिरे इति रुचिकररीत्या प्रत्यपादि मानसीनामधेयया गवेषिकया ।

आधुनिकसंस्कृतसाहित्ये अभिनवच्छन्दसां प्रयोगसन्दर्भे स्वीयान् विचारान् उपस्थापितवान् भास्करगङ्गोपाध्यायः अभिनन्दनीयः। आधुनिकसंस्कृतसाहित्ये बहुश्रुतः साहित्याकादमीपुरस्कारभाक् नारायणदाशमहाभागः। तस्य कृतिषु मनोहराणां केषाञ्चन बिन्दूनाम् उपस्थापनं कृतवान् विकाससिंहः । रावणार्जुनीयं नाम विशिष्टं शास्त्रकाव्यं व्याकरणस्य प्रयोगविषये विशिष्टं स्थानं बिभर्ति । तत्र विभक्त्यर्थप्रकरणस्य सुष्ठु निरूपणं कृतवान् अरिजिद्गुप्तः अभिनन्द्यते। कालिदासस्य कृतिषु वैदिकवाङ्मयस्य प्रभावः सम्यक् निरूपितः दीपङ्करदत्तेन ।

भगवतः श्रीरामकृष्णस्य जीवने रामभक्तेः स्थानं न्यरूपयत् विष्णुपदपालः ।

मृत्युञ्जयगुहमजुमदारः तर्कसङ्ग्रहस्य साम्प्रतिकतत्त्वशास्त्रेण तुलना विहिता । स्वस्थजीवनं सम्यगाचरणं विना न सम्भवतीति सम्यक् विचारितं पार्थसारथिश्रीनिधिभ्याम् । त्रिशिखब्राह्मणोपनिषदि अष्टाङ्गयोगस्य विवरणं शोभनम् उपास्थापि कौशिकेन ।

सर्वानपीमान् लेखकान् अभिनन्दामः । प्रज्ञालोकः सुदीर्घं कालं व्याप्य प्रज्ञाया आलोकं वितनुताद् इति सम्प्रार्थ्य विरमामो विस्तरात् ।

सम्पादकाः

# सन्दर्भशैली
# Reference Style

पत्रिकायां सन्दर्भदानाय, ग्रन्थसूच्यां च विलक्षणा शैली उपयुज्यते । सा शैली प्रचलिताभ्यः APA, MLA इत्यादिभ्यः शैलीभ्यः भिद्यते अंशतः । तस्याः शैल्याः निर्देशः अत्र क्रियते । **ग्रन्थावल्यां (Bibliography)** ग्रन्थस्य उल्लेखे इयं रीतिः अनुस्रियते—

- ❖ **ग्रन्थः** (book)– *ग्रन्थस्य नाम (टीकादीनां नामभिः संवलितम्)*; ग्रन्थकारः; टीकाकारः; सम्पादकः; प्रकाशकः/प्रकाशनसंस्था; प्रकाशनस्थानम्; प्रकाशनवर्षम्; श्रृङ्खला; संस्करणम्; खण्डः/भागः; ISBN।
- ❖ **प्रबन्धः** (article)– *प्रबन्धस्य शीर्षकम्*; प्रबन्धकारः; *पत्रिकायाः नाम*; (ISSN); सम्पादकः; प्रकाशकः/प्रकाशनसंस्था; प्रकाशनस्थानम्; प्रकाशनवर्षम्; खण्डः/भागः ।
- ❖ **शोधबन्धः** (dissertation)– *प्रबन्धस्य शीर्षकम्*; शोधकर्ता; मार्गदर्शकस्य नाम; (प्रकाशितम्/अप्रकाशितम्); संश्लिष्टसंस्था; स्थानम्; वर्षम् ।
- ❖ **अन्तर्जालसूची** (website)– url of the website; सन्दर्भदर्शनस्य दिनाङ्कः (dd/mm/yyyy, समयः h :m :s) ।

अत्र ग्रन्थप्रबन्धादीनां नामानि यथा ग्रन्थे वर्तन्ते तथैव लिख्यन्ते । एवं च ग्रन्थकर्तृ-सम्पादकादीनां नामानि अपि यथा मुद्रितानि तथा लिख्यन्ते, न तु पाश्चात्त्यरीत्यनुसारं नाम्नः विपर्यासः सम्पाद्यते ।

एवम् एव **सन्दर्भदाने (reference)** अपि विशिष्टा रीतिः अनुस्रियते । अस्माभिः पादटिप्पणी (footnotes) एव उपयुज्यते, न तु प्रबन्धान्त्यटिप्पणी (endnotes)। पादटिप्पणीनां द्विधा व्यवस्था। प्राचीनग्रन्थानाम्, अर्वाचीनग्रन्थानां च । क्रमेण अत्र सर्वम् उल्लिख्यते ।

- ❖ **वेदः, उपनिषद्, रामायणं, श्रीमद्भगवद्गीता, महाभारतं, पुराणम्** इत्यादिभ्यः उद्धरणं तथा सूत्राणाम् उद्धरणम् । वेदादिभ्यः मन्त्राणां श्लोकानां वा उद्धरणे मन्त्रस्य/श्लोकस्य पार्श्वे एव [] (Square Bracket) मध्ये ग्रन्थनाम, अध्यायः, श्लोकसङ्ख्या च लेख्यम् । उदाहरणम्—

नासदासीन्नो सदासीत् तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद् गहनं गभीरम् ॥
[ऋग्वेदसंहिता १०/१२९/१]

ॐ केनेषितं पतति प्रेषितं मनः
केन प्राणः प्रथमः प्रैति युक्तः ।
केनेषितां वाचमिमां वदन्ति
चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ [केनोपनिषत् १/१]

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानम् अधर्मस्य तदात्मानं सृजाम्यहम् ॥
[श्रीमद्भगवद्गीता ४/७]

इयं सीता मम सुता सहधर्मचरी तव ॥
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ।
पतिव्रता महाभागा छायेवानुगता सदा ॥
[वाल्मिकीयरामायणम् ७३ /२६-२७]

- ❖ **सूत्राणाम् उद्धरणे** अपि इयम् एव व्यवस्था। यथा वृद्धिरादैच [अष्टाध्यायी १/१/१], अथ योगानुशासनम् [योगसूत्रम् १/१ ], शास्त्रयोनित्वात् [ब्रह्मसूत्रम् १/१/३] इत्यादि ।
- ❖ **काव्यादीनां, शास्त्रीयप्रकरणग्रन्थानां** च विषये अपि एवं व्यवस्था । यथा–

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥
[रघुवंशम् १/१]

अनाघ्रातं पुष्पं किसलयम् अलूनं कररुहैर्
अनाविद्धं रत्नं मधु नवम् अनास्वादितरसम् ।
अखण्डं पुण्यानां फलम् इव च तद् रूपम् अनघं
न जाने भोक्तारं कम् इह समुपस्थास्यति भुवि ॥
[अभिज्ञानशाकुन्तलम् २/११]

शब्दस्पर्शौ रूपरसौ गन्धो भूतगुणा इमे ।
एकद्वित्रिचतुःपञ्चगुणा व्योमादिषु क्रमात् ॥
[पञ्चदशी २/२]

❖ यदि प्रकरणग्रन्थः गद्यात्मकः, तत्र केवलं ग्रन्थस्य नाम प्रकृतप्रसङ्गः उत प्रकरणम् **पादटिप्पण्याम्** उल्लेखनीयम् । यथा—
*अस्येयं समष्टिरखिलकारणत्वात् कारणशरीरम् आनन्दप्रचुरत्वात् कोशवद् आच्छादकत्वाच्चानन्दमयकोशः सर्वोपरमत्वात् सुषुप्तिरत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानम् इति च उच्यते ॥* इति पङ्क्तेः पादटिप्पणी भवति— [वेदान्तसारः ; ईश्वरनिरूपणम्]

❖ एवं नाट्यस्य वचनम् उद्धृतं चेत् इयम् एव व्यवस्था अनुसर्तव्या । तत्र **रूपकस्य नाम, अङ्कः, संवादकर्तॄणां नामानि, प्रकृतसंलापस्य वक्ता च उल्लेखनीयम्** । यथा–
*तपस्विन्निति गुणवान् खल्वयम् आलापः । अपरिचयात् तु न श्लिष्यते मे मनसि ।* इति पङ्क्तेः पादटिप्पणी भवति— **भासकृते स्वप्नवासवदत्ते प्रथमाङ्के काञ्चुकीययौगन्धरायणयोः संवादे यौगन्धरायणस्य वचनम्**

❖ **टीकानाम्** अथवा **अर्वाचीनग्रन्थानां** पङ्क्तय उद्ध्रियन्ते चेत् तेषां व्यवस्था इत्थम्—

✍ यदि ग्रन्थः टीकारूपः स्यात् तर्हि मन्त्रस्य/सूत्रस्य/श्लोकस्य/मूलपङ्क्तेः वा स्थानं लेख्यम् । यथा— *न च देहाद्यात्मप्रत्ययभ्रान्तिसन्तानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थ उपलभ्यते ।* इति पङ्क्तेः पादटिप्पणी भवति— *श्रीमद्भगवद्गीतायां १८.६६ श्लोकस्य शाङ्करभाष्यम् ।*

✍ आधुनिकग्रन्थानां विषये ग्रन्थस्य नाम तथा पृष्ठसङ्ख्या लेखनीया । ग्रन्थस्य सम्पूर्ण विवरणं तु ग्रन्थसूच्यां देयम् । यथा—
...the definition of the Bhāṇa from Bharata down to Viśvanātha has remained severely stereotyped. इति पङ्क्तेः पादटिप्पणी भवति— *Aspects of Sanskrit Literature*, p2

✍ यदि प्रबन्धविशेषस्य अंशः उद्ध्रियते तर्हि इत्थम् उल्लेखः । (वक्राक्षरेण) *प्रबन्धस्य शीर्षकं*; पृष्ठसंख्या । प्रबन्धस्य वर्णनं ग्रन्थसूच्यां निर्दिष्टप्रकारेण प्रदेयम् ।

✍ यस्माद् ग्रन्थाद् उद्धरणं दीयते तस्य ग्रन्थस्य विवरणं ग्रन्थसूच्यां देयम् । ग्रन्थसूची जालपुटे प्रदत्तायां सूच्यात्मकसञ्चिकायाम् (excel-सञ्चिकायां) अपि प्रदातुं शक्यते ।

✍ **ग्रन्थकारस्य/सम्पादकस्य/अनुवादकस्य/टीकाकारस्य नाम यथा मुद्रितं तथा एव लेख्यम्। पदव्याः पूर्वम् उल्लेखः न कर्तव्यः।** ग्रन्थकारस्य नाम यदि Sushil Kumar De इति अस्ति तर्हि **सुशीलकुमारदे** इत्येव लेखनीयम्। न तु **दे, सुशील कुमार** इति लेख्यम्। एवम् एव **जीवानन्दविद्यासागरभट्टाचार्यः, तारानाथतर्कवाचस्पतिः, गिरिधरशर्मचतुर्वेदः** इत्येवं रूपेण यथा मुद्रितपुस्तके नाम वर्तते तथा एव नाम्नः सूचना कर्तव्या । पाश्चात्त्यरीतिम् अनुसृत्य नाम्नः विकृतिः न सम्पादनीया ।

✶✶✶

# Karma Kāṇda and Jñāna Kāṇda : Pravṛtti and Nivṛtti*

**Swami Bhajanananda†**

## Introduction

There are two ways of living in this world : secular way and religious way.

The secular way is characterized by what is called 'Struggle for Existence'. In the case of animals this struggle is confined to the physical body. In the case of human beings, this struggle manifests itself as competition—competition to pass examinations, competition to earn more money, to gain more power, more enjoyments etc. This kind of perpetual competition makes life stressful and miserable. Several attempts have been made to make human life based on love and cooperation and more meaningful and noble. One of these attempts is through religion. Religious life is life regulated by the principles of religions taught by the founder Prophet of the religion.

Every religion is based on the teachings of its founder which are derived from his direct super-sensuous or transcendental spiritual experiences. For example, Christianity is based on the spiritual experiences of Jesus Christ ; Islam is based on the spiritual experiences of Prophet Muhammad, and so on. Hinduism is based on the spiritual experiences of many sages called Ṛṣis. The collection of the spiritual teachings of these Ṛṣis is known as Veda. There are four Vedas ; among them Ṛg-Veda is the most original and important Veda.

Each Veda is divided into four parts : Mantra, Brāhmaṇa, Āraṇyaka, Upaniṣad. The first two are often clubbed together as *Karma-kāṇḍa* and last two are often clubbed together

---

* Invited article

† Vice President, Ramakrishna Math and Ramakrishna Mission

as *Jñāna-kāṇḍa*. Pūrva-Mīmāṃsakas regard *Karma-kāṇḍa* as the highest authority in all religious and philosophical matters. Advaita Vedāntins hold *Jñāna-kāṇḍa* to be the highest authority in all such matters.

In Hinduism, what corresponds to the Western concept of religion is '*Dharma*' [1]. '*Dharma*' is of two kinds : *Pravṛtti* and *Nivṛtti*. *Pravṛtti Dharma* is a way of life spent in seeking wealth (*Artha*) and sense pleasure (*Kāma*). The goal of *Pravṛtti Dharma* is *abhyudaya* or welfare (one's own welfare and welfare of the society). *Pravṛtti Dharma* is supported by the *Karma-kāṇḍa* part of Vedas.

*Nivṛtti Dharma* is a life of renunciation (of wealth and kama). The goal of *Nivṛtti Dharma* is *Niḥśreyasa* or *Mukti*. *Nivṛtti dharma* is supported by the Upaniṣads which constitute the *Jñāna-kāṇḍa* part of the Vedas.

The vast majority of people in this world follow *Pravṛtti Dharma*. Only a small number of people follow *Nivṛtti Dharma*. The Mīmāṃsakas gave great importance to *Karma-kāṇḍa*. During the Vedic period the Mīmāṃsakas popularized various kinds of fire rituals such as *yajñās, yāgas* etc.

This was the situation in India when Buddha came. Buddha gave great importance to *Nivṛtti Dharma* through *Sannyāsa*. Buddha established the first *Sannyāsī Saṅgha*[2]. He admitted thousands of people into *Sannyāsa*. Buddha, however, denied the existence of Ātman or pure consciousness

1 The words 'religion' and '*dharma*' do not mean exactly the same. 'Religion' comes from the root religare which means 'to restrain'. Religion implies a community or church. '*Dharma*' comes from the root dhr which means uphold or sustain. *Dharma* implies the true function or nature of a thing or person.

2 Two thousand and five hundred years later Sri Ramakrishna established a new, the second, *Sannyāsī Saṅgha* known as the Ramakrishna Math.

as the true Self of man, which is one of the foundational principles of Hindu philosophy and culture. Owing to this fact, and also because of several historical reasons, Buddhism completely disappeared from India. But Buddhism profoundly influenced Hindu philosophy, especially Advaita Vedānta and Patañjali's Yoga. Buddhism also exerted strong influence on the religious practices and attitude towards life of Hindus.

During the period between the 2nd century BCE and 2nd century CE Vedic religious tradition came to be replaced by Paurāṇik and Epic religious traditions. In the new Hinduism Vedic fire rituals came to be replaced by new rites. New gods and the *Avatāra* of God replaced old gods. Image worship and temples came to be established. Although the majority of People continued to follow *Pravṛtti Dharma, Karma-kāṇḍa* of the Vedas gave way to Smṛtis or codes of law, such as Manu-smṛti, which fixed the duties of different castes, which made the institution of caste rigid. The Vedic Ṛṣi ideal came to be replaced by the *Sannyāsī* ideal.

More than one thousand years after Buddha came Ācārya Śaṅkara. Śaṅkara also stressed *Nivṛtti Dharma*. He countered the nihilistic doctrines of Buddhism by establishing the nature of the ultimate Reality as one, non-dual infinite consciousness known as Brahman which exists in all beings as the Ātman. His philosophy established supremacy of *Jñāna-kāṇḍa*. Śaṅkara either organized Hindu monks into ten 'orders' or reorganized the existing 'orders'.

After Śaṅkara, other Ācāryas like Rāmānuja and Madhva, interpreted Vedānta in different ways, and established the supremacy of *Bhakti Mārga*. In this way *Nivṛtti Dharma* came to have several pathways such as *Jñāna Mārga, Bhakti*

*Mārga, Yoga, Tantra* etc[3].

**Division of Vedas**

The division of Vedas into two parts known as *Karma-kāṇḍa* and *Jñāna-kāṇḍa* is so well known that most people take it to be a natural and self-evident fact. But two questions arise in this context : What is the logical and philosophical basis for this division ? Secondly, does *Karma-kāṇḍa* represent a lower stage and *Jñāna-kāṇḍa* a higher stage in the evolution of Hindu philosophical thought, as they are commonly held to be ?

**Question 1 :** What is the logical or philosophical basis of the division of the Vedas into *Karma-kāṇḍa* and *Jñāna-kāṇḍa*? *Karma-kāṇḍa* consists of hymns and directions for the performance of rites and rituals, whereas *Jñāna-kāṇḍa* consists of philosophical discourses. Thus, apparently, the division of the Vedas seems to be a natural one. But there are also compelling philosophical reasons for this division.

First of all, it should be noted that, out of the six systems[4] of Hindu philosophy, Vedānta and Pūrva-Mīmāṃsā are the only two systems which accept Vedas as the highest *pramāṇa*[5].

---

3 As *Nivṛtti Dharma* gained importance, *Pravṛtti Dharma* came to be neglected. This neglect and the popularization of the doctrine of Māyā led to the Socio-economic and political downfall of India. Swami Vivekananda, attempted to restore the lost glory of India by showing a new kind of *Pravṛtti Dharma* through Practical Vedānta, especially doctrine of *"Śiva jñāne jīva sevā"*, 'service to man as service to God'.

4 The six systems are : Nyāya, Vaiseṣika, Sāṃkhya, Yoga, Mīmāṃsā and Vedānta.

5 In the regional languages of India *pramāṇa* means proof; but in scriptural literature, *pramāṇa* means 'means of knowing'. As the *Arthasaṃgraha* states, *Pramākaraṇaṃ Pramāṇam* 'that which produces valid knowledge is *Pramāṇa*'. Three *pramāṇas* (*Pratyakṣa*, *Anumāna*, *Śabda*) are accepted by most of the Darśanas.

But the two systems differ from each other in several ways.

The Mīmāṃsakas hold that true religion (*Dharma*) consists of nothing but injunctions and prohibitions (*Vidhis* and *Niṣedhas*). Their well-known definition of Religion is: *"Codanālakṣaṇaḥ Artho Dharmaḥ"* ('Religion is defined as that which motivates people to do various rituals')[6]. Injunctions and prohibitions can be known only through *Śabda*, and not through *Pratyakṣa* or *Anumāna*. To give an example, that Belur Math is on the Bank of the Ganga can be known by all people through direct perception (*Pratyakṣa*). But that one should take bath in the Ganga cannot be known through *Pratyakṣa*. It can be known only through *Śabda*, that is, only if somebody gives the command "Take bath in the Ganga". Similarly, according to Mīmāṃsakas, the do's and don'ts of religion can be known only from the Vedas and not by any other means. This is what makes the Vedas the highest authority.

This is an unassailable argument and Śaṅkarācārya has no other way but to accept it. But Śaṅkara has two objections to this argument of the Mīmāṃsakas. In the first place, according to Śaṅkara, the main purport of the Vedas is to reveal the true nature of Brahman and not merely to give do's and dont's of religion.[7]

Secondly, being a spiritually illumined spiritual teacher, Śaṅkara also asserted that the knowledge of Brahman gained through the Vedas should culminate in direct transcendental realization (*Aparokṣānubhūti*). Śaṅkara states that although the Mīmāṃsakas and Vedāntins hold Vedas to be the highest authority, Vedāntins hold that the knowledge gained from the

6 *Jaiminī Sūtra* 1.1.2

7 *Anubhava-avasānatvāt*. Śaṅkara's Bhāṣya on *Bṛhadāraṇyaka Upaniṣad* 1.4.

Vedas should end in direct realization.

Against this assertion the Mīmāṃsakas raise the objection that if Brahman can be known through any other (even though transcendental) means, then the Vedas cease to be the highest authority. The Vedas can be regarded as the highest authority only if the truth revealed by the Vedas cannot be obtained by another means.

It is in response to these two arguments of the Mīmāṃsakas (that *vidhis* and *niṣedhas* can be known only through *Śabda* and if something can be known outside the Vedas, the Vedas would cease to be the highest *Pramāṇa*) that the Vedas have been divided into *Karma-kāṇḍa* and *Jñāna-kāṇḍa*. In *Karma-kāṇḍa* the Mīmāṃsaka view that the main purport of Vedas is to reveal *Vidhis* and *Niṣedhas* holds good, whereas in *Jñāna-kāṇḍa*, the Vedāntic view that the main purport of Vedas is to reveal the true nature of Brahman and its realization holds good.

**Question 2 :** Is *Jñāna-kāṇḍa* alone the true essence and purport of the Vedas ? Does the *Karma-kāṇḍa* represent a lower stage in human understanding compared to the Upaniṣads ? Are all the hymns and rituals based on tribal superstitions and outmoded mythology without any higher spiritual significance ?

There is no denying the fact that some of the hymns of the Vedas which include prayers for wealth, for progeny, for the elimination of enemies etc are of a low order. But there are many hymns which are of sublime nature. Some examples are given below :

"एकं सद् विप्रा बहुधा वदन्ति ।"

*'ekaṃ sad viprā bahudhā vadanti.'* [Ṛg-Veda 1.164.46]

The famous Gāyatri prayer :

"भूर् भुवः स्वः तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः

प्रचोदयात् ।"[8]

*'bhūr bhuvaḥ svaḥ tat saviturvareṇyaṃ bhargo devasya dhīmahi dhiyo yo naḥ pracodayāt.'*

And the wonderful hymn of creation also belong to *Karma-kāṇḍa*. The Nāsadīya Sūkta states :

"नासद् आसीन्नो सद् आसीत् तदानीं नासीद् रजो नो व्योमो परो यत् । किम् आवरीवः कुह कस्य शर्म-न्नम्भः किम् आसीद् गहनं गभीरं ॥ न मृत्युर् आसीद् अमृतम् न तर्हि न रात्र्या अह्न आसीत् प्रकेतः । आनीद् अवातं स्वधया तद् एकं तस्माद्ध अन्यन् न परः किञ्चन आस ॥"

*'nāsad āsīnno sad āsīt tadānīṃ nāsīd rajo no vyomo paro yat. kim āvarīvaḥ kuha kasya śarma-nnambhaḥ kim āsīd gahanaṃ gabhīraṃ. na mṛtyur āsīd amṛtam na tarhi na rātryā ahna āsīt praketaḥ. ānīd avātaṃ svadhayā tad ekaṃ tasmāddha anyan na paraḥ kiñcana āsa.'*

There was neither non-reality nor reality then ; There was no air nor sky which is beyond it. What lay covered and where ? And who gave it shelter ? Was water there fathomless and deep ? There was no death then, nor life immortal ; Neither of night nor of day was there any sign. The One breathed, airless, by self-impulse ; Other than that was nothing whatever.

[Ṛg-Veda 10.129.1,2]

The famous Puruṣa-Sūkta, is a description of God as the sum total of all the *jīvas*, and it also gives a description of how the One became the many.

"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपाद् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद् दशांगुलम् ॥"

*'sahasraśīrṣā puruṣaḥ sahasrākṣaḥ sahasrapād.*
*sa bhūmiṃ viśvato vṛtvā atyatiṣṭhad daśāṃgulam.'*

The Supreme Person is thousand-headed, thousand eyed, thousand-footed ; pervading the earth on all sides, He

8 *Ṛg-Veda* 3.62.10

transcends (the universe) and appears as if he were only ten inches. [Ṛg-Veda 10.90.]

In the Tenth Maṇḍala of Ṛg-Veda, a Ṛṣi by name Dīrghatamas raises fundamental question of great philosophical significance. He asks :

"को अद्धा वेद क इह प्र वोचत् कुत आजाता कुत इयं विसृष्टिः । अर्वाग् देवा अस्य विसर्जनेनाथा को वेद यत आबभूव"

*'ko addhā veda ka iha pra vocat kuta ājātā kuta iyaṃ visṛṣṭiḥ. arvāg devā asya visarjanenāthā ko veda yata ābabhūva'*

Who really knows, and who can here declare it—Whence was it born and whence came this creation ? And did the Devas appear with its production ? But, then, who knows whence it has arisen ?

[Ṛg-Veda 10.129.6]

There are many other verses in the Ṛg-Veda which express sublime ideas which sometimes surpass even some of the passages of the Upaniṣads.

One of the main reasons for the lack of understanding of the importance of the *Karma-kāṇḍa* portion of the Vedas is the lack of understanding of Vedānta. As a system of philosophy (*darśana*) Vedānta includes not only the Advaita school but also other schools such as Viśiṣṭādvaita, Dvaita etc, and these schools freely make use of ritualistic worship and hymns.

Another reason is the wrong, even distorted, translation and interpretation of the Vedas by Western scholars, some of whom were fanatical Christian missionaries. Many of the orientalists were influenced by Herbert Spencer's theory of social evolution and the evolution of philosophical ideas from mythology and magical incantations.

One of the earliest to protest against this distorted interpretation of the Vedas was Dayananda Saraswati. His guru, Virajanandaji taught him how to interpret the Vedic hymns with the help of Nirukta (etymological dictionary). Unfortunately, Dayananda Saraswati's attack on idol worship, temples, caste etc antagonized many Hindus and led to the creation of a new Hindu sect, the Arya Samaj.

A few years after Dayananda Saraswati Sri Aurobindo gave a spiritual or mystic interpretation of the Vedic hymns.[9] Owing to the strong influence of Advaita Vedānta and other reasons, Sri Aurobindo's interpretation has not received wide acceptance.

Following Sri Aurobindo's interpretation, the Dutch scholar Jan Gonda made a scholarly attempt to give a more convincing interpretation of the hymns of the *Saṃhitā* part of the Vedas.[10]

## Conclusion

From the above discussion it is clear that *Karma-kāṇḍa* is not inferior to *Jñāna- kāṇḍa*. Even if we don't accept the mystical interpretation of *Karma-kāṇḍa* hymns given by Sri Aurobindo and Jan Gonda, we should understand the deeper meaning of the passages in the *Mantra* and *Brāhmaṇa* parts of the Veda. We should look upon the Vedas as one undivided whole and understand that the whole of Vedas is meant for different kinds of people. Similarly, there should be an integral Philosophy of Life and universal Religion which unifies *Pravṛtti Dharma* and *Nivṛtti Dharma*, *Jñāna Mārga* and *Bhakti Mārga.* Śrī Kṛṣṇa attempted to develop such an integral Philosophy and universal Religion

9 *Hymns of the Mystic Fire* by Sri Aurobindo.

10 Jan Gonda, *Vision of the Vedic Seers*.

through his doctrine of Divine grace.[11] In modern times Swami Vivekananda has given us such an integral view and universal Religion through the Motto 'Ātmano mokṣārthaṃ jagaddhitāya ca' and his concept of *Synthesis of Yogas* which means the conversion of one's whole life into Yoga.

✶✶✶

## Bibliography


1. *Hymns to The Mystic Fire* (Vol 16, *The Complete Works of Sri Aurobindo*) ; Sri Aurobindo ; Sri Aurobindo Ashram Trust ;


11 Normally, *Pravṛtti* and *Nivṛtti* are contradictory to each other : the goal of *Pravṛtti* is worldly enjoyments and it does not lead to *Nivṛtti* and *Mukti*. But Divine grace makes this conversion of *Pravṛtti* into *Nivṛtti* possible. This is stated by Śrī Kṛṣṇa in the two *ślokas* of the last chapter.

"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥
यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥"
*'sve sve karmaṇyabhirataḥ saṃsiddhiṃ labhate naraḥ.*
*svakarmanirataḥ siddhiṃ yathā vindati tacchṛṇu.*
*yataḥ pravṛttirbhūtānāṃ yena sarvamidaṃ tatam.*
*svakarmaṇā tamabhyarcya siddhiṃ vindati mānavaḥ.'*

'By being devoted to his own duties, a person attains supreme success (*saṃsiddhim*). Listen to how a person attains supreme success by discharging his duties.'

By worshipping God, who is the source of all activities and who pervades all this (universe), with one's own duty, a person attains supreme success. [*Bhagavad Gītā* 18. 45, 46]

Through this statement Śrī Kṛṣṇa has shown how by the grace of God it is possible to convert *Pravṛtti Dharma* into *Nivṛtti Dharma*- how it is possible for even householders to attain 'supreme success'. [It may be noted here that Śrī Śaṅkara interprets *saṃsiddiḥ* to mean the qualification to be established in *Jñāna* (knowledge of Brahman). That is, according to him, *Pravṛtti* does not lead directly to *Mukti*; it leads only to purification of mind and qualifies him for the attainment of *Jñāna* through which alone can a person attain *Mukti*.]

Pondicherry ; 2013
2. *Mīmāṃsā Philosophy* (Part-I) ; Madhusudan Penna (ed.) ; New Bharatiya Book Corporation ; New Delhi ; 1st Ed., 2021
3. *Ṛg-Veda* (Part-II, Maṇḍala I, Sūkta-s 81-191) ; Vishva Bandhu (ed.) ; Vishveshvaranand Vedic Research Institute ; Hoshiarpur ; 1963 ; 1st Ed.
4. *Ṛg-Veda* (Part-III, Maṇḍala-s II, III and IV) ; Vishva Bandhu (ed.) ; Vishveshvaranand Vedic Research Institute ; Hoshiarpur ; 1963 ; 1st Ed.
5. *Ṛg-Veda* (Part-VII, Maṇḍala X, Sūkta-s 46-191) ; Vishva Bandhu (ed.) ; Vishveshvaranand Vedic Research Institute ; Hoshiarpur ; 1965 ; 1st Ed.
6. *Śrīmadbhagavadgītā ;* Swami Basudebananda ; Udbodhan Karyalaya ; Kolkata ; 2018
7. *The Bṛhadāraṇyaka Upaniṣad* (with The Commentry of Śaṅkarācārya) ; Translated by Swami Madhavananda ; Advaita Ashrama ; Mayavati ; 1950
8. *The Synthesis of Yoga* (Vol 23-24, *The Complete Works of Sri Aurobindo*) ; Sri Aurobindo ; Sri Aurobindo Ashram Trust ; Pondicherry ; 1999
9. *The Vision of The Vedic Poets ;* Jan Gonda ; Mouton and Co. ; The Hague ; 1963

✳ ✳ ✳

# ऋग्वेदे प्रतिफलिता परिवेशभावना

**प्रलय-शङ्कर-अधिकारी***

**Abstract**

[प्राचीनतमशास्त्रेषु अन्यतमे ऋग्वेदे पर्यावरणस्य अनेके सन्दर्भाः सन्ति। ऋग्वेदः पर्यावरणकेन्द्रितविश्वदृष्टिम् उपस्थापयति, यत्र मनुष्याः प्राकृतिकजगतः अंशत्वेन दृश्यन्ते, न तु तस्मात् पृथक् भवन्ति। एषा दृष्टिः सर्वेषां प्राणिनां परस्परं सम्बन्धं वर्णयति। यश्च सम्बन्धः स्तोत्रेषु बहुधा प्रतिविम्बितः अस्ति। ऋग्वेदः प्रकृतेः तत्त्वानां च श्रद्धां प्रकटयति। सूर्यचन्द्रमारुतजलं सर्वं दिव्यव्यक्तित्वेन पूज्यते। ऋग्वेदः वन्यानां संरक्षणस्य स्थायित्वस्य च समर्थनं करोति विविधमन्त्रेषु। यथा—अश्विनां स्तोत्रे [ऋग्वेदः १.११६] वनानां वन्यजीवानां च रक्षणं याचते। ऋग्वेदः प्रकृत्या सह सामञ्जस्यं कृत्वा जीवनस्य महत्त्वं बोधयन् पर्यावरणनीतिं प्रवर्धयति। कथं परिवेशस्य संरक्षणं करणीयम्, परिवेशस्य हानौ मनुष्याणां कीदृशी हानिः भवेत्, परिवेशेन सह जीवानां कः सम्बन्धः इत्यादिविषयाः ऋग्वेदे बहुत्र दृश्यते। ते विषयाः अस्मिन् प्रबन्धे आलोच्यन्ते।]

**कुञ्चिकाशब्दाः** — ऋग्वेदः, परिवेशभावना, आध्यात्मिकता, वनानि, वरुणः, अग्निः।

## भूमिका

मानवसभ्यतायाः उन्मेषोऽभवत् प्रागैतिहासयुगम् अतिक्रम्य वैदिकयुगे। तदानीन्तनकाले मानवाः सुष्ठु जीवनाय प्रकृतिमात्मीयत्वेन मन्यमाना आसन्। प्रकृत्युपरि मनुष्याणाम् एतन्निर्भरतया प्राकृतिकपदार्थाः देवरूपैः तन्मनःसु महत्स्थानमधिकृतवन्तः। ऋग्वेदे स्तवनीयान् देवान् पर्यालोच्य ज्ञायते यत् ते देवाः खलु प्रकृतिभूतानां वस्तूनां चैतन्यमयस्वरूपाः। यथा ऋग्वेदे सविता आदित्यो वा सूर्यस्य, अग्निः नित्यप्रयोजनीयस्य अनलस्य, मरुद्गणः वात्यायाः, रुद्रः वज्रस्य, पर्जन्यदेवः मेघस्य, आपो जलस्य, पृथिवी धरित्र्याश्च अधिष्ठातृदेवाः।

निरुक्तकारयास्काचार्यः ऋग्वेदे आलोचितान्देवान्त्रिधा विभजन्नाह— "तिस्र एव देवता इति नैरुक्ता अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वाऽन्तरिक्षस्थानः सूर्यो द्युस्थानः।" इति।

* सहायकाध्यापकः, प्रभातकुमारमहाविद्यालयस्य संस्कृतविभागे, पश्चिमवङ्गेषु, Email : pralay09@gmail.com

तथाहि पृथिवीस्थानीयदेवाः— अग्न्यप्सोमाः। एषु प्रधानोऽग्निः विविधाभिः अभिधाभिः अभिव्यक्तः भवति। एवम् अन्तरिक्षीयदेवाः हि— इन्द्र-वायु-मरुत्-मातरिश्व-पर्यन्यादयः। एषु इन्द्रो मुख्यरूपेण देवान्तररूपेण आविर्भूतः। तथा सूर्य-मित्र-वरुण-पूषा-सवित्रादित्य-रात्र्युषाः हि द्युलोकवर्तिन्यो देवताः। एषु मुख्यतया सूर्यो हि विराजते। ऋग्वेदे एते देवाः चिरन्तनपरब्रह्मणः अंशस्वरूपाः। तद्यथा ऋग्वेदेऽस्ति मन्त्रोऽयम्—

एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः। इति।

[ऋग्वेदः १.१६४.४६]

ऋग्वेदे मन्त्रेषु इन्द्रादिदेवानां स्तुतिं स्वरूपं प्रार्थनां चावलोक्य वक्तुं शक्यते यत् ते देवा जीवानामानुकूल्यं साधयन्ति। यथा ऋग्वेदस्य दशममण्डलीये एकस्मिन् मन्त्रेऽस्ति— सूर्यो द्युलोकोपद्रवाद्, वायुः आकाशविघ्नात्, अग्निश्च पार्थिवबाधात् अस्मान् रक्षतु। सः मन्त्रो हि—

सूर्यो नो दिवस्पातु वातोऽन्तरिक्षादग्निर्नः पार्थिवेभ्यः। इति।

[ऋग्वेदः १०.१५८.१]

ऋग्वेदे त्रयोदश सूक्तानि सन्ति सूर्यदेवस्य। सूर्यो हि ज्योतिष्काणाम् अन्यतमः। तदाम्नातम् ऋग्वेदे—

इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमम्। इति।

[ऋग्वेदः १०.१७०.३]

सूर्यतेजसा मानवानां कल्याणं, यागक्रियाणाम् आनुकूल्यं, सर्वेषाञ्च पोषणादि भवतीति— "येनेमा विश्वा भुवनान्याभृता विश्वकर्मणा विश्वदेव्यावता" [ऋग्वेदः १०.१७०.४] इति ऋग्वेदमन्त्राज् ज्ञायते।

सूर्यो हि विश्वस्य प्रकाशकः, रात्रेः दिवसस्य च निर्णायकः। तथाह्यस्ति ऋङ्मन्त्रः—

विद्यामेषिरजस्पृथ्वहासिमानोअक्तुभिः। इति।

[ऋग्वेदः १.५०.७]

वायुदेवतायाः स्थानम् अन्तरिक्षम्। ऋषय आसन् ऋग्वैदिकयुगे वायोः गुरुत्वविषये सम्यज्ज्ञानिनः। जीवनधारणोपयोगिवायुः वृक्षेभ्यो निर्गत्य परिवेशस्य स्वास्थ्यं विकाशयति। तादृशवायुः श्वसनकाले जीवैः सादरं गृह्यते। जीवेभ्यः निर्गतः दूषितवायुः वृक्षलतादिभिः आस्वाद्यते। तेन भूपरिमण्डलमिदं जीवानां वासोपयोगि भवति। इयं शाश्वतघटना ऋषीणां

मनःसु प्राचीनकाले एव उदिता । तदर्थम् ऋषिभिः प्रार्थ्यते—

आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥ इति ।

[ऋग्वेदः १०.१३७.३]

तथाहि यजमानैः प्रार्थ्यते यद्— हे अग्ने त्वं हितकरम् औषधमत्र आनय, अहितञ्च दूरीकुरु इतः; संसारस्य भेषजतुल्यस्त्वमेव देवानां दूतो भव । कल्याणकरः सुखकरो वायुर्हि मानवजीवनं दीर्घायितं करोतीति अस्ति तद्विषयकमन्त्र ऋग्वेदे—

वात आवातु भेषजं शम्भुमयो भुनो हृदे ।
प्रण आयूंषि तारिषत् ॥ इति । [ऋग्वेदः ०१.१८६.१]

एवम् ऋग्वेदे वायुः पिता भ्राता तथा बन्धुरपि । तदस्ति ऋङ्मन्त्रः—

उत वात पितासि न उत भ्रातोत नः सखा । इति ।

[ऋग्वेदः १०.१८६.२]

ऋग्वेदे रुद्रानुद्दिश्य सूक्तत्रयं दृश्यते । भयङ्करः संहारकश्च रुद्रदेवः प्रकृत्यां वज्रपातादिरूपैः स्वात्मानं प्रकाशयति । झञ्झायाः देवता मरुतो भवन्ति रुद्रतनयाः । वैदिकयुगे मरुत् वायुश्च भिन्नौ अपि लोके तु तौ अभिन्नौ एव ।

पर्जन्यदेवानुद्दिश्य उक्तेषु सूक्तत्रयेषु दृश्यते यत् पर्जन्यो वर्षणेन अन्नमुत्पादयति, औषधि-जलयोश्च वृद्धिं सम्पादयति । स मेघान् उन्मुच्य विदीर्य च वर्षति । तेन गवादीनां पुष्टिः ओषधीनामुज्जीवनं, मरुभूमिश्च जलेन सुगम्या भवति ।

जलं हि जीवनम् । ऋग्वेदे जलम् अमृतत्वेन वर्णितम् । अप्सु भैषजगुणविधायको मन्त्रो हि— "अपस्वन्तरमृतमप्सु भेषजपामुत प्रशस्तये ।" [ऋग्वेदः १.२३.१९] इति । जलेन मलिनत्वं पापादिकं सर्वमेव अपाक्रियते । तथाहि मन्त्रः—

इदमापः प्र वहत यत् किञ्च दुरितं मयि । इति ।

सूक्तेषु देवस्तुतिपर्यालोचनात् ज्ञायते प्राचीनकाले आर्याणां प्रकृतिविषये पर्यवेक्षणं तीक्ष्णमासीत् । ते मानवजीवने सहायकान् पार्थिवपदार्थान् देवरूपेण पूजितवन्तः । एवमार्याः खलु परोक्षतया परिवेशमर्मज्ञा आसन् । किन्तु दूषणाभावात् परिवेशरक्षणे प्रयोजनीयतापि नासीत् ।

परिवेशे जैवोपादानानि अन्यतमानि । अतः अधुना परिवेशरक्षणाय

अरण्यसम्पदां गुरुत्वम् अरण्यानीसूक्तपठनाज् ज्ञायते । प्राणसहायकेषु वनेषु हिंस्रपशुव्यतिरेकेण सुस्वादुफलभक्षणात् कालः सुखेन यापयितुं शक्यते । तथास्ति मन्त्रः—

न वा अरण्यानिर्हन्त्यन्यश्चेन्नाभिगच्छति ।
स्वादोः फलस्य जग्ध्वाय यथाकामं नि पद्यते । इति ।

[ऋग्वेदः १०.१४६.५]

कस्तुरीसौरभमिव सुरभिमण्डितेभ्यः अरण्येभ्यः यथेष्टमाहारादिकम् उपलभ्यते । यद्यपि अस्यां मातृस्वरूपायां भूमौ कृषिकर्म न संघटते तथापि मृगादिपशूनां निश्चिताश्रयस्थलं हि सा । तथाह्यस्ति वेदे—

आञ्जनगन्धिं सुरभिं बह्वन्नामकृषीबलाम् ।
प्राहं मृगाणां मातरमरण्यानिमशंसिषम् ॥ इति ।

[ऋग्वेदः १०.१४६.६]

ओषधिसूक्तस्य द्वितीयमन्त्रे यजमानः प्रार्थयन्नाह —

शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥ इति ।

[ऋग्वेदः १०.९७.२]

एतेन जननीस्वरूपा ओषधयः खलु भूमिषु शतं सहस्रञ्च जायन्ते । मानवानाम् आरोग्यविधाने ओषधीनां बहुशः माहात्म्यं परिलक्ष्यते ।

अन्ततः एवं वक्तुं शक्यते पृथिवी यथा जीवानां प्राणधारणे अनुकुला स्यात् तदर्थं तदानीन्तनमानवाः सदा सचेष्टा जागरुकाश्च आसन् । ओषधयः, जलं, वायुः, रात्रिः, नदी, पृथिवी, सूर्यः, अन्तरीक्षादयः सर्वदा मधुयुक्ता भवेयुरित्यासीत् ऋषीणां प्रार्थना । अत्र प्रामाणिकमन्त्रो हि—

मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवन्त्वन्तरिक्षम् । इति ।

[ऋग्वेदः ४.५७.३]

एवमन्यत्रापि दृश्यन्ते—

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥
मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।

माध्वीर्गावो भवन्तु नः ॥ [ऋग्वेदः १.९०.६-८]

इति शिवम् ।

✶ ✶ ✶

## Bibliography


1. *Veder Paricay* (Ben.) (3rd Edition) ; Yogiraj Basu ; Farma K. L. Private Limited ; Kolkata ; 2009
2. *Ṛgvedasaṃhitā* (Ben.) ; Volume-I,II ; Śrīyukta Durgādāsa Lāhiḍī ; Akṣaya Library ; Kolkata ; 2020
3. *Prācīn Bhārat Samāj O Sāhitya* (Ben.) ; Sukumārī Bhaṭṭācārya ; Ananda Publishers ; Kolkata ; 1988
4. *A History of Sanskrit literature* (Eng.) ; Arthur A. Macdonell ; D. Appleton and Company ; New York ; 1900


✳ ✳ ✳

# वेदप्रामाण्ये विभिन्नानि आस्तिकदार्शनिकमतानि

**हिरण्मय दत्तः ***

## Abstract

[वेदः प्रमाणं यत्र येषां वेति विग्रहेण बहुव्रीहिसमासे वेदप्रमाणमिति पदं सिद्ध्यति। वेदप्रमाणमेव इत्यस्मिन् विग्रहे "चतुर्वर्णादीनां स्वार्थ उपसंख्यानम्" [वार्त्तिकम् ३०९१] इत्यनेन वार्त्तिकेन ष्यञ्-प्रत्यये कृते सुप्रत्यये च वेदप्रामाण्यमिति पदं सिद्धम्। वेदप्रामाण्यस्य उपर्यास्थां निधाय यानि दर्शनानि प्रसिद्धानि सन्ति तानि चास्तिकानि दर्शनानि कथ्यन्ते, एतानि दर्शनानि सर्वसाकल्येन षट्, अतः तानि दर्शनानि षड्दर्शनान्यपि कथ्यन्ते। षड्दर्शनमित्युक्ते न्यायं वैशेषिकं सांख्यं पातञ्जलं मीमांसा वेदान्तश्चेति षडास्तिकदर्शनमेव बोद्ध्यते। हयशीर्षपञ्चरात्रौ ग्रन्थे गौतमः कणादः कपिलः पतञ्जलिः जैमिनिर्व्यास इत्येतेषां दार्शनिकानां दर्शनान्येव षड्दर्शनमित्युच्यते।[१] एष्वास्तिकदर्शनेषु नास्तिकानां सर्वा आपत्तीः परिहृत्य वेदस्याभ्रान्तत्वं सत्यत्वञ्चेति प्रतिपादितम्।]

**कुञ्चिकाशब्दाः** — दर्शनम्, प्रामाण्यम्, सांख्यम्, पातञ्जलः, ईश्वरः, नैयायिकः, वैशेषिकः।

## वेदप्रामाण्ये वैशेषिकमतम्

वेदस्य प्रामाण्यपरीक्षायां विभिन्नेषु दार्शनिकमतेषु पर्य्यालोचितेषु सत्सु दृश्यते यत्— परमेश्वरस्य वागित्येव वेदः प्रमाणमिति वैशेषिकैर्मीमांसितमङ्गीकृतम्, तदेव तद्वचनादाम्नायस्य प्रामाण्यम् [वैशेषिकसूत्रम् १.१.३] इति वैशेषिकसूत्रादवगम्यते। उपस्कारमिति टीकायां पण्डितेन शङ्करमिश्रेण तदित्यनेन पदेन परमेश्वर एव गृह्यते। तेन परमेश्वरेण रचितत्वात् वेदः प्रमाणम्।[२] न्यायकन्दलीति ग्रन्थकर्तुः श्रीधरभट्टस्य मते— तत्त्वदर्शिनो महर्षय एव वेदस्य कर्त्ता, न तु परमेश्वरः। अतः तच्छब्देन तत्त्वदर्शिनो महर्षय एव उच्यन्ते। अत्र सत्यद्रष्ट्रा महर्षिगणेन उक्तौ सत्यामेव वेदः प्रमाणम्। शङ्करमिश्रस्य श्रीधराचार्यस्य च व्याख्यानम् आपाततः विरुद्धमिति प्रतिभाति किन्तु परमार्थत उभयोर्मध्ये कोऽपि

---

* शोधच्छात्रः, कलिकातास्थितस्य रवीन्द्रभारतीविश्वविद्यालयस्य वेदभवने, पश्चिमवङ्गेषु, Email : hiranmaydutta00@gmail.com

१ गौतमस्य कणादस्य कपिलस्य पतञ्जलेः।
व्यासस्य जैमिनेश्चापि दर्शनानि षडेव हि॥ [हयशीर्षपञ्चरात्रम्]

२ 'तद्वचनात् तेन ईश्वरेण प्रणयनात् उपस्कार।' (१४० पृः चौखम्बा सं)

विरोधो नास्ति । परमपिता परमेश्वर एव महर्षिगणस्य हृदयगुहायां ज्ञानप्रदीपं प्रज्वालयति, तस्य अनुग्रहेण चैव महर्षयो वैदिकसत्यं प्रत्यक्षं कृत्वा वेदवाणीं प्रचारितवन्तः । एतदर्थं शास्त्रे कुत्रचित् परमेश्वरो वेदस्य कर्त्तेति अभिहितः कुत्रचित् च महर्षयो वेदस्य कर्तृरूपेण विदिता आसन् । वैशेषिकदर्शनस्य षष्ठाध्यायस्य प्रारम्भे वेदस्य प्रामाण्यं समर्थयितुकामेन महर्षिणा कणादेनोक्तम्— लौकिकवाक्यानि यतो बुद्धिमतो व्यक्तिगणस्य स्वकीयबुद्ध्या रचितानि । अत एव वैदिकवाक्यसमूहः अपि कस्यचित् मनीषिणोऽसामान्येन प्रज्ञाबलेनैव विरचितः ।

**वेदप्रामाण्ये नैयायिकमतम्**

नैयायिकानां मते, वेद आप्तमहापुरुषस्य वाक्यमित्येव वेदः प्रमाणम् । तर्हि कः आप्तः? उच्यते तावत्— यो लौकिकमलौकिकञ्च सर्वाणि वस्तूनि सम्यक् प्रत्यक्ष्य सर्वदर्शी अभवत्, धर्मस्य गूढं रहस्यं च साक्षात्कृतवान्, येन च तत्त्वज्ञानस्य सुफलं सर्व्वसाधारणेषु प्रचारयितुं शक्तिरिच्छा च वर्त्तते, ईश्वरावतारः स हि महापुरुष एव आप्तः । स सत्यद्रष्टा तत्त्वज्ञानी, तस्य वाक्यमेव प्रमाणम् । आप्तवाक्यन्तु द्विविधम्— दृष्टार्थम् अदृष्टार्थञ्चेति । यस्य वाक्यस्यार्थभूतं प्रतिपाद्यं वस्त्वस्मिन् जगत्येव अस्माभिः प्रत्यक्षीकर्तुं न शक्तम्, तदेव दृष्टार्थमाप्तवाक्यम् । यस्य च वाक्यस्य अर्थभूतं वस्तु अस्माकं न प्रत्यक्षीभवति तदेव अदृष्टार्थमाप्तवाक्यम् । स्वर्गो नरकः परलोको देवता इत्यादयः अस्माकं प्रत्यक्षस्य विषयो न भवति, यद्यपि तत्तु योगचक्षुषा प्रज्ञाचक्षुषा वा आप्तमहर्षिणः प्रत्यक्षीकृतवन्तः, तथापि तद् अस्माकं दृष्ट्या अदृष्टार्थमेव । यद् वस्तु अस्माकं स्थूलदृष्टौ परीक्षितव्यम् इति सत्यमिव महर्षिभिः योगदृष्टौ परीक्षितं तद् अस्माकमदृष्टमपि सत्यम् । अस्माकं दृष्टवस्तु यथा प्रमाणं तथैव अदृष्टवस्त्वपि प्रमाणम् । महर्षिणा गौतमेन तस्य कृते न्यायदर्शने वेदप्रामाण्यपरीक्षायामुक्तम्— आयुर्वेदस्य फलं सर्वैः प्रत्यक्षरूपेण दृष्टम्, अतएव आयुर्वेदस्य उक्तिः यत् सत्यमित्यस्मिन् विषये कस्यापि कोऽपि सन्देहो नास्ति । अपि च विषवैद्याः सर्पविषात् शान्तिकामनाय येषां मन्त्राणां प्रयोगं कृतवन्तः, तेषां फलमपि सर्वजनैः प्रत्यक्षीकृतम् । अतएव अमीषां मन्त्राणां सत्यताविषये कस्यापि कोऽपि विवादः सन्देहश्च नास्ति । आयुर्वेदोऽथर्ववेदस्यैवोपाङ्गम् । विषनिवृत्तेर्मन्त्रा वेदस्यैवांशविशेषाः । वेदस्यामी अंशविशेषा इति अमुष्यांशस्य सत्यत्वमिति

गृह्यते, तर्हि मन्त्रस्य आयुर्वेदस्य च दृष्टान्तेन वचनमेतद् वक्तव्यं यत्– वेदस्य अमीषामंशानां सत्यमिव अदृष्टार्थं स्वर्गादिसाधकः वेदभागोऽपि सत्यम् । दृष्टफलो मन्त्र आयुर्वेदश्च यथा तत्त्वज्ञस्य महापुरुषस्योक्तिस्तथैव अदृष्टार्थो वेदभागोऽपि । येन दृष्टफलो वेदो रचितः अदृष्टार्थो वेदोऽपि तेनैव रचितः । सत्यदर्शिना महापुरुषेण विरचितस्य वेदस्य कश्चनांशः सत्यः काचित् मिथ्या इति सिद्धान्तो न सङ्गच्छते, वरञ्च महापुरुषस्य वाणीति समग्रो वेदः सत्यः इति साम्प्रतम् ।[३] अतएव महर्षिणा गौतमेन वेदस्य प्रामाण्यपरीक्षायाम् आप्तस्य महापुरुषस्योक्तिरेव आप्तप्रामाण्यादिति निर्द्दिष्टम् । आप्तवाक्यत्वात् मन्त्रो आयुर्वेदश्च सत्यः । अतएव आप्तवाक्यत्वात् आप्तप्रामाण्यात् वेदोऽपि सत्यः । वेदस्य रचयिता आप्तं विना अपरः कश्चन नास्ति । सर्वज्ञं सर्वदर्शिनं परमेश्वरं व्यतिरिच्य अन्येन केनचित् अनन्तो ज्ञानभाण्डागारो वेदो रचयितुं न समर्थः । महर्षेर्गौतमस्य मतमेतद् वाचस्पतिमिश्र उदयनाचार्य्यो गङ्गेशोपाध्यायः जयन्तभट्टश्चेति सर्वैः न्यायाचार्यैः समर्थितम् ।

ननु कथं तर्हि निराकारेण परमेश्वरेण वेदो रचितः ? अपि च एक एव परमेश्वरो वेदस्य कर्तेति अनुक्त्वा बहवः आप्ताः वेदस्य द्रष्टारो वक्तारश्च इत्युक्तेः कोऽभिप्रायः ? उच्यते तावत् सर्वे एव आप्ताः महापुरुषाः परमेश्वरस्य विभिन्ना अवताराः । जगतः कल्याणाय लोकशिक्षार्थं धर्मरक्षार्थञ्च भगवान् विभिन्नमाप्तशरीरं परिगृह्य पृथिवीमवतरति । सर्वाण्येव तत्त्वशास्त्राणि परमेश्वरस्य वचनानि । सर्वे एव शास्त्रकाराः परमेश्वरस्य मूर्त्तविग्रहाः । अनया दृष्ट्या बुद्धोऽर्हन् प्रभृतयः सर्वे शास्त्रकारा अपि परमेश्वरस्यैव अवताराः । तत्रभवतां वचनान्यपि परमेश्वरस्यैव वचनानि । महानैयायिकेन जयन्तभट्टेन तदीयायां न्यायमञ्जर्य्यां ग्रन्थे एव परमेश्वरस्य आस्तिकमतस्य परिचयः प्रदत्तः । तत्रभवता उक्तम्— कपिलो बुद्धोऽर्हन् इत्येतेषाम् आप्तानां प्रणीतं शास्त्रमपि आगमतुल्यम्, तेषां शास्त्राणां प्रामाण्यमपि युक्तिसिद्धम् । ईश्वरः हि सर्वेषाम् आगमशास्त्राणां रचयिता । तत्रभवान् प्राणिनां विविधं कर्म्म कर्म्मफलञ्च प्रत्यक्ष्य प्राणिनः प्रति कृपया अमीषां कर्म्म चिन्तनं योग्यता इत्येतेषाम् अनुरूपस्य विविधस्य मुक्तिमार्गस्य सन्धानं दातुं स्वकीयेन ऐशीविभूतिबलेन नानाविधं शरीरं परिगृह्य बुद्धोऽर्हत्, कपिलः इति विविधाभिधाभिः धरातले अवतरति । जयन्तभट्टस्य अनेन उदारेण दर्शनेन विचारे कृते बुद्धोऽर्हत्

३ मन्त्रायुर्व्वेदवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् । [न्यायसूत्रम् २.१.६८]

प्रभृतीन् ईश्वरावतारान् प्रति नास्तिकाः इति निन्दाकीर्त्तनं न सङ्गच्छते ।

## वेदप्रामाण्यविषये वेदान्तमतम्

नैयायिकवैशेषिकयोः मतं विमृश्य दृश्यते यत्— तेषां मते ईश्वरेण रचितो वेदो नित्यस्यैशिनः प्रज्ञानस्य विकाशः परमेश्वरस्य च वागित्येव वेदः प्रमाणम् । आचार्य्यस्य शङ्करस्य मतानुसारेणापि परमेश्वर एव वेदस्य रचयिता । सर्व्वज्ञानाकरं वेदं विरचय्यैव भगवतः सर्वज्ञता सर्वशक्तिमत्ता च परिस्फुटिता भवति । भगवान् एव ब्रह्मयोनिः । वेद उपनिषत् प्रभृतीनि सर्वाण्येव शास्त्राणि तत्रभवतः परमेश्वरस्य निश्वासः । अस्माकं श्वासः प्रश्वासश्च यथा अनायासेन प्रवहतः तथैव सृष्टेरुषायां परमेश्वरस्य हृदयाभ्यन्तरात् सावलीलाक्रमेण वेदः प्रवहति उद्भवति च । वेदरचनायां भगवतः कोऽपि प्रयासो नास्ति, एते ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्च महापुरुषस्यैव निश्वासः इति श्रुतौ स्पष्टमेव प्रदर्शितम् ।[४] पुरुषोत्तम एव वेदस्य रचयितेति यदि श्रुतेः सिद्धान्तो भवति कथं तर्हि वेदोऽपौरुषेयः कथ्यते ? उच्यते तावत्— साधारणेन पुरुषेण विरचिते ग्रन्थे पूर्णा स्वाधीनता वर्त्तते, अत्र च ग्रन्थकर्त्तुः स्वेच्छानुसारेण भावस्य भाषायाश्च परिवर्त्तनमपि सम्भाव्यते । लेखकस्य दोषो गुणो व्यक्तित्वञ्च रचनायां परिस्फुटति, ग्रन्थे पठिते सति ग्रन्थकारेण सह पाठकस्य परिचयः सम्भवति । अतएव एतादृशो ग्रन्थः पौरुषेयः पुरुषकृतो वा कथ्यते इति वेदान्तिभिरुक्तम् । वेदस्तु साधारणो ग्रन्थजातीयो नास्ति । वेदं रचयितुं भगवतः काऽपि स्वाधीनता नास्ति । वेदमन्त्रस्य एकमपि अक्षरम् एकस्याः दिशः अन्यस्यां दिशि परिवर्त्तयितुमभिप्रायोऽपि तत्रभगवतो नास्ति । कल्पकल्पान्तरे भगवता एतादृशो वेदो विरचय्य हिरण्यगर्भादिभ्यः समर्पितः । सर्व्वज्ञस्य सर्वशक्तिमतः भगवतः वेदरचनायां सर्व्वविधा स्वाधीनता अस्वीकृता, यतः पुरुषोत्तमस्य मानसादुत्सात् एक एव वेदप्रवाह एकस्मिन्नेव छन्दसि जगतो नानासृष्टेर्ध्वंसलीलायाः मध्येऽपि अबाधितगतौ प्रधावितवान् अनन्तकालञ्च परिव्याप्य प्रधाविष्यति । ननु वैदिकसम्प्रदायस्य अनुच्छेद एव अस्माकं काम्यः, अत्र येन सर्वज्ञेन वेदः

---

४ देवर्षयो हि महापरिश्रमेणापि यत्राशक्तस्तदयमीषत्प्रयत्नेन लीलयैव करोतीति निरतिशयमस्य सर्वज्ञत्वं सर्वशक्तित्वं चोक्तं भवति । अप्रयत्नेनास्य वेदकर्तृत्वे श्रुतिरुक्ता— “अस्य महतो भूतस्य” [बृहदारण्यकोपनिषत् २.४.१०] इति । [भामती १.१.४]

रचयितुं शक्यते तेन वेदस्य एकोऽपि वर्णः परिवर्त्तयितुं न शक्यते इत्यस्य कोऽर्थः? उच्यते तावद्— वेदस्तु चिन्मयस्य भगवतः शब्दमयो विग्रहः। एतत् शब्दशरीरं सर्व्वदा अपरिवर्त्तनशीलम्, सृष्टेः प्रलयस्य च नानावर्त्तनेन विवर्त्तनेनापि अस्य शब्दमयस्य वेदस्यापरिवर्त्तनीयस्य रूपस्य किमपि परिवर्त्तनं न सम्भाव्यते। भगवतो नित्यत्वं अपरिवर्त्तनीयतां च बोधयितुमेव वेदरचनायां परमेश्वरः स्वाधीनोऽस्वतन्त्रो वा नास्तीति उच्यते।[५] पुरुषोत्तमः परमेश्वरो वेदस्य रचयिता सन्नपि स्वकीयायाः रचनायाः परिवर्त्तनाय परिवर्द्धनाय च स्वेच्छाधीनो न भवतीत्येव परमपुरुषेण रचितो वेदोऽपौरुषेयः कथ्यते। पुरुषस्य स्वाधीनताभावः यत्र स एव अपौरुषेयः। अस्मिन्नर्थे एव मीमांसकैरपि वेदोऽपौरुषेयोऽभिधीयते।[६]

**वेदप्रामाण्ये मीमांसकानां मतम्**

अक्षरस्य नित्यत्वाद् वेदोऽपि नित्यः, तस्य च वेदस्य कोऽपि कर्त्ता नास्ति। वेदो नित्य-सत्य-सनातनः। वैदिका ऋषयो वेदस्य द्रष्टारो वक्तारोऽध्येतारश्च। कठस्य कलापादेश्च ऋषीणां नामानुसारेण या विभिन्ना वैदिकशाखा विद्यन्ते तासां सर्वासां शाखानां रचयितारो न तु तेऽभिहिता ऋषयः, तत्रभवन्त ऋषयः केवलं तस्य वेदांशस्य द्रष्टारोऽध्येतारश्च, यैर्विशेषेण तं वेदांशमधिगम्य स्वीयाय शिष्याय समुपदिष्टः। फलतः तत्रभवतामृषीणां नामानुसारेणैव तद्वेदांशः प्रसिद्ध्यति। अमी मन्त्रद्रष्टारो मन्त्रव्याख्यातार ऋषयो गुरुशिष्यपरम्परानुक्रमेण यादृशं वेदं प्राप्नुवन्तः शिष्यान् च पाठितवन्तः तादृशमेवोपदिष्टवन्तः। एकस्य मन्त्रस्यापि अक्षरं परिवर्त्तयितुं ते न शक्ताः। अस्मात् कारणादेव मीमांसाकैर्वेदोऽपौरुषेय उच्यते। न्याय-वैशेषिक-वेदान्तानां मते तु वेदोऽकर्त्तृको नास्ति परमेश्वर एव वेदस्य कर्त्ता। शब्दस्य अनित्यत्वात् वेदो नित्यो भवितुं नार्हति, अतो वेदोऽपि अनित्यः। ईश्वरस्य तु वेदज्ञाननित्यत्वात् वेदं नित्यं व्याचक्षते। अथवा वागिन्द्रियजः शब्दमयो वेदः कथं नित्यो भवितुं शक्यते? उच्यते

५ वैयासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतीतिहासादिसिद्ध-सृष्टिप्रलयानुसारेण अनाद्यविद्योपधानलब्ध-सर्वशक्तिज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि न तेषु स्वातन्त्र्यम्, पूर्वपूर्वसर्गानुसारेण तादृशतादृशानुपूर्वीविरचनात्। [भामती १.१.४]

६ पुरुषास्वातन्त्र्यमात्रेण चापौरुषेयत्वं जैमिनये रुच्यते अपि।

तावन्मीमांसाचार्य्यैर्वैदिकसम्प्रदायानामुच्छेदः कदापि न सम्भाव्यते सृष्टेः प्रलयस्य च अनङ्गीकरणादेव । गुरुशिष्यपरम्पराक्रमेण वेदाध्ययनं तत्रभवद्भिः अनादि अविच्छिन्नञ्च अभिधीयते । वेदप्रवाहोऽनादिहेतोः निरवच्छिन्नत्वाच्चैव नित्यः । वेदस्य एतादृशी प्रवाहनित्यता न्याय-वैशेषिक-सांख्य-वेदान्तिभिः दार्शनिकैः नाङ्गीकृता, यतः ते सर्वे एव सृष्टिं प्रलयञ्च स्वीकुर्वन्ति । सृष्टौ प्रलये चाङ्गीकृतयोः सत्योः महाप्रलयाद् वेदो विलुप्ततां यास्यति, परं तु सृष्टेः प्राक् पुनश्च भगवता वेद उपदिश्यते । अस्मिन् क्षेत्रे वेदस्यानादिकालात् प्रवाहनित्यताया व्याख्यानं न सङ्गच्छते । वेदान्तिकैर्मीमांसकैश्च वेदोऽपौरुषेय इति व्याख्याते सत्यपि नैयायिकैः वैशेषिकैश्च वेदोऽपौरुषेय इति नाङ्गीक्रियते । तयोर्मते वाक्यमात्रमेव पौरुषेयं पुरुषेण विरचितञ्च । वेदवाक्यस्यापि वाक्यत्वात् तत्तु पौरुषेयमेव, कथं तर्हि अपौरुषेयं भवेत्? अत्र तु लक्ष्यते यत्— वाक्यमात्रमेव केनापि पुरुषेण विरचिते सत्यपि प्रत्येकस्मिन् कल्पे एकप्रकारकस्य वेदस्य विरचितत्वात् एकोऽपि वर्णो न परिवर्त्तते तदा यथार्थमेतदेव रचनायाः स्वाधीनो गतिवेगो यत्र प्रतिहतो यस्याञ्च रचनायां किमपि स्वातन्त्र्यं नास्ति तादृश्यां रचनायां पुरुषविरचितायां सत्यामपि वस्तुतस्तु सा तु अपौरुषेय एव । वेदान्तिनां मीमांसकानाञ्च मतानुसारेण अनया रीत्या विचारे कृते नैयायिकानां वैशेषिकानाञ्च मतेऽपि वेदोऽपौरुषेय इति सिद्ध्यति ।

**वेदप्रामाण्ये सांख्यपातञ्जलदर्शनयोः मतम्**

सांख्यदर्शनेऽपि वेदोऽमुष्मिन् पक्षे एव अपौरुषेयः कथ्यते । यत्र लेखकेन स्वाधीनायाः रचनाया अबाधो गतिर्वर्त्तते स एव पौरुषेयः, पुरुषेण उच्चारिते सत्येव स पौरुषेयो न पुरुषस्य स्वकीयेन मनीषाबलेन विरचिते सत्येव स पौरुषेयो भवति । स्वयम्भूर्वेदम् उच्चारयति, परकल्पेऽपि सैव वेदवाणी उच्चारिता । अत्र तु आदिपुरुषस्य स्वयम्भुवः हिरण्यगर्भस्य कोऽपि बुद्धिप्रभावो नास्ति । हिरण्यगर्भो वेदप्रकाशस्य केवल एको यन्त्रविशेषः । श्वासः प्रश्वासश्च यथैव अस्माकं प्रयासं विनैव अनयासेन स्वच्छन्दसा बहिर्भवति तथैव स्वच्छन्दसा सावलीलगतौ च वेदप्रवाहोऽनायासेनैव स्वयम्भुवो मुखविवराद् उच्चारितः प्रकाशितश्च भवतः । अतः स्वयम्भुवा

उच्चारितो वेदोऽपौरुषेय इति आख्यातुं काऽपि बाधा नास्ति ।[७]

सांख्यदर्शनमते तु वेदोऽनित्यः । सांख्याचार्य्यैरुक्तं यत्— वेदेषु वेदस्यैव उत्पत्तिर्वर्णिता, अतः कथं वेदो नित्यं भवेत्? स्वयम्भुवो मुखाद् निःसृता वेदप्रवाहोऽबाधोऽविच्छन्नश्च । शब्दमयस्य वेदस्य कस्मिंश्चित् काले किमपि परिवर्त्तनं परिवर्धनञ्च न भवतः न च भविष्यतः । अस्मिन्नेवार्थे वेदो नित्यमिति अभिधीयते ।[८] वेदादेव विज्ञानमयपुरुषस्य स्वरूपं विज्ञायते । असौ वेदप्रतिपाद्यः चिन्मयः पुरुषो नित्यः शब्दमयस्य वेदस्य नित्यत्वादपि । तदर्थं वेदो नित्यमिति वचने कापि बाधा न सञ्जायते । सांख्यदर्शनस्य मते ईश्वरो वेदस्य कर्त्ता भवितुं नार्हति यतः महर्षिणा कपिलेन ग्रथिते सांख्यदर्शने ईश्वरो न स्वीक्रियते । आदिपुरुषस्तु हिरण्यगर्भ एव वेदस्य द्रष्टा वक्ता प्रकाशकश्च । पातञ्जलदर्शने तु ईश्वरोऽङ्गीक्रियते मीमांस्यते च, तन्मते ईश्वर एव वेदयोनिः । ईश्वरस्वरूपं ज्ञातुमपि वेदस्य शरणापन्नो भवितव्यः । अत ईश्वरेण सह वेदस्य सम्बन्धोऽनादिः । ईश्वरो न तु कालेन परिच्छिन्नः, स कालातीतः, तस्य ज्ञानं शक्तिश्च अनन्तम् । तत्रभवान् ब्रह्मादीनां देवानां गुरुः, ब्रह्मादिदेवगणस्य हृदि मन्दिरे तत्रभवता ईश्वरेणैव वेदज्ञानदीपः प्रज्वालितः ।

पातञ्जलदर्शनस्य मतेऽन्तर्य्यामिन ईश्वरस्य ज्ञानं नित्यं वेदश्च तस्य नित्यज्ञानस्यैव विकाशः । अतो वेदोऽपि नित्योऽपौरुषेयश्च । वेदः प्रमाणं भवितुमर्हति न वेत्यस्य प्रश्नस्य विचारं कर्त्तुकामेन मया षड्दर्शनस्य मतमपि आलोचितम् । वैदिकज्ञानस्य नित्यसत्यताविषये कस्यापि आस्तिकदर्शनस्य विवादो नास्ति । परब्रह्मभूतो वेद एव आस्तिकगणस्य आस्तिक्यस्य मूलम् । दर्शनस्य आलोकसम्पाते वैदिकज्ञानस्य वक्रमार्गः सुगमो भवति । वेदेन सह दर्शनशास्त्रम् अङ्गाङ्गिभावेन सम्बद्धम् । वेदः प्राणाः दर्शनन्तु शरीरम् । प्राणान् विहाय शरीरं यथासारं तथैव वैदिकीं भित्तिं विना दर्शनशास्त्रं केवलं निरर्थकम् । पक्षान्तरेण यथा शरीरम् अङ्गं प्रत्यङ्गादि विना प्राणाः निष्क्रियाः तथा दार्शनिकतर्कस्य स्नेहधारां विना वेदज्ञानप्रदीपोऽपि निष्प्रभः ।

---

[७] न पुरुषोच्चारिततामात्रेण पौरुषेयत्वं किन्तु बुद्धिपूर्व्वकत्वेन । वेदाः स्वनिःश्वासवदेव अदृष्टवशादबुद्धिपूर्व्वकाः स्वयम्भुवः सकाशात् स्वयं भवन्ति । अतो न पौरुषेयाः । [सांख्यप्रवचनभाष्यम् ५.५०]

[८] वेदनित्यतावाक्यानि च सजातीयानुपूर्व्वी— प्रवाहानुच्छेदरूपाणि । [सांख्यप्रवचनभाष्यम् ५.४५]

दर्शनरूपचक्षुषा नित्यं चिन्मयं वेदपुरुषं द्रष्टुकामस्य जीवनं मधुमयं भवति ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ॥

[मुण्डकोपनिषद् २.२८]

✶ ✶ ✶

## Bibliography


1. *तत्त्वसंग्रहः* ; शान्तरक्षितः ; कृष्णमाचार्य्यः (सम्पादकः) ; वरोदा ; १९२६ ।
2. *न्यायदर्शनम् (वात्सायनभाष्यम्)*; गङ्गानाथझा (सम्पादकः) ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; १९२५ ।
3. *न्यायमञ्जरी*; जयन्तभट्टः ; सूर्यनारायणशुक्लः (सम्पादकः) ; वाराणसी ; १९३४ ।
4. *न्यायवार्त्तिकम्*; उद्योत्करः ; वि.पि.द्विवेदी (सम्पादकः) ; वाराणसी ; १९१५ ।
5. *प्रशस्तपादभाष्यम् (न्यायकन्दली)*; दण्डिस्वामीदामोदर ; दामोदर आश्रम ; २००० ।
6. *ब्रह्मसूत्रशाङ्करभाष्यम्*; कृष्णद्वैपायनः ; चिद्घनानन्दपुरी वेदान्तवागीश (सम्पादकः) ; आनन्द झा ; उद्बोधन कार्यालय ; कोलकाता ; १९८० ; द्वितीयसंस्करणम् ।
7. *वात्सायनभाष्यम्*; फणिभूषणतर्कवागीशः ; बङ्गीयसाहित्यपरिषत् ; १३३२ बङ्गाब्दः ।
8. *वेदान्तदर्शन (अद्वैतवाद)*; आशुतोषभट्टाचार्य्यशास्त्री (सम्पादकः) ; कलिकाता विश्वविद्यालय ; १९४९ ।
9. *षड्दर्शनसमुच्चयः* ; हरिभद्रसूरिः ; लुईगि सान्लि ; एशियाटिक् सोसाइटि ; कोलकाता ; १९०५ ।


✳ ✳ ✳

# अग्निपुराणे अनुजीविचरितेन स्फुटः प्रतिष्ठानधर्मः

**डॉ. अभिषेकघोषः** *


## Abstract

[अनुजीविपदेन अनुगमनेन जीवनधारणं सूच्यते । अनुजीविनः भृत्याः पराधीनाश्च । ते वर्तनेन प्रभोः कर्माणि साधयन्ति । अनुजीवी कमनुसृत्य याति? राजानं स्वामिनं वा । प्राचीनेषु राष्ट्रेषु आधुनिके चापि उच्चवर्गीयाः निम्नवर्गीयाश्च अनुजीविनः राष्ट्रकर्माणि प्रतिष्ठानधर्मानुगुणं सम्पादयन्ति । प्रतिष्ठानस्य योगक्षेमसाधनं अनुजीविगणैरेव बहुधा क्रियते । अतः राष्ट्रकर्मसु प्रतिष्ठानधर्मेषु च अनुजीविनः माहात्म्यं स्वीकरणीयम् । परन्तु भवेत् अधस्तनाः ऊर्ध्वतनाः वेति, अनुजीविषु केचिद्गुणाः सर्वथा अभीष्टाः यैश्च गुणैः प्रतिष्ठानधर्मानुगुणमविरोधेन कर्तव्यानां सम्पादनं शोभनं, यतः ते भृत्याः एव । अपि च धृतिमतिमानादिभिः उद्योगाभयसामर्थ्यभक्त्यादिभिश्च गुणैः ऋद्धाः जनाः एव अनुजीविपदं सार्थकं करोति । प्रतिष्ठानधर्मेषु नायकानां गाथा बाहुल्येन श्रूयते । परन्तु येषां आनुगत्येन सामर्थ्येन च प्रतिष्ठानस्य सिद्धिर्भवति ते अनुजीविनः अपि अंशभाजः इत्यपि सत्यम् । आलोच्यमाने निबन्धे अग्निपुराणानुसारं प्रतिष्ठानधर्मसाधनेन अनुजीविचरितानां उद्घाटनं भाव्यमित्याशयः । ]


**कुञ्चिकाशब्दाः** — अग्निपुराणम्, अनुजीविचरितम्, प्रतिष्ठानधर्मः, सूर्यदेवः, अग्निः ।

## भूमिका

राजनीतिशास्त्रेषु प्राचीनभारतभूमौ राजतन्त्रस्वरूपं दृश्यते । कौटिलीये अर्थशास्त्रे विजीगिषुः राजा कथं आत्मरक्षणं राज्यरक्षणं च कुर्यादित्याशयः वर्णितः । राष्ट्राणां शासने पालने च राजा अमात्यसचिवादिभिः दूतचरादिभिश्च चक्षुष्मान् भवेदिति शास्त्रेषु प्रतिपादितम् । परन्तु राजकर्मसु विविधा वृत्तयः सन्ति । बहुभिश्च कर्मचारिभिः सम्पाद्यन्ते राजकार्यादयः । राष्ट्रस्य कृते राज्ञा सम्पाद्यमानानि कर्तव्यानि राज्ञा नियोजितैः वर्तनभोगिभिः परिपाल्यते । अपि च, राजसेवा राजरक्षा च तैः यथा कर्तव्यं तथैव राजाज्ञायाश्च यथायथमेव परिपालनं राजकर्मजीविभिः क्रियते । राजकर्मणां सम्पादनं येषु न्यस्तं ते न स्वाधीनाः । शस्त्रैः आदेशभूतान् नियमान् अनुसृत्य

* सहायकाध्यापकः, वागनान-संस्कृत-महाविद्यालयस्य संस्कृतविभागे, पश्चिमवङ्गेषु, Email : ghosh.abhishek.abhishek@gmail.com

तैः यथाविधि स्वकर्तव्यानि अनुष्ठीयन्ते। नियमानां लङ्घनं तेषां कृते दोषावहं भवेदिति स्थितिः। पुनश्च, राजनिर्देशानां अनतिक्रमणं तेषां कर्तव्यम्, अविचला च राजभक्तिः तैः प्रदर्शनीया। यथाविधि च स्वामिना आदिष्टानाम् उपदेशानां निर्देशानां वा आदेशानां वा अलङ्घितम् अनुष्ठानं तेषां कर्तव्यरूपेण स्थिरीकृतम्। राजानुगमनमपि तेषां कर्तव्यरूपेण आभासते। राजसन्तोषेण तेषाम् अभ्युत्थानं भवति, राजरोषेण विनाशश्च यथा राजाग्निभिः सपशुद्रव्यसञ्चयेन जीवनं ध्वस्तं भवेदिति मानवधर्मसंहिता।[१]

**विषयप्रवेशः**

प्रतिष्ठानस्य स्थितिः तत्र संश्लिष्टानां कर्मिणां साफल्येन अन्विता। प्रतिष्ठानस्य धारणपालनादिभिः आचरणीयः यः धर्मः सः एव प्रातिष्ठानिकेन मैत्रीबन्धनेन परिपाल्यते प्रातिष्ठानिकः च नियमः यथाविधि रक्षितः भवति। उच्यते च—

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।
तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत्॥

[मनुसंहिता ८.१]

अतः प्राचीने प्रतिष्ठाने आधुनिके चापि यथायथमेव प्रतिष्ठानस्य धर्मपालनं तस्य स्थितये महत्वपूर्णमिति मन्यते। प्रतिष्ठाने यः नियमस्य कर्ता रक्षकः वा स भवेत् राजा प्रभुः वा, इदानीन्तने काले भवेद्वा स प्रतिष्ठानस्य कर्णधारः चालकः वा। प्रतिष्ठानस्य कर्ता नियमान् प्रयोजयति आदेशेन दण्डेन वा। परन्तु प्रतिष्ठानस्य साफल्यं प्रातिष्ठानिकैः जनैः नियमस्य परिपालनेन जायते। अतः अनुजीविनां आचरणविधिः तेषाञ्च चरितं ज्ञातव्यम्।[२]

राजकीयैः कर्तव्यैः वेतनमानादिभिः राजकर्मजीविनः यथा सम्पन्नाः भवति तथैव कर्मसम्पादनस्य भारादिभिः तेषां स्वातन्त्र्यं नास्तीति प्राचीनराष्ट्रे यथा सत्यं तथैव आधुनिके काले। ये च राजकर्मणि नियोजिताः ते भृत्याः, यतः भृतिना तेषां पालनम्। ते च अनुजीविनः यथा प्रभुमनुसृत्य तस्य आनुकूल्येन जीवनं यापयति अनु पश्चात् वा गच्छति अनुगमनं वा करोतीति।

---

१ एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्।
कुलं दहतिराजाऽग्निःसपशुद्रव्यसञ्चयम्॥ [मनुसंहिता ७.९]

२ अग्निपुराणम्, अध्यायः २२१

अतः ते सेवकाः दासाः वा आज्ञाकराश्च । प्राचीनसाहित्येषु तेषां स्थितिः दृश्यते । अभिज्ञानशाकुन्तले धीवरवृत्तान्ते राजानुजीविनां चित्रणं सुविदितं यत्र अधीनस्थानाम् अनुजीविनां मनोभावादयः नैपुण्येन चित्रितमासीत् ।[३] मृच्छकटिके प्रकरणे अनुजीविनां परिचयः प्राप्यते ।[४] साम्बपुराणे अपि राजरूपेण स्थितस्य सूर्यदेवस्य परिकरत्वेन वर्तमानेषु देवेषु रुद्ररूपस्य दिण्डेः दण्डिणः वा माहात्म्यं सूच्यते ।[५] एतदेव उल्लेख्यं यत् राज्ञा यथा अनुजीविनां नियोजनं भाव्यं तथैव सम्पन्नैः जनैरपि । प्राचीनसाहित्येषु राजकीयं जीवनं कर्तव्याकर्तव्यादिकं सुखदुःखादिकं च यथा मण्डितम् अनुजीविनां न तथैव । आलोच्यमाने निबन्धे अग्निपुराणे प्रतिपादितम् अनुजीविचरितमवलम्ब्य तेषां जीवनचित्रं यथा उपलभ्यते तदेव उपस्थापितम् ।

कथं अग्निपुराणमेव अवलम्बितमिति विशदीकर्तव्यम् । पुराणसाहित्यानाम् आशयः प्राचीनसम्बन्धिनां विषयाणां नवरूपेण उपस्थापनम् । तस्मात् ऐतिह्यनामानुसरणं समकालस्य च । समकालवर्तिनां संवृत्तानाम् अन्तर्भावः कालेषु पुराणकथासु भूयते । तथैव पुराणानि मानवैः इष्टानां विषयाणां संकलनमेव । तत्र साहित्यगुणम् अस्ति नास्ति वेति स्वातन्त्र्येण विचार्यम् । परन्तु पुराणेषु युगमानसं प्रत्यक्षतया परोक्षतया वा प्राचीनसमाजचित्रं च वर्तन्ते । एषु पुराणेषु साङ्गीकृतानां विषयाणां बाहुल्यं वैविध्यमेव मुख्यतया लक्ष्यीभूतम् । अतः पुराणानि कोशतुल्यानि अग्निपुराणञ्च तेषु विश्वकोशरूपम् । अग्निपुराणे विविधेषु विषयेषु अनुजीविचरितम् अन्यतमम् । आग्नेये महापुराणे एकविंशत्यधिकद्विशततमे अध्याये अनुजीविनां कर्तव्याकर्तव्यानां समासेन उपस्थापनात् ज्ञायते उपलभ्यते च यत् शिल्पगणितायुर्वेदालङ्कारादीनां शास्त्राणां विवृतिः यथा सामाजिकैः मानवैः ज्ञातव्या सृजन-भूलोकदेवतादीनां वा वार्ता यथा मानवचित्तैः अभीष्टा आकाङ्क्षिता वा इति पुराणकृद्भिः विशेषतया प्रतिपादितं तथैव अनुजीविनां कथानां परिवेशनमपि समतुल्यं पुराणकारैः च अभिप्रेतम् ।

३ अभिज्ञानशाकुन्तलम्, अङ्कः ६

४ मृच्छकटिके विटवर्धमानकसंवाहककर्णपूरककुम्भीलकादीनां भृत्यानां यथोल्लेखः तथैव रदनिकामदनिकयोः तथैव च वीरकचन्दनकादीनां राजपुरुषाणामुल्लेखः वर्तते । तत्र राष्ट्रविप्लवे समाजविप्लवे च राष्ट्रस्य चक्रान्तिकाले राजोपजीविनां वर्तनभोगिनां च भृत्यानां परिचयः विशेषतया अवधेयः ।

५ साम्बपुराणे षोडशे अध्याये सूर्यस्य परिकरवर्णनम् ।

अग्निपुराणम् अग्निना प्रोक्तं तामसपुराणमिति विदितम् । पुराणस्यास्य वर्तमाने रूपे प्रक्षेपबाहुल्यात् प्राचीनार्वाचीनादीनां अंशानां निर्णयः दुष्करः इति मतम् । अतः आलोच्यमानस्य अध्यायस्य सृजनकालः प्रच्छन्नः । तथापि इदानीन्तने काले यदग्निपुराणं प्राप्यते तत् प्राचीनयुगस्य अन्तिमे काले आदिमध्ययुगस्य प्रारम्भिके काले सङ्कलितमिति अनुमीयते ।

भारतभूमौ कालेषु विविधा राजशासनव्यवस्था प्रतिष्ठिता सफला च जाता । औपनिवेशिके काले आङ्गलशासकैः तदनुगतानां अनुजीविनां नियोगः दृश्यते । अनुजीविषु कर्मभेदेन श्रेणिभेदाः दृश्यन्ते, परन्तु आनुगत्यं आनुकूल्यञ्च अनुजीविषु इष्येते । कर्मणि अभिनिवेशः तत्पराणाम् अनुजीविनां लक्षणेषु अन्यतमम् । अतः सर्वथा नियन्त्रणं स्वीकृत्य अविरोधेन कायमनोवाक्येन कर्मसम्पादनं तेषां लक्ष्यीभूतम् । राजकर्मसु नियोगः बाहुल्येन वंशपरम्पराक्रमेण संश्लिष्टः आसीत् । कौटिलीये अर्थशास्त्रे दूत-चर-मन्त्रि-अमात्य-सचिवादीनां ये ये राजोपजीविनाम् उल्लेखः वर्तते तेषां नियोग-प्रेषणादिषु लक्षणबाहुल्यम् उपायवैविध्यं च वर्तेते ।

कौटिलीये अर्थशास्त्रे विनयाधिकारिके दूतचरामात्यादीनां परिचयः अध्यक्षप्रचारे च विविधानाम् अध्यक्षाणां परिचयः वर्तते । ते चापि वेतनादिभिः राजसेवकाः । अनुजीविनः राज्ञः सेवकः तत्सकाशमेव सदा तिष्ठन्ति इति क्षुद्रार्थमतिक्रम्य सर्वेषां राजोपजीविनाम् अनुजीवित्वेन ग्रहणात् राजकर्मणः पारतन्त्र्यं तेन कर्मणा च पालनीयः प्रतिष्ठानधर्मः साधु उपलभ्यते । अर्थशास्त्रे एव योगवृत्ते अनुजीविविवृत्तमुपन्यस्तम् । तत्रापि अनुजीविनां कृते यदुपदिश्यते तत् अग्निपुराणे विशदीकृतमिति मतम् । तस्मात् कौटिलीये अर्थशास्त्रे प्रतिपादितम् अनुजीविचरितम् उद्ध्रियते—

"आदिष्टः प्रदिष्टायां भूमावनुज्ञातः प्रविशेत् । उपविशेच्च पार्श्वतः संनिकृष्ट-विप्रकृष्टः पर आसनम् ॥

विगृह्य कथनम् असभ्यम् अप्रत्यक्षम् अश्रद्धेयम् अनृतं च वाक्यं उच्चै हासं वात-ष्ठीवने च शब्दवती न कुर्यात् ॥

मिथः कथनम् अन्येन । जन-वादे द्वन्द्व-कथनम् । राज्ञो वेषम् उद्धत-कुहकानां च । रत्न-अतिशय-प्रकाश-अभ्यर्थनम् । एक-अक्षि-ओष्ठ-निर्भोगं भ्रुकुटी-कर्म वाक्य-अवक्षेपणं च ब्रुवति । बलवत्संयुक्त-विरोधम् । स्त्रीभिः स्त्री-दर्शिभिः सामन्त-दूतैर्द्वेष्य-पक्ष-अवक्षिप्तानर्थ्यैश्च प्रतिसंसर्गम् एक-अर्थ-

चर्यां संघातं च वर्जयेत् ॥

अहीन-कालं राज-अर्थं स्व-अर्थं प्रिय-हितैः सह ।
पर-अर्थं देश-काले च ब्रूयाद्धर्म-अर्थ-संहितं ॥
पृष्टः प्रिय-हितं ब्रूयान्न ब्रूयादहितं प्रियं ।
अप्रियं वा हितं ब्रूयात्शृण्वतोअनुमतो मिथः ॥
तूष्णीं वा प्रतिवाक्ये स्याद्द्वेष्य-आदींश्च न वर्णयेत् ।
अप्रिया अपि दक्षाः स्युस्तद्-भावाद्ये बहिष्-कृताः ॥
अनर्थ्याश्च प्रिया दृष्टाश्चित्त-ज्ञान-अनुवर्तिनः ।
अभिहास्येष्वभिहसेद्घोर-हासांश्च वर्जयेत् ॥
परात्संक्रामयेद्घोरं न च घोरं परे वदेत् ।
तितिक्षेतऽत्मनश्चैव क्षमावान्पृथिवी-समः ॥
आत्म-रक्षा हि सततं पूर्वं कार्या विजानता ।
अग्नाविव हि संप्रोक्ता वृत्ती राजोपजीविनां ॥
एक-देशं दहेदग्निः शरीरं वा परं गतः ।
सपुत्र-दारं राजा तु घातयेदर्धयेत वा ॥”

एतस्मात् लक्षणीयं यत् अर्थशास्त्रस्य अनुजीविवृत्तम् अग्निपुराणकारैः अनुसृतम् तत्कालीनमनुजीविनां कृते । महतः कालस्य भेदादपि भावानाम् ऐक्यादनुमीयते यत् कालेषु अनुजीविनां जीवितेषु आचरणीयेषु कर्तव्येषु पुनः आन्तरिकं विवर्तनं न जातम् ।

राज्ञः अभ्युदये राज्यस्य च पालने शासने च तेषां अविसंवादिनी भूमिका वर्तमाना इत्यपि सत्यम् । राजा यदि कदापि भ्रष्टः भवेत् तदा राज्ञः बोधोदयार्थं अमात्यादयः सचेष्टाः भवेयुः इति कोटिल्यः । छायानालिकाप्रतोदेन प्रभोः जागरणं अभीष्टम् ।[६] वीरवरस्य कथायां वीरवरः उच्चवर्तनैः नियोजितः आसीत् ।[७] तस्य कर्मणि दायित्वबोधः अविसंवादी आसीत् । आसीत् प्रभुभक्तिः अविचला । जातककथासु बोधिसत्त्वः यदा यदा राजोपजीविरूपेण जातः आसीत् तदा तदा राजकर्मणि स सानुरागः कृतकार्यः चासीत् ।[८]

---

६ छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तामभितुदेयुः, कौटिलीये अर्थशास्त्रे विनयाधिकारिके इन्द्रियजये राजर्षिवृत्तम् ।

७ हितोपदेशे विग्रहनामधेये खण्डे वर्तते ।

८ जातकमालायां संवरजातकमिति नामधेया कथा ।

सामाजिकेषु अगण्येषु जनेषु पुराणानां महान् प्रभावः आसीत् । ये कृतविद्याः ये च न तादृशाः सर्वेषां कृते एव पुराणविद्या उपयोगिनी आसीत् । यतः पुराणानि समाजव्यापीनि आसन्, तस्मात् पुराणेषु अन्तर्भूता विद्या सर्वेषां कृते महती फलदायिनी भवेत् इत्याशयः । अतः अनुजीविनां कृते यानि तत्त्वानि अग्निपुराणे अन्तर्भुक्तानि, तानि न केवलम् उच्चवर्गीयानां सम्पन्नानां जनानां कृते, अपि च स्वल्पवित्तानां जनानामपि । यथा पुराणानि गणसाहित्यरूपाणि तस्मात् श्रेणीबहुले समाजे सर्वजनेषु पुराणानि सार्वत्रिकानि आसन् । तस्मात् तेषां प्रसारः । तादृशानां पुराणानां सार्वजनीनम् आवेदनम् अविसंवादि आसीदिति स्थितिः । अतः अनुजीविनां कृते यः उपदेशः पुराणेषु अन्तर्भूतः स सार्वजनीनरूपं परिगृह्णातीति मतम् । अतः तादृशाः अनुजीविनः पुराणकृद्भिः लक्ष्यीभूताः भवेयुः ये न च उच्चवर्गीयाणाम् अमात्यादयः परन्तु राज्ञः सेवकरूपेण वृत्तिधारणं कुर्वन्ति स्म ।

### निरीक्षणम्

अतः इदानीं अग्निपुराणदिशा अनुजीविचरितेषु प्रतिपादितानि तत्त्वानि समासेन निरीक्ष्यन्ते । अत्र प्रतिपादितानि तत्त्वानि इदानीन्तने काले अपि अनुजीविनां कृते अपि राष्ट्रस्य या आकाङ्क्षा तां प्रतिपादयति । अद्यतने काले प्रातिष्ठानिकः यः नियमः सर्वेषां कृते प्रयोज्यो भवति येन च नियमेन प्रतिष्ठानस्य आन्तरशक्तिः बलवत्तरा भवति सः नियमः अनुजीविचरितेन विहितः अत्र । आदर्शः आचरणविधिः (Model Code of Conduct) इत्याख्यः यः नियमः इदानीं प्रतिष्ठानस्य परिचालने प्रासङ्गिकः स नियमः प्राचीनभारतभूमौ राज्यशासनकर्मणि अपेक्षितः आसीदिति लक्ष्यते ।

भृत्याः शिष्यतुल्याः राज्ञः आज्ञावहाः भवेयुः । प्रभोः वचनं नातिक्रमणीयमिति । प्रत्यक्षेण राज्ञः वचनं अलङ्घनीयमिति । अनुकूलं प्रियवचनं सदैव प्रकाश्येन वक्तव्यमिति अग्निपुराणम् । परन्तु परोक्षेण अप्रकाश्येन वा अनुजीवी अप्रियं हितवाक्यं वदेदित्यपि । यदि ते उच्चवर्गीयाः अमात्यादयः तर्हि उन्मार्गगामिनं राजानं हितवचनेन सन्मार्गेन युनक्ति । यदि वा ते निम्नवर्गीयाः राजोपजीविनः भवन्ति तर्हि अप्रकाश्येन अप्रियं वाक्यं वदेयुः इति यथा सत्यं तथापि तद्वाक्यं प्रभोः अनिष्टकारकं न भवेत् इत्यपि सत्यम् । अनुजीवी कदापि प्रभोः वित्तहरणं न कुर्यात् न च प्रभोः अवमाननं कुर्यात् । राज्ञः वेशं न धारयेत् न च राजसुलभैः भाषावाचनादिभिः आत्मानम्

उपस्थापयेत् । अनुजीवी राजसंसर्गं राजसान्निध्यं परित्यजेत् । यतः स न राजवयस्यः अतः व्यवधानं सावधानं रक्षणीयम् । स सदैव राज्ञः गुह्यं सुगुप्तं रक्षयेत् । अतः प्रतिष्ठानस्य मन्त्रगुप्तिः यथाविधि करणीया । अनुजीवी कुशलः भवेत् निपुणः वा । कौशलप्रदर्शनेन प्रभोः सम्मानं विवर्धयेदित्याचरणम् आदर्शरूपेण स्वीक्रियते । स सदैव तत्परः उद्योगी च भवेत् । यदि अपरः जनः राज्ञा आदिष्टः भवेत्, तर्हि तत्कर्मणः सम्पादने स्वयमेव उद्योगी भवेदिति अग्निपुराणम् । अनेन नेतृत्वं (Leadership) आभासते इति मन्यते । प्रभोः अनुगमनं कर्मसु च उत्साहशक्तिः इति गुणद्वयेन अनुजीवी मण्डितः भवति । स न स्वाधीन इति सत्यम् । परन्तु राजकर्मणि शौर्यम् अपेक्षितम् । प्रत्युत्पन्नमतित्वमपि च तत्र उपयोगि । अतः राष्ट्रपरिचालने राज्ञो यादृशाः गुणाः इष्टाः तादृशाः गुणाः कर्मकराणामपि मात्राभेदेन अभीष्टाः यतः राष्ट्रकल्याणं प्रतिष्ठानस्य च रक्षणं सर्वैः इष्टम् । अत्र सामूहिकस्वार्थमेव बलवत्तरम् । राज्ञ साफल्यं मन्त्रशक्तिः प्रभुशक्तिः च उत्साहशक्तिः चेति शक्तित्रयेण अन्वितेति कौटिलीयम् अर्थशास्त्रम् [६.२.३३] । अतः कर्मणि उत्साहः न केवलं राज्ञः कर्तुः वा अङ्गिनः वा कृते प्रयोज्यः । ये च प्रतिष्ठानस्य अङ्गतुल्याः ते अपि तादृशाः उत्साहगुणान्विताः भवेयुः ।

अनुजीविनः राज्ञा दत्तं रत्नवस्त्रालङ्कारादिकं सदैव धारयेदिति अग्निपुराणम् । अनेन प्रतिष्ठानस्य कृते आनुकूल्यं स्पष्टं भवति कर्तुः च कृते आनुगत्यं दृश्यते । इदानीन्तने काले अपि प्रतिष्ठानस्य परिचयवाहकं वेशादिज्ञापकचिह्नस्य धारणेन अनुजीविनः सम्मानार्हं स्वातन्त्र्यं परिलक्ष्यते । कश्चित् अनुजीवी नादिष्टः सन् कुत्रापि न प्रवेशं कुर्यात् । अनेन कस्यचित् अनुजीविनः अधिकारः सीमायितः जातः । अनधिकारः प्रवेशः न समीचीनः । अयं प्रवेशः कक्षादिषु नैव केवलं, आत्मनि असंश्लिष्टेषु विषयेषु अपि प्रवेशः अनेन वारितः । अतः प्रतिष्ठानस्य स्थितिः रक्षिता भवेत् । कर्मिणां पारस्परिकं मतानैक्यं प्रतिष्ठानस्य कर्मणि व्याघातं सम्पादयति । तस्मात् प्रतिष्ठानस्य दौर्बल्यं जायते । तस्मात् सार्वत्रिकी हानिः । इदानीं संशयः जायते यत् नादिष्टः प्रवेशः यदि प्रतिषिद्धः भवेत् तर्हि कथम् अपरजनस्य कर्मणि कस्यचित् अनुजीविनः सानुरागः प्रवेशः उपदिश्यते? प्रथमः प्रवेशः प्रतिष्ठानस्य शृङ्खलां सूचयति इतरश्च कस्यचित् अनुजीविनः उद्योगं ज्ञापयति इति द्विविधैः प्रवेशैः प्रेषणप्रतिषेधाभ्यां प्रतिष्ठानस्य कर्मिणां च साफल्यरक्षणादिकं भाव्यमिति

मतम् । अपि च, एतदुच्यते यत्— "स्वगुणाख्यापने युक्त्या परानेव, परार्थे नियोजयेत् [२०१.८] इति अग्निपुराणम् । अतः आत्मनः गुणवर्णनया यौक्तिकं कारणं उपस्थाप्य परम् अनुजीविनं कस्मिंश्चित् कर्मणि नियोजयेत् । इत्यनेन कर्मणः दायः अपरस्मिन् न्यस्तः स्वयं च भारहीनः जायते इति मन्यते आपाततः । परन्तु एतत् सावधानं विचार्यम् । अनेन स्वगुणराशिभिः आत्मप्रतिष्ठायाः नास्ति अवसरः । यदि अनुजीविनः वैशिष्ट्यं प्रतिष्ठानस्य कृते हानिकरं भवेत् तर्हि तन्न फलात्मकम् । कश्चित् गुणोपेतः अनुजीवी यदि अपरं जनं कस्मिंश्चित् कर्मणि योग्यतररूपेण सूचयति तर्हि तत् पारस्परिकं श्रद्धाबोधं विवर्धयेदिति सत्यम् । पुनश्च, राज्ञा कर्मभारे अर्पिते सति स्वयं अग्रगामी भूत्वा अपरस्य अनुजीविनः दाक्षिण्यम् उपेक्ष्य स्वप्रयासेन तत्कर्मणः अनुष्ठानात् यो दृष्टान्तः प्रतिष्ठितः भवति स प्रतिष्ठानस्य कृते मङ्गलकर इति भावः । अत्र प्रतियोगस्य भावम् अपरस्य च अनिष्टचिन्तनं स्वीयं च स्वार्थचिन्तनम् उपेक्ष्य मैत्रीभावेन प्रतिष्ठानस्य कृते उद्योगः मूलभावत्वेन विचार्य्यः इति मतम् । यदि "परार्थे" इति पाठः विचार्यते तर्हि कश्चित् अनुजीवी आत्मगुणोपन्यासेन आत्मनः योग्यतां यौक्तिकरूपेण उपस्थाप्य परार्थे, न स्वार्थे, समष्टिकल्याणकर्मणि आत्मानं नियोजयेदिति भावः अपि वर्तते । अद्यतने काले प्रतिष्ठानेषु प्रतिष्ठानस्य कृते कीदृशं कर्तव्यम् अनुजीविना परिपाल्यते केन च उपायेन कश्चित् अनुजीवी प्रतिष्ठानस्य समृद्धये निरतः भवेदिति चर्चा जिज्ञासा च सुविदिते । अतः अग्निपुराणदिशा प्राचीनमानसमालोक्य वयं नितरां विस्मिताः समृद्धाश्च भवेम ।

राज्ञः कर्तुः समीपमेव कदापि अनभिप्रेते क्षेत्रे स्थले वा आसनग्रहणम् उपवेशनं वा प्रतिषिद्धम् । यथा आसनमेव (Designation) कर्मजीविनां प्रातिष्ठानिकं परिचयं विदधाति, अतः प्रभोः सकाशं अनुजीवी कदापि अयोग्यस्थाने न उपवेशनं कुर्यात् । अतः स्वस्थाने स्वपदानुकूले आसने उपवेशनं कुर्यात् । अनेन कर्मिणः प्रातिष्ठानिकं सम्मानं न क्षुण्णं जायते । अपि च, राज्ञः समीपं कासवातकोपभ्रूकुटिजृम्भणोद्गारनिष्ठीवनादीनि जैविककर्माणि न करणीयानि अशोभनत्वात् । अपि च उच्यते यत्—

"शाठ्यं लौल्यं सपैशुन्यं नास्तिक्यं क्षुद्रता तथा ।
चापल्यञ्च परित्याज्यं नित्यं राजानुजीविना ॥[१]"

[१] अग्निपुराणम् २२१.९

राजकर्मी न्यायनिष्ठः भवेदिति अपेक्षा। अतः शाठ्यं सर्वथा परित्याज्यम्। इत्थं प्रतिष्ठानस्य हानिः आत्मनः अपि च। अनुजीवी यदि चपलः भवेत् तर्हि कर्महानिः निश्चयेन भाव्या। यतः धीमता धृतिमता अनुजीविना एव प्रातिष्ठानिकं कर्म साधु सम्पाद्यते। क्षुद्रमानसेन स्वार्थपरत्वेन कर्मोद्योगः विफलः भवति। अतः अनौदार्यं प्रतिष्ठानस्य कृते न समीचीनम्। अपि च, लौल्यं लोभातुरमनसा प्रातिष्ठानिककर्मणि आत्मनियोगेन प्रतिष्ठानस्य स्वार्थहानिः अनुजीविनः नीतिहीनत्वात्। अवैदिकी राष्ट्रनीतिः ब्राह्मण्यधर्मानुसारिणः राष्ट्रस्य कृते न प्रयोज्या। अतः अनुजीवी नास्तिकः अविश्वासी न भवेदिति भावः। अपि च, पैशुन्येन यत् खलत्वं अवगम्यते तत् सर्वेषां कृते हानिकरमिति नास्ति संशयः। प्रतिष्ठानस्य हानिकरः अनुजीवी सर्वथा परित्यजनीयः इति भावः। अतः अनुजीवी उदारः सदाचारी च भवेदिति स्थितिः। एवम्विधः अनुजीवी "श्रुतेन विद्याशिल्पैश्च आत्मानं संयोज्य आत्मना" [२२१.९] राजसेवा कुर्यात् प्रातिष्ठानिकं वा कर्म सम्पादयेदिति भावः। इत्थं अनुजीविनः अभ्युदयात् साफल्यं अवश्यमेव भाव्यमिति भावः कर्मपरत्वात् गुणानां च यथाविधि उपन्यासेन। "भूतिवर्द्धनः" अनुजीवी भूतये हितकर्मणः अनुष्ठानात् स्वस्य च समृद्धये अपि यतमानः भवेत्। सार्वत्रिकेन कल्याणकर्मणा आत्मनः मानवैभवादिभिः साफल्येन अनुजीविनः साफल्यम्। न केवलं राजानम् अपि च, "नमस्कार्यः सदा चास्य पुत्रवल्लभमन्त्रिणः" [२२१.१०]।

अतः अवगम्यते यत् एते अनुजीविनः न उच्चपदासीनाः मन्त्रिसचिवादयः। पुनश्च उच्यते यत्, "सचिवैर्नास्य विश्वासो राजचित्तप्रियं चरेत्।" वक्तव्यं स्पष्टमेव। अद्यापि कार्यालयेषु ऊर्ध्वतनाधस्तनयोः यद् भेदात्मकं वैषम्यं दृश्यते प्राचीने काले अपि आसीत् तत् राजद्वारे अपि। उच्चपदासीनाः राजोपजीविनः अधस्तनानां कृते नासन् सहृदयाः। सर्वेषु कालेषु व्यतिक्रमः वर्तते। स न नियमः। अतः पुराणकारैः स्पष्टतया तादृशानाम् अनुजीविनां हिताय एष उपदेशः ज्ञापितः। यतः उच्चवर्गीयाणां राजोपजीविनाम् एवंविधं शाठ्यम् अवगम्य सावधानं स्थातव्यम्। अतः राजोपजीवी शाठ्यं परित्यज्य सर्वकर्माणि सम्पादयेदिति यथा सत्यं तथैव नापि, भवेद्वा कश्चित् चतुरः अभिप्रायः। एतदेव सर्वेषु कालेषु शासनयन्त्रस्य स्थितिः इति अग्निपुराणदिशा एव उपलभ्यते। तर्हि

अनुजीवी कथं स्वकर्म साधयेत्? उच्यते च राजविद् भृत्यः कर्मसमुद्भूतं विरागं परित्यज्य सानुरागं स्वकर्म समाचरेत्। इत्थं राजविदित्यनेन पदेन स्पष्टतया व्यज्यते यत् राजा एव अनुजीविनः कर्ता, न उच्चवर्गीयाः ऊर्ध्वतनाः अमात्यसचिवादयः। मानवधर्मसंहितायां कौटिलीये च अर्थशास्त्रे अमात्यादीनां गुणान्वितं लक्षणमुपस्थाप्यते। तत्र तेषां आन्तरवैशिष्ट्यं मानसिकगुणं वा समुपस्थाप्यते। अग्निपुराणे अनुजीविनां तादृशगुणम् उपन्यस्तम्। अधस्तनत्वात् तेषां पारतन्त्र्यं अधिकमिति सत्यं परन्तु तेषां मानसिकं दार्ढ्यं न खलु उपेक्षणीयमिति दृश्यते।

अनुजीवी धृतिमान् धीमांश्च भवेदिति प्रागेव दृष्टम्। अनुजीवी सदैव तुष्णीं वर्तमानः भवेत्। अपृष्टः सः सदैव नीरवः भवेत्। वागाडम्बरात् मन्त्रस्य भेदः भवति, यदेव गोपनीयं नालोच्यं तत्तु सहसा प्रकाश्यते आलापात्। अतः सूच्यते यत् यदि सः पृष्टः भवेत् तर्हि कमपि विषयमवलम्ब्य सः वक्तुं शक्नोति। एतदपि उच्यति यत्, आपदि एव तस्य एतादृशम् आचरणं स्वाभाविकं यतः राष्ट्रविप्लवादिषु विपत्कालेषु सावधानं स्थातव्यम्। अनुजीवी सदैव प्रसन्नः भवेत्। विरागप्रदर्शनेन धर्मनाशः कर्मनाशश्च। अपि च, अनुजीवी वाक्यसंग्राही भवेत्। एतत् सावधानं लक्षणीयम्। वाक्यसंग्रहस्य उपदेशेन एतत् व्यज्यते यत् एतानि वाक्यानि भवेद्वा गूढविषयसंबद्धानि। राष्ट्रविषयकानां गूढवार्तानां संग्रहकर्मणि असौ यतमानः भवेत्। जनसंयोगेन एवंविधा गूढवार्ता यदि कदापि वा ज्ञायते तर्हि तस्मात् महान् उपकारः भवेत्। अतः वाक्यसंग्राही जनः सचेतनः भवेत् सर्वथा। अथवा वाक्यसंग्रहेण एतदपि व्यज्यते यत् अनुजीवी सर्वेषां वचनानां श्रवणतत्परः भवेत्। सः स्वल्पभाषी भूत्वा श्रवणोत्सुकः भवेदिति आशयः। अनेन कर्तुः अन्येषां च वचनानां बहुश्रवणेन उपदेशेन च असौ ऋद्धः अभिज्ञश्च भवेत्। अतः कर्मणि च पारङ्गमात् तथैव कर्तुः अभ्युदयेन आत्मनः अभ्युदयः अपि भाव्यः।

असौ रहसि निर्भयः भवेत्। अर्थात् गूढविषयाणाम् आदेशेन कदापि भयेन शङ्कितः न भवेत्। राष्ट्रस्य कृते अनुजीवी विविधेषु कर्मेषु नियोजितः भवेत्। तानि कर्माणि सर्वाणि न सुकराणि। किञ्चित् वा दुष्करं सुगुप्तं च करणीयं वा। अनुजीवी यदि केवलम् अनायाससाध्ये कर्मणि आसक्तः भवेत् तत्तु न यथायथमेव। यतः कर्मणां गुरुभारः अपि कदापि वा जायते तस्मिन्

च मृत्युव्याधिभयं वर्तते विपदः च शङ्का वर्तमानः भवति । तत्तु सावधानम् अतिक्रमणीयम् । किन्तु भयात् कर्मत्यागः न साधु मन्यते यथा अनुजीवी कर्तुः आदेशं पालयेत् इति राष्ट्रकर्मणि आशयीभूतम् । कर्तुः एतादृशे आदेशे सः सन्देहपरायणः अपि न भवेत् । अतः कर्तुः वचनं कायमनोवाक्येन पालनीयमिति स्थितिः । एवंविधः आदर्शः अनुजीवी सदैव कुशलादिभिः सदालापी भवेत् । सदैव च अपरं आगतं जनं आसनदानेन आत्मनः औदार्यं ज्ञापयेत् । यतः असौ जनेषु राष्ट्रस्य प्रतिनिधिः तस्मात् तस्य औदार्येण राष्ट्रस्य प्रसिद्धिः बलवत्तरा भवेदित्यस्मिन् विषये नास्ति संशयः इति अस्माभिरपि आधुनिके राष्ट्रजीवने साधु अनुभूयते ।

अतः अग्निपुराणे उच्यते यत् अनुजीविनः वाक्यश्रवणेन जनाः हृष्टाः भवेयुः । तस्मादेव तस्य वाक्यसंग्रहस्य सिद्धिरिति मन्यते । अनुजीविनः एतादृशात् आनुकूल्यात् अप्रियमपि प्रियतरमिति आभाषते इति परं विस्मयकरमपि यथार्थम् । यतः मानसिकसौख्यात् जनानां मनोभावः नियन्त्रितः भवति । इत्थं राष्ट्रकर्मणि मनस्तत्त्वानुसरणमिति दृश्यते । अनुजीवी कर्तुः आदेशानां पालनात् जनसंयोगकर्मणि निरतः जायते । तस्मात् जनानां प्रीतिभाजनात् सः सफलकामः लब्धकीर्तिश्च भवति । तद्विपरीतेन विपर्ययः भवेत् । अतः प्राचीनराष्ट्रकर्मणि अपि आधुनिकव्यवस्थापनविद्यायाः तत्त्वं स्फुटं भवति इति लक्षणीयम् । औदार्यभावेन अतः अप्रियं प्रियमिति मत्वा अनुजीवी जनैः अभिनन्दितः भवति इत्यनेन अनुजीविनः साफल्यं तथैव राष्ट्रकर्मणश्च “तत्कथाश्रवणाद्धृष्टः अप्रियाण्यपि नन्दते” ।[१०]

परन्तु असौ अनुजीवी न दुष्टः इत्यपि सत्यम् । यतः दानस्वल्पादपि अनुजीवी कृतज्ञः भवेत् सकृदेव तत्स्मरणेन प्रभवे नितरां प्रसन्नः भवेदित्यपि आशयः ।[११] अनेन अनुकूलः अनुगतः जनः एव यथार्थतया अनुजीवी भवेदिति लक्ष्यते । एषः अनुरागः न दौर्बल्येन ग्रहणीयः । तस्मात् अनुजीविनः कर्मणि पारतन्त्र्येण न ग्लानिरस्ति । कर्तुः भृत्यस्य च पारस्परिकानुरागबन्धनेन सहावस्थानेन च एतादृशम् आनुगत्यं सर्वेषां कृते मङ्गलकरं भवेदित्यपि अनुभूयते । तस्माच्च प्रतिष्ठानधर्मः सफलः जायते प्रतिष्ठानस्य प्रतिष्ठा स्थितिः

---

[१०] अग्निपुराणम् २२१.१३

[११] अग्निपुराणम् २२१.१४

वापि सबला भूयते । रवीन्द्रनाथठाकुरमहोदयेन यत् काव्यं[१२] पुरातनं कश्चित् भृत्यमाश्रित्य सृष्टमासीत्, तस्मिन् कस्यचन अनुजीविनः तादृशम् आनुगत्यं हृद्बन्धनं दृश्यते । सः नासीत् पारङ्गमः परन्तु आसीत् सहमर्मी खलु । अग्निपुराणदिशा अनुजीविचरितेन कर्तव्ये कर्मणि हृदयवत्ता संश्लिष्टा जायते । तस्मात् न राजकर्मणा बद्धदायः विरागभीतश्च स्वार्थपरश्च अनुजीवी अत्र विषयीभूतः, परन्तु हृदयानुकूल्येन महत्तरः कर्मी एव अत्र व्यज्यते इति अनुमितम् । तस्मात् सुप्राचीना प्रज्ञा अत्र सततमेव आधुनिका इति शम् ।

✶✶✶

## Bibliography


1. *Agni Purana*; Anandashram Sanskrit Series no. 41 ; Hari Narayan Apte (Ed.) ; Poona ; 1957.
2. *Abhijñānaśakuntalam*; Kālidasa ; Tr. Monier Willams (Ed.) ; Clarendon Press ; Oxford ; 1877.
3. *Arthaśastra*; Kauṭilya ; R.S. Shastry (Ed.) ; Government Oriental Library Series ; Bibliotheca Sanskrita no.54 ; Mysore ; 1919.
4. *Manusmriti*; Manu ; (The Laws of Manu with the Bhasya of Medhatithi) ; Ganganath Jha (Tr.) ; University of Calcutta ; Calcutta ; 1920-1926.
5. *Matsya Purana*; Anandashram Sanskrit Series no. 54 ; H.N. Apte (Ed.) ; Poona ; 1909.
6. *Narada Purna*; (Ancient Indian Tradition and Mythology, Vol. 15-19) ; G.V.Tagare (Tr.) ; Motilal Banarsidass Pub ; Delh ; 1982.
7. *Ancient Indian Historical Tradition*; F.E. Pargiter ; Oxford University Press ; London ; 1922.
8. *The Purāṇa Texts of the Kali Age*; __ ; Motilal Banarsidass Publication ; Delhi ; 1975 ; (Originally Published : Oxford University Press ; London ; 1913).
9. *Political History of Ancient India*; H.C. Roychowdhury ; Cosmo Publications ; Delhi ; 2006 ; Reprint.
10. *Sāmba Purāṇa*; V.C. Srivastava (Ed.) ; Parimal Publications ; Delhi ; 2013.


[१२] पुरातनभृत्य, कथा ओ काहिनी

11. *Mṛcchakaṭikam*; Śūdraka ; M.R. Kale (Ed. and Tr.) ; Motilal Banarsidass Publication ; Delhi ; 2009 ; 9th Edition.
12. *History of Medieval Hindu India*; Vol. 2 ; C.V. Vaidya ; Cosmo Publication ; New Delhi ; 1979 ; Reprint.

✳ ✳ ✳

# शाब्दिकनैयायिकाभिमतकरणलक्षणसमीक्षणम्

श्रीपीताम्बरनिराला*

## Abstract

[व्याकरणशास्त्रे न्यायशास्त्रे चोभयत्र तत्तदाचार्यैः करणस्वरूपं व्यमर्शि स्वरुच्यनुसारेण स्वन्यायसौविध्यानुरोधेन च । अस्मिन् शोधपत्रे करणस्वरूपविमर्शावसरे कारणस्वरूपमपि प्रसङ्गादुल्लिखितम् । शाब्दिकैः कथितस्य करणसूत्रस्य प्रतिपदसार्थक्यं व्याहृतम् । न्यायमतसमीक्षणावसरे साधारणासाधरणकारणयोर्मध्ये पार्थक्यं प्रदर्शितम् । प्राचीनन्यायानुगं करणस्वरूपमप्युल्लिख्य व्याख्यातम् । सन्निपत्योपकारकत्वं कर्त्तृकारकस्य करणत्वनिरास इत्येवं शाब्दिकसिद्धान्ताः प्रसङ्गादत्र शोधपत्रे सोपपत्ति विवृताः । परन्तु शाब्दिकप्रतिपादितात् करणलक्षणात् नैयायिकाभिमतस्य करणस्य वैलक्षण्यमाहोस्विदुभयोः सादृश्यमित्येवं शास्त्रमधीयानानां संशीतिरुत्पद्यते । यदि वैलक्षण्यं परस्परस्मात्तदा तत्किंविधम्, यदि चोभयोर्वा सादृश्यं तदेव किंप्रकारमित्येवं प्रमाणोपपत्तिभ्यां संशीत्युच्छेदपुरःसरं प्रतिपादनमेवास्य तावच्छोधपत्रस्य प्रधानीभूतं लक्ष्यम् ।]

**कुञ्चिकाशब्दाः** — करणम्, शाब्दिकः, नैयायिकः, क्रियासिद्धिः, प्रकृष्टतमम् ।

## विषयोपक्रमः

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" [वाक्यपदीयम् १.१२३] इत्यभियुक्तोक्तेः शास्त्रेणोदीर्यमाणं कृत्स्नं हि ज्ञानं शब्दानुविद्धमिति सुविदितं सर्वेषाम् । तस्मात्सर्वस्यापि हि शास्त्रस्य शब्दमूलकत्वाद्व्याकरणस्य शास्त्रान्तरापेक्षयाभ्यर्हितत्वं सर्वातिशायि । वेदाङ्गेषु च पुनः "मुखं व्याकरणं स्मृतमि"ति [पाणिनीयशिक्षा ४२] वाचा तस्य मौख्यमपि ख्यापितम् । तत्रैव व्याकरणे मुख्यतश्च पाणिनीये शास्त्रे कारकचर्चावसरे करणस्वरूपमपि सूत्रं प्रणीय प्रत्यपादि भगवता पाणिनिना । सर्वशास्त्रेषु प्रदीपसन्निभा न्यायाख्यान्वीक्षिकी विद्या । किञ्च, मानाधीना मेयसिद्धिः[१] इत्यभियुक्तवाचा प्रमेयपदार्थसिद्ध्यर्थं प्रमाकरणाभिधस्य प्रमाणस्योपयोगित्वं सर्वैरपि शेमुषीमद्भिरुररीक्रियते । तथाहि प्रमाकरणाख्यं प्रमाणं

---

* सहायकाचार्यः, कृष्णनगरस्थितस्य कृष्णनगर-सर्वकारीय-महाविद्यालयस्य संस्कृतविभागे, पश्चिमवङ्गेषु, Email : pitunirala@gmail.com

१ दर्शनसरणिषु बहुधोदाह्रियमानमिदं वचः ।

प्रतिपिपादयिषुभिर्नैयायिकैस्तावत् कारणचर्चावसरे करणस्वरूपं सोपपत्त्या व्यमर्शि। पञ्चतत्त्वाञ्चितं स्थावरजङ्गमात्मकञ्च जगदिदं कार्यकारणभावाश्रितम्। जगदुत्पत्तेर्युक्तिसहो हेतुरनुसन्धेयश्चेत् कार्यकारणसम्बन्धो हि सुतरामाश्रयणीयः। स कार्यकारणभावश्च पुनः करणलक्षणज्ञानाधीनः। यावन्न समन्तात्करणपदार्थोऽवगम्यते न तावत्कस्यचिदपि पदार्थस्य कार्योत्पत्तौ कारणत्वं निश्चित्य निर्णेतुं शक्यते। कार्यनियतपूर्ववृत्तित्वं कारणत्वमिति न्यायशास्त्रेण प्रतिपादितं कारणलक्षणम् अप्रतिषिद्धं परमतं स्वमतं भवती[२]ति न्यायेनान्यैरपि शास्त्रैः स्वकीयमतरूपेणाभिमतम्। तत्रापि कारणलक्षणस्य रासभादावतिव्याप्तिवारणायानन्यथासिद्धत्वमिति कारणलक्षणे योजनीयम्। नैयायिकैः नैकेषु कारणेषु सत्सु यदसाधारणं कारणं तदेव करणमिति परामृश्यते। न्यायसम्मतस्य प्रत्यक्षादिप्रमाचतुष्टयस्य करणमेव प्रमाणत्वेनाभिमतम्। किञ्चित्कार्यं प्रति सत्स्वपि बहुषु कारणेषु प्रकृष्टतमस्य कारणस्यैव करणत्वं स्यादिति राद्धान्तितं शब्दशास्त्रे। महर्षिणा पाणिनिनानुरूपमेव “साधकतमं करणमि”ति [अष्टाध्यायी १.४.४२] करणलक्षणं निगदितं स्वप्रणीतग्रन्थे अष्टाध्याय्याम्। पाणिन्युक्तं लक्षणं व्याकरणपुरःसरं विवृन्वताऽऽचार्येण भट्टोजिदीक्षितेन समुच्यते क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यादिति[३]। अस्मिन् शोधपत्रे शाब्दिकैर्नैयायिकैश्च प्रतिपादितं करणलक्षणं किंविधं तथा तच्छास्त्रद्वयकथितयोः करणलक्षणयोः परस्परं किं पार्थक्यं किं वानयोर्मिथः सादृश्यमित्येवं सोपपत्तिकानुसन्धानं सप्रमाणविवृतिश्चास्य शोधप्रबन्धस्योद्देश्यम्। तथाहि पुरस्तादादौ नैयायिकानुमतकरणलक्षणं विशद्यते।

**नैयायिकानुमतकरणलक्षणविचारः**

तथाहि असाधारणं कारणं करणमिति नैयायिकैः करणलक्षणं प्रतिपादितम्। असाधारणत्वञ्च व्यापारवत्त्वमिति बोध्यम्। जगत्यस्यां तावत् यावतामपि कार्यपदार्थानामीश्वरादीन्यष्टधा साधारणकारणानि निश्चप्रचमङ्गीकर्त्तव्यानि। तानि ह्येवं शास्त्रेषु निगदितानि—

ईशस्तज्ज्ञानयत्नेच्छाः कालोऽदृष्टं दिगेव च।

२ प्रमाणविचारे वाक्यमिदं तन्त्रयुक्तितयोपलभ्यते।

३ वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन क्रियमाणा वृत्तिः।

प्रागभावाप्रतिबन्धकाभावौ कार्ये साधारणाः स्मृताः ॥[४] इति ।

कार्यत्वावच्छिन्न-कार्यतानिरूपित-कारणताशालित्वमिति साधारण-कारणलक्षणम् । तेन हि कार्यतावच्छेदककार्यत्वावच्छिन्नं कार्यं प्रति येषां कारणत्वं तानि हि साधारणकारणानि प्रख्यायन्ते । तस्मात् ईश्वरादीनां कारणानां कार्यत्वधर्मावच्छिन्नं सकलकार्यं प्रति कारणत्वात् साधारणकारणत्वम् । कार्यत्वातिरिक्त-धर्मावच्छिन्न-कार्यतानिरूपित-कारणताशालित्वे सति व्यापारवत्त्वमित्यसाधारणकारणलक्षणम् । कार्यत्वव्याप्य-कार्यत्वातिरिक्त-घटत्वधर्मावच्छिन्नं घटरूपं विशेषकार्यं प्रति दण्डचक्रकुलालकपालादीनाम् अथवा कार्यत्वव्याप्य-कार्यत्वातिरिक्त-पटत्वधर्मावच्छिन्नं पटरूपं विशेषकार्यं प्रति तन्तुतुरीवेमादीनां समेषामपि सामग्रीभूतानां पदार्थानां च कारणत्वात् तानि असाधारणकारणानि । एवञ्च व्यापारवद् असाधारणं कारणं करणमित्येवं केवलं करणलक्षणे क्रियमाणे घटरूपं विशेषकार्यं प्रति दण्डचक्रादीनां समेषामथवा पटरूपं विशेषकार्यं प्रति तुरीवेमादीनां समेषामेव स्वस्वव्यापारानुरोधेन व्यापारवत्त्वात् खले कपोतन्यायेन घटादितत्तद्विशेषकार्यं प्रति तेषां सर्वेषां करणत्वापत्तिः सम्भाव्यते । तस्मान्नैयायिकैः व्यापारस्य लक्षणं परिष्कृत्य कथ्यते तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वमिति । व्यापारो हि करणजन्यः सन्नपि करणजन्यक्रियाया जनको भवति । तस्यापि यद्व्यापारेण अव्यवहितोत्तरावच्छेदे कार्यमुत्पद्यते तत्कारणं करणमित्याख्यायते इति पूर्वोक्ता शङ्का निरस्यते । एतद्धि नव्यनैयायिकानां मतानुसारं करणलक्षणमेतावता वैशद्येन प्रतिपादितम् ।

प्राचीननैयायिकाश्च पुनः एतस्तमाद्भिन्नमेव करणलक्षणं स्वीकुर्वन्ति । तथाहि तेषां नये तावत् करणलक्षणं फलायोगव्यवच्छिन्नं कारणं करणमिति । एतत्करणलक्षणानुसारं यत्कारणादव्यवहितोत्तरमेव कार्योत्पत्तिर्जायते तत् कारणं करणं भवति । एतेन व्यापारस्यैव करणत्वं स्वीकृतं भवति तदव्यवहितोत्तरमेव कार्योत्पत्तेः । परन्तु नव्यैस्तावदेतत्करणलक्षणं त्यज्यते ।

**शाब्दिकाभिमतकरणत्वविमर्शः**

भगवता पाणिनिना स्वप्रणीतग्रन्थे अष्टाध्याय्यां करणस्वरूपमगादि

४ न्यायसम्मतसाधारणकारणोपसङ्ग्रहः ।

सूत्रं प्रणीय— साधकतमं करणमिति । क्रियासिद्धौ प्रकृष्टतमस्य कारणस्य करणत्वं स्यादिति तदभिप्रायः । ननु प्रकृष्टतमस्य कारणस्य करणत्वे किं प्रयोजकमिति चेदुच्यते यत् क्रियोत्पत्तौ नैकविधेषु कारणेषु सन्निहितेष्वपि यत्कारणनिष्ठव्यापारेण अव्यवहितत्वेन क्रियानिष्पत्तिर्जायते तत्तस्यां क्रियायां करणत्वेन परामृश्यते । अतो व्यापारवतः कारणस्यैव करणत्वमिति करणलक्षणस्य तात्पर्यमवगन्तव्यम् । एवञ्च यत्कारणनिष्ठव्यापारद्वारा अव्यवहितत्वेन क्रियोत्पत्तौ व्यापारवतः कारणस्यैव करणत्वं निश्चीयते । तस्मात् भर्त्तृहरिणापि स्वकीये वाक्यपदीये करणलक्षणविषयेऽनुरूपमेव निगद्यते—

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥ इति ।

[वाक्यपदीयम् ३.७.९०]

तथाहि रामेण बाणेन हतो बाली इत्यत्र रामाभिन्नकर्त्तृगत-व्यापारप्रेरितवाणनिष्ठव्यापारेण तदव्यवहितोत्तरक्षणावच्छेदे वधक्रिया समुत्पाद्यते इत्यतो बाणस्य गात्रवेधनरूपव्यापारवत्त्वेन करणत्वं सिध्यति । विवक्ष्यते यदा यत्र इत्यादिकारिकायाश्च अधिकरणत्वेन प्रसिद्धाया अपि स्थाल्यादेः तनुतरकपालतया देशकालावस्थादिवशेन क्रियां प्रति प्रकर्षविवक्षायां करणत्वं भवतीत्येवं तात्पर्यमवगन्तव्यम् । तेन स्थाल्या पच्यते इत्यादयः प्रयोगा अपि साधुत्वेन बोध्याः । तथाहि विषयेऽस्मिन् स्पष्टतया शब्दतत्त्वार्थविद आचार्या भर्त्तृहरिपादा आहुर्वाक्यपदीयस्य पदकाण्डे—

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यते इत्येषा विवक्षा दृश्यते यतः ॥ इति ।

[वाक्यपदीयम् ३.७.९१]

ननु सकलकारकाणां पारतन्त्र्यात् कर्त्त्रधीनत्वेन कर्त्तुरिव सर्वकारकापेक्षया प्रकर्षातिशयेन तस्मिन् करणत्वस्यातिप्रसङ्ग इति चेन्न तस्य विजातीयत्वेन ग्रहणानौचित्यम् । तथाह्युच्यते पदमञ्जर्यां सन्दर्भेऽस्मिन्— सकलसाधनविनियोगकारी खल्वसौ न हि शतधनो निष्कधनेन सह स्पर्धते इति । एवञ्च तर्हि अश्वेन दीपिकया रथेन सञ्चरतीत्यादौ कथं सर्वेषु करणत्वमिति चेदुच्यते कारकान्तरापेक्षो हि प्रकर्षातिशयो न पुनः एकत्र

वहुषु करणेषु स्वकक्षोपात्तेषु परस्परमुत्कर्षानुसन्धानमुचितम् । तस्मात्तेषु सर्वेषु प्रकर्षातिशयस्य सद्भावाद्युगपच्च क्रियासिद्धावुपकारकत्वान्नितरां तेषां समेषामेव करणत्वं सिद्ध्यति । प्रसङ्गेऽस्मिन् पदमञ्जरीवागनुसन्धेया— कारकान्तरापेक्षः करणस्यातिशयो न स्वकक्षायाम्तेन सर्वेषां क्रियानिष्पत्तौ सन्निपत्योपकारकत्वात् सिद्धं करणत्वमिति ।

कारकाधिकरणे गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः [परिभाषेन्दुशेखरः १५] इति गौणमुख्यन्यायो न प्रवर्त्तते अथवा शब्दगम्यः प्रकर्षो नाश्रियते इत्येवं ज्ञापनम् एव तमब्ग्रहणस्य सार्थक्यम् । ननु अभिरूपाय माल्यं समर्पय इत्यस्य अभिरूपतमाय माल्यं समर्पय इत्येवं तात्पर्यार्थो गृह्यते तद्वदत्रापि सूत्रस्यास्य पाणिनिना कारकाधिकारे पठितत्वात् कारकं साधकमित्यस्य साधकतममित्येवं तात्पर्यार्थस्य ग्रहीतुमुचितत्वात् तमब्ग्रहणं व्यर्थं सत् प्रागुक्तं पाणिनेरभिप्रायं ज्ञापयति । यदि च कारकाधिकारे शब्दगम्यः प्रकर्ष आश्रियेत तदा आधारोऽधिकरणम् [अष्टाध्यायी १.४.४५] इति पाणिनीयसूत्रेऽपि आश्रयत्वार्थकयोः आधाराधिकरणशब्दयोः द्विकृत्वश्चोल्लेखवात् द्विर्बद्धं सुबद्धं भवतीति न्यायेन ताभ्याम् आश्रयत्वार्थकशब्दाभ्यां प्रकृष्टाधारस्यैव अधिकरणत्वेन ग्रहणौचित्यात् तिलेषु तैलमित्यादिषु व्याप्यवृत्तिरूपाभिव्यापकेषु प्रकृष्टाधारेष्वेव अधिकरणसंज्ञा प्रसज्येत, तिलेषु सर्वत्रैव तैलस्य व्याप्तत्वेन मुख्यत्वात्, न पुनः गङ्गायां घोषः वृक्षे कपिरित्याद्यव्याप्यवृत्तिरूपेषु एकदेशाधारेषु, तेषां गौणीभूतानां सामीप्यादिवशाद् आधारस्योपचरितत्वेन प्रकृष्टाधारत्वाभावात् । तथा मा भूदित्येतदर्थमेव सूत्रे तमब्गृह्यते इत्यतस्तस्याऽऽनर्थक्यं नाभिमन्तव्यम् ।

**निष्कर्षः**

उपरिष्टात् पर्यालोचनेनेदं निगदितुं शक्यते यन्नैयायिकैः करणं तावत् स्वानुमतप्रमाचतुष्टयसिद्धौ प्रयोजकत्वेन प्रमाणमित्याख्यायते । व्याकरणशास्त्रे च शाब्दिकैर्न केवलं प्रमाजनकत्वेन प्रमाणं करणमिति परामृश्यतेऽपितु क्रियाया प्रकृष्टसाधकत्वेन करणं व्याख्यायते । एवञ्च, चतुर्विधयथार्थानुभवेषु सर्वत्रैव ज्ञानार्थक-ज्ञाप्रभृतिधातुवाच्याया ज्ञान-क्रियाया बोधात् प्रत्यक्षस्थले चक्षुरादीन्द्रियैः द्रव्य-रूपादिगुण-जाति-शब्द-शब्दत्वाभाव-प्रभृतिषड्विधविषयोपलब्धौ संयोगाख्य-सन्निकर्षादि-षड्विधव्यापारैः ज्ञानक्रियैवोपलभ्यत इति धिया चक्षुरादीन्द्रियाणां

तत्तद्व्यापारवत्त्वेन करणत्वम्, अनुमितिस्थले व्याप्तिज्ञानस्य वह्निव्याप्य-धूमवानयं पर्वतः इत्येवंविधपरामर्शात्मकव्यापारवत्त्वेन करणत्वम्, उपमितिस्थले सादृश्यज्ञानस्य अतिदेशवाक्यार्थस्मरणात्मकव्यापारवत्त्वेन करणत्वम्, तथा शाब्दीप्रमास्थले पदज्ञानस्य पदजन्यपदार्थज्ञानात्मक-व्यापारवत्त्वेन करणत्वम् बोध्यम् । वैयाकरणैस्तावत् यत्कारणनिष्ठव्यापारेण अव्यवहितोत्तरमेव क्रियानिष्पत्तिर्जायते तदेव करणमित्याख्यायते । नैयायिका अपि तद्वदेव करणत्वं स्वीकुर्वन्ति परन्तु तेषां विचारशैली हि भिन्ना । दात्रेण वृक्षं छिनत्ति इत्यादौ तावत् दात्रं हि करणं सद्दात्रनिष्ठोद्यमननिपतनरूपस्य व्यापारस्य तथा छेदनक्रियाया अपि युगपद्जनको भवति । दात्राज्जायमानश्चोद्यमननिपतनरूपव्यापारः छेदनक्रियां जनयति इत्येवन्नैयायिकदृशापि करणीभूत-दात्रनिष्ठोद्यमन-निपतन-रूपव्यापारादेवाव्यवहितक्षणावच्छेदे च्छेदनक्रियोत्पद्यते इत्यतो दात्रस्य करणत्वं सिद्ध्यतीत्युभयथापि गतार्थत्वात्तयोर्मध्ये नास्ति पार्थक्यम्, प्रतिपादनशैली चैव केवला भिद्यते । प्राचीनमताभिमतात् करणलक्षणाच्छाब्दिककरणलक्षणं सर्वथा भिद्यते इत्यतः शाब्दिकानां नास्ति तत्र स्वारस्यमित्यलं विस्तार्य ।

✶ ✶ ✶

## Bibliography


1. *वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीसहिता)*; प्रथमो भागः ; भट्टोजिदीक्षितः ; गिरिधरशर्म-परमेश्वरानन्दशर्मणौ (सम्पादकौ) ; मोतीलाल-बनारसीदास ; देहली ; २०१० ।
2. *वैयाकरणभूषणसारः (दर्पणव्याख्यासंवलितः)*; कौण्डभट्टः ; चन्द्रिकाप्रसादद्विवेदी (सम्पादकः) ; चौखम्बासंस्कृतप्रतिष्ठान ; देहली ; २००५ ।
3. *वैयाकरणभूषणसारः* ; धात्वर्थपर्यन्तः ; डॉ.भीमसेनशास्त्री ; भैमीप्रकाशन ; नवदेहली ; १९९२ ।
4. *लघुशब्देन्दुशेखरः* ; कारकप्रकरणम् ; नागेशभट्टः ; डॉ.तेजपालशर्मा (सम्पादकः) ; सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ; वाराणसी ; २००२ ।
5. *पाणिनीयशिक्षा*; महर्षिपाणिनिः ; शिवराज-आचार्य-कौण्डिन्न्यायन (सम्पादकः) ; चौखम्बाविद्याभवन ; वाराणसी ; १९९० ।

6. *महाभाष्यम् (प्रदीपोद्योतटीकाद्वयोपेतम्)*; महर्षिपतञ्जलिः ; श्रीमद्भार्गवशास्त्री (सम्पादकः) ; चौखम्बासंस्कृतप्रतिष्ठान ; नवदेहली ; १९८७ ।
7. *परमलघुमञ्जुषा (वंशीधरमिश्रकृतव्याख्यासंवलिता)*; नागेशभट्टः ; आचार्यश्रीनिवासशर्मा (सम्पादकः) ; चौखम्बासंस्कृतप्रतिष्ठान ; नवदेहली ; २००६ ।
8. *वाक्यपदीयम्*; तृतीयं काण्डम्) ; भर्तृहरिः ; पण्डितश्रीरघुनाथशर्मा (सम्पादकः) ; सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ; वाराणसी ; १९९७ ।
9. *भाषापरिच्छेदः (न्यासिद्धान्तमुक्तावलीसहितः)*; विश्वनाथपञ्चाननभट्टाचार्यः ; कलिकाता ; १३६९ वङ्गाब्दः ।
10. *वैयाकरणसिद्धान्तकौमुदी*; कारकप्रकरणम् ; भट्टोजिदीक्षितः ; अयोध्यानाथसान्यालशास्त्री (सम्पादकः) ; संस्कृतपुस्तकभाण्डार ; कलिकाता ; १४१८ वङ्गाब्दः ।
11. *व्याकरण दर्शनेर इतिहास*; गुरुपदहालदारः ; संस्कृत-बुक्-डिपो ; कलिकाता ; २००६ ।
12. *तर्कसङ्ग्रहः (अध्यापनासहितः)*; श्रीमन्नारायणचन्द्रगोस्वामी ; संस्कृत-पुस्तक-भण्डार ; कलिकाता ; १४१३ वङ्गाब्दः ।


✳ ✳ ✳

# शाब्दिकदिशा कर्मणि प्रयोगे मुख्यविशेष्यताविचारः

**प्रलय-नन्दी*, डॉ. गोपीकृष्णन् रघुः †**

## Abstract

[धात्वर्थव्यापारमुख्यविशेष्यक एव शाब्दबोधो भवति इति वैयाकरणानां सिद्धान्तः । एतस्य संरक्षणाय एव आख्यातार्थभावनाया विशेष्यत्वं प्रतिपादयतां मीमांसकानां, प्रथमान्तार्थस्य च विशेष्यत्वं निरूपयतां नैयायिकानां मते शाब्दिकैः दोषः प्रदर्श्यते । मुनिप्रामाण्यम् आदाय च तैः स्वमतं दृढीक्रियते । परन्तु कर्मणि प्रयोगे मुख्यविशेष्यताविषये वैयाकरणेषु मतभेदो दृश्यते । तत्र कर्तरि कर्मणि उभयत्र अपि प्रयोगे धात्वर्थव्यापारमुख्यविशेष्यत्वेन एव शाब्दबोधो जायत इति दीक्षित-कौण्डभट्टादीनाम् आचार्याणाम् आशयः । कैयट[१]-नागेशादयो वैयाकरणाचार्याः तु कर्तरि प्रयोगे धात्वर्थव्यापारस्य मुख्यविशेष्यत्वं, कर्मणि प्रयोगे च धात्वर्थफलस्य मुख्यविशेष्यत्वम् इति स्वीकुर्वन्ति । एवं कर्मणि प्रयोगे शाब्दबोधे मुख्यविशेष्यताविषये विवादावसरो दृश्यते । अयमेव प्रकृतप्रबन्धस्य आरम्भे मुख्यं बीजम् । इमं विषयम् आश्रित्य अत्र प्रबन्धे भाष्यादिग्रन्थप्रामाण्येन विस्तृतो विमर्शः उपस्थाप्यते । अन्ते च कतरः पक्षः स्वीकर्तव्य इति युक्तिभिः प्रतिपाद्यते ।]

**कुञ्चिकाशब्दाः** — धातुः, आख्यातम्, व्यापारः, फलम्, कर्ता, कर्म, विशेष्यम्, विशेषणम् ।

## भूमिका

शब्दाद् आगतो जातो वा शाब्दः, शाब्दश्च असौ बोध इति शाब्दबोधः । सामान्यतः शब्दजन्यो बोधः शाब्दबोध इत्युच्यते । सोऽयं शाब्दबोधो द्विविधो भवति, सखण्डः अखण्डश्च । यथा— चैत्रो ग्रामं गच्छति इत्यत्र चैत्रपदस्य चैत्ररूपः अर्थः, ग्रामपदस्य ग्रामरूपः अर्थः, अम्-विभक्तेः कर्म अर्थः, गम्-धातोः गमनम् अर्थः, आख्यातस्य व्यापाराश्रयः अर्थः, अन्यमते भावना कृतिः वा अर्थः । एवं प्रकारेण खण्डशो जायमानः शाब्दबोधः खण्डशाब्दबोध इत्युच्यते । तदनन्तरं शाब्दिकरीत्या चैत्रकर्तृकं ग्रामकर्मकं गमनम् इति

---

* शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य संस्कृतविभागे, पश्चिमवङ्गेषु, Email : prolay.nandi.vedvid@gmail.com

† सहायकाध्यापकः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य संस्कृतविभागे, पश्चिमवङ्गेषु ।

१ यद्यपि कैयटाचार्येण कण्ठत इदं न उच्यते, तथापि सुप आत्मन इत्यादिसूत्रभाष्ये प्रदीपे तेन प्रतीकान्तरेण सूचितम् एतत् ।

धात्वर्थव्यापारमुख्यविशेष्यकः अखण्डः शाब्दबोधो जायते । नैयायिकानां मते च ग्रामकर्मकगमनानुकूलकृतिमान् चैत्र इति प्रथमान्तार्थमुख्यविशेष्यकः अखण्डः शाब्दबोधः जायते । मीमांसकानां मते च ग्रामकर्मकगमनानुकूला चैत्रसमवेता भावना इति च भावनामुख्यविशेष्यकः अखण्डः शाब्दबोधो जायते । तत्र समेषाम् अपि पदानाम् एकः समुदितार्थः प्रतीतो भवति । खण्डशाब्दबोधे प्रत्येकं पदस्य अर्थः प्रतीयते । तत उपस्थितानां पदार्थानां कस्य कुत्र अन्वयः, कस्य च कुत्र प्राधान्यम् इति निर्धारणाद् अनन्तरम् एव अखण्डः शाब्दबोधः प्रवर्तते । सम्प्रदायेषु मुख्यविशेष्यत्वविषये मतभेदाद् एव अखण्डशाब्दबोधाकारो भिद्यते । एवं शाब्दिकानां मते अपि कर्मणि प्रयोगे कस्य मुख्यविशेष्यत्वमिति विषये निश्चयभेदात् समुदितः शाब्दबोधो भिद्यत इति बोध्यम् । प्रकृतप्रबन्धे कथम् एवं मतभेदः, काः च तत्र विनिगमना इति एते विषया एव प्राधान्येन विचार्यन्ते ।

### शोधसमस्या

शाब्दिकमते कर्ता, कर्म, सङ्ख्या कालश्च तिङर्थाः[२] । तत्र आधाराधेयभावेन कर्ता व्यापारस्य विशेषणं यतो हि व्यापारः कर्तरि आश्रितः । फलस्य अपि कर्मणि आश्रितत्वात् कर्म फलस्य विशेषणं भवति । सङ्ख्या कर्त्रर्थे कर्तुः कर्मणि अर्थे च कर्मणो विशेषणम् । कर्ता व्यापारस्य कर्म च फलस्य विशेषणं भवति । आख्यातार्थः कालः अपि व्यापारस्य विशेषणम् । धात्वर्थो हि फलानुकूलो यत्नसहितो व्यापारः । धात्वर्थयोः फलव्यापारयोः जन्यजनकभावः । वाक्ये देवदत्तादिपदप्रयोगे च आख्यातार्थकर्त्रादिभिः तत्तदर्थस्य अभेदान्वयो भवति । तेन देवदत्तः तण्डुलं पचति इत्यत्र शाब्दबोधाकारः— देवदत्ताभिन्नैककर्तृनिष्ठः तण्डुलाभिन्नैककर्मनिष्ठविक्लित्तिजननानुकूलो वर्तमानकालिको व्यापार इति । सम्प्रति कर्माख्याते शाब्दबोधविषये कथं निर्वाह इति विषये प्राचीना नवीनाः च वैयाकरणाः परस्परं विवदन्ते । कर्मणि प्रयोगे धात्वर्थव्यापारमुख्यविशेष्यत्वेन वाक्यार्थबोध इति दीक्षितप्रभृतीनां प्राचीनपक्षः, धात्वर्थफलमुख्यविशेष्यत्वेन एव तत्र शाब्दबोधो भवति इति नागेशप्रभृतीनां नवीनपक्षः । यद्यपि अत्र कैयटाचार्यो भट्टोजिदीक्षितात्

२ भूषणसारः, पृ-३६ ।

प्राचीन एव तथापि मतसादृश्येन तस्य नवीनपक्षे अन्तर्भावो बोध्यः । एवं मतभेदात् कतरः पक्ष आश्रयणीय इति विषये संशयावसरो दृश्यते । अयम् एव प्रकृतविमर्शे मुख्यं बीजं बोध्यम् । सम्प्रति उदाहरणसहकारेण क्रमश उभयोः पक्षयोः मतानि प्रस्तूयन्ते ।

**नवीनाः**

अथ धात्वर्थयोः फलव्यापारयोः मध्ये जन्यजनकभाव उपलभ्यते । तत्र कस्य विशेष्यत्वं कस्य च विशेषणत्वम् इति विषये नवीनानाम् अयं निर्णयः— कर्त्रर्थे भावार्थे च व्यापारस्य एव प्राधान्यम्, तत्र कर्त्रर्थे व्यापारविशेषणत्वेन एव फलस्य भानम् । कर्मणि अर्थे तु फलस्यैव प्राधान्यम्, अत्र फलविशेषणत्वेन एव व्यापारस्य प्रतीतिरिति[३] । कर्तरि अर्थे फलस्य विशेषणत्वं, कर्मणि अर्थे तु विशेष्यत्वम् एव । भावार्थे प्रयोगे च व्यापारस्यैव प्राधान्यं भवति इति नवीनाः प्रतिपादयन्ति । अत एतेषां मते कर्माख्यातस्थले भिन्नो वाक्यार्थो लभ्यते, यथा— देवदत्तेन तण्डुलः पच्यत इत्यत्र देवदत्ताभिन्नैककर्तृनिष्ठ-वर्तमानकालिक-व्यापारजन्या तण्डुलाभिन्नैककर्मनिष्ठा विक्लित्तिरिति फलविशेष्यको वाक्यार्थबोधो भवति । कर्त्राख्यातस्थले तु देवदत्ताभिन्नैककर्तृनिष्ठः तण्डुलाभिन्नैककर्मनिष्ठ-विक्लित्तिजननानुकूलो वर्तमानकालिको व्यापार इति पूर्वं प्रदर्शितो व्यापारमुख्यविशेष्यक एव शाब्दबोध इति ऊह्यम् । अधः चित्रमाध्यमेन उभयस्थले जायमानः शाब्दबोधः प्रदर्शितः ।




सम्प्रति नवीनानां पक्षे युक्तय उपस्थाप्यन्ते ।

(१) **कर्मकृत्तुल्यता**— कर्मकृत उदाहरणं यथा पक्वः तण्डुल इति । अत्र पच्-धातोः क्त-प्रत्ययः तयोरेव कृत्यक्तखलर्थाः [अष्टाध्यायी ०३.०४.७०] इति

३ प्रौढमनोरमा, लघुशब्दरत्नम्, पृ-८०० ।

सूत्रेण विधीयते । सूत्रे तयोः इत्यनेन भावकर्मणोः परामर्शः क्रियते, प्रकृते क्तः कर्मणि अर्थे विहितः । तण्डुलाभिन्नैककर्मनिष्ठा व्यापारजन्या विक्लित्तिः इत्याकारको बोधः अत्र सर्वानुभवसिद्धः । अत्र एवंरीत्या सामानाधिकरण्येन बोधः फलस्य विशेष्यत्वस्वीकाराद् एव सम्भवति । अत्र क्तान्तस्य पक्वशब्दस्य पच्यत इति तिङन्तस्य च समानार्थत्वं प्रसिद्धम् । समानार्थत्वं समानविशेष्यकबोधजनकत्वम् । तथा च, उभयत्र समानार्थत्वसिद्धये कर्मकृद्वत् कर्माख्यातस्थले अपि फलविशेष्यक एव बोधः स्वीकर्तव्यः[४] ।

(२) **नियमरक्षा**— प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम् इति अस्ति नियमः । यतः प्रत्ययो विधीयते सा प्रकृतिः, तदर्थेन युक्तो यः स्वार्थः तद्बोधकत्वं प्रत्ययानाम् इति च तदाशयः । तत्रापि प्रकृत्यर्थे विशेष्यत्वेन भासमानो यः अर्थः तेन अन्वितस्य एव अर्थस्य प्रतिपादकत्वं प्रत्ययानाम् इति विस्तरः । अतः प्रत्ययानां प्रकृत्यर्थविशेष्यान्वय्यर्थप्रतिपादकत्वम् इति फलितार्थो लभ्यते । यथा पक्वः तण्डुल इति प्रयोगे पक्वशब्दे पच्-धातुः प्रकृतिः, क्तः प्रत्ययः । पच्-धात्वर्थः विक्लित्तिः तदनुकूलव्यापारश्च, क्त-प्रत्ययार्थः कर्मत्वम् । एवञ्च पच्-धातुरूपा या प्रकृतिः, तदर्थभूतयोः विक्लित्तितदनुकूलव्यापारयोः मध्ये विशेष्यभूतेन विक्लित्तिरूपफलेन अन्वितो यः कर्मत्वरूपार्थः तद्बोधकत्वं क्त-प्रत्ययस्य इति समन्वयः[५]। अथ यदि कर्माख्यातस्थले अपि व्यापारमुख्यविशेष्यक एव शाब्दबोधः अभिमतः, तर्हि त-प्रत्ययविषये पूर्वोक्तनियमस्य भङ्गापत्तिः । पच्यते इत्यत्र कर्मत्वं त-प्रत्ययार्थः, तत्प्रकृतिभूतपच्-धात्वर्थयोः फलव्यापारयोः मध्ये विशेष्यत्वेन प्रतीयमानेन व्यापारेण कर्मत्वस्य साक्षाद् अन्वयासम्भवात् नियमभङ्गापत्तिः इति आशयः । अतः कर्माख्यातस्थले फलविशेष्यकस्य शाब्दबोधस्य स्वीकारे एव नियमः अक्षत इति भावः ।

(३) **भाष्यप्रामाण्यम्**— अथ कर्मकृत्स्थले फलविशेष्यकबोधः सर्वानुभवसिद्धः, किन्तु कर्माख्यातस्थले तथा स्वीकारे मानाभाव इति न शङ्क्यः, तत्र भाष्यप्रामाण्यस्य सत्त्वात् । सुप आत्मनः क्यच् [अष्टाध्यायी ०३.०१.०८] इति सूत्रेण एषितृसम्बन्धिन इच्छाकर्मणो वाचकात् सुबन्ताद् इच्छायाम्

---

४ प्रौढमनोरमा, भावप्रकाशः, पृ-७९९ ।

५ प्रौढमनोरमा, भावप्रकाशः, पृ-७९९ ।

अर्थे वैकल्पिकः क्यच् प्रत्ययो विधीयते । आत्मनः पुत्रम् इच्छति इत्यर्थे पुत्र अम्— इत्यस्मात् क्यचि प्रक्रियायां पुत्रीयति इति रूपं सिध्यति । अथ भाष्ये प्रतिपाद्यते पुत्रीयति इति प्रयोगो यथा पुत्रम् इच्छति इत्यर्थे सिध्यति तथा इष्यते पुत्रः, इष्टः पुत्र इत्यादौ न सम्भवति । तत्र क्यजभावे एकमेव कारणम् उक्तम्, भिन्नार्थत्वम् इति । समानविशेष्यकबोधजनकत्वं समानार्थत्वं, तदभावे च भिन्नार्थत्वम्[६] । एवञ्च अस्माद् भाष्यात् कर्त्राख्यात-कर्माख्यातयोः कर्त्राख्यातकर्मकृतोः च समानार्थत्वाभावः स्पष्टः[७] । अत्र भाष्ये एवंरीत्या तिङ्कृतोः साम्येन उपादानम् एव कर्माख्याते फलस्य विशेष्यत्वेन प्रतीतौ प्रमाणम् इति आशयो बोध्यः । एतेन कर्मकृदन्ते फलविशेष्यकबोधस्य विद्यमानत्वे अपि कर्माख्याते न तथा इति निरस्तम्, तथा वैषम्ये बीजाभावात् । किञ्च तथा स्वीकारे भाष्यासङ्गत्यापत्तिः अपि दृश्यत इति अवधेयम् ।

**प्राचीनाः**

प्राचीनानाम् अयं निर्णयः— कर्त्रर्थे कर्मण्यर्थे तथा भावार्थे सर्वत्रापि व्यापारस्यैव प्राधान्यम्, किञ्च सर्वत्र व्यापारविशेषणत्वेन एव फलस्य भानम् । अतः कर्मण्यर्थे कर्त्रर्थे इत्युभयत्रापि समानाकारको व्यापारमुख्यविशेष्यक एव शाब्दबोध इति प्राचीनवैयाकरणाः प्रतिपादयन्ति[८] । ततो देवदत्तः तण्डुलं पचति, देवदत्तेन तण्डुलः पच्यत इत्युभयत्र स्थले अपि— देवदत्ताभिन्नैककर्तृनिष्ठः तण्डुलाभिन्नैककर्मनिष्ठ-विक्लित्तिजननानुकूलो वर्तमानकालिको व्यापार इति समानाकारक एव शाब्दबोध इति प्राचां विचारः ।

सम्प्रति प्राचीनानां युक्तयः प्रतिपाद्यन्ते ।

(१) **प्रयोगानुपपत्तिः**— नवीनानां मते कर्माख्यातस्थले फलविशेष्यकः शाब्दबोधः प्रतिपादितः । एवञ्च तत्र फलस्य विशेष्यत्वेन प्राधान्यात् तत्रैव कालान्वयापत्तिः । तदा पाकक्रियायां विक्लित्तेः अनुत्पत्तौ पच्यत इति प्रयोगस्य

---

६ भाष्ये सुप आत्मन इत्यादिसूत्रे कैयटाचार्येण विषयान्तरस्य व्याख्यानावसरे सूचितम् एतत् ।

७ प्रौढमनोरमा, लघुशब्दरत्नम्, पृ-८०० ।

८ प्रौढमनोरमा, भैरवी, पृ-८०१ ।

अनुपपत्तिः, क्रियासत्त्वे अपि वर्तमानकालीनस्य फलस्य अभावात्[९]। अतः कर्माख्यातस्थले अपि व्यापारमुख्यविशेष्यक एव शाब्दबोधः, ततश्च फलाभावे अपि व्यापारस्य वर्तमानकालीनत्वात् पच्यत इति प्रयोग उपपद्यते, अतः प्राचीनमतम् एव युक्तम् ।

**(२) वचनविरोधः** — कर्माख्याते फलस्य विशेष्यत्वं व्यापारस्य विशेषणत्वम् । एवञ्च व्यापारस्य विशेषणत्वेन अप्रधानत्वात् "भावप्रधानमाख्यातम्[१०]" इति निरुक्तवचनस्य विरोधापत्तिः । तुल्यरीत्या क्रियाप्रधानमाख्यातम् इति सिद्धान्तः अपि विरुध्यते[११]। अत्र क्रियात्वं हि फलनिष्ठकार्यतानिरूपित-कारणतावच्छेदकतया सिद्धो जातिविशेषः अखण्डोपाधिः वा । एतादृशं क्रियात्वं फले न सम्भवति । क्वचित् फलरूपार्थे कृतः अपि क्रियाशब्दव्यवहारः गौण एवेति बोध्यम् । एवं वचनविरोधापत्तेः कर्माख्याते धात्वर्थभूतस्य फलस्य प्राधान्यं न युक्तम् ।

**(३) कर्मणः कर्तृत्वापत्तिः** — प्रधानीभूतधात्वर्थाश्रयस्य कर्तृत्वव्यवस्थितेः, कर्माख्याते धात्वर्थभूतस्य फलस्य प्राधान्यात् च तादृशफलाश्रयस्य तण्डुलादेः कर्तृत्वापत्तिः । अत्र तुल्यरीत्या देवदत्तादेः प्रधानीभूत-धात्वर्थव्यापारानाश्रयत्वेन कर्तृत्वाभावापत्तिः अपि अनुसन्धेया । एवञ्च देवदत्तेन तण्डुलः पच्यत इत्यादिप्रयोगे तण्डुलस्य कर्तृत्वात् ततः अनुक्तकर्तृत्वलक्षणतृतीया आपद्यते, अकर्तृत्वेन च देवदत्तशब्दात् तृतीयानुपपत्तिः[१२]। एवं दोषवारणाय कर्तरि कर्मणि चेति उभयत्रापि धात्वर्थभूतस्य व्यापारस्य एव प्राधान्यं स्वीकर्तव्यम् इति आशयः ।

**(४) पच्यते पश्य इत्यनुपपत्तिः** — विक्लित्त्यनुकूलक्रियां पश्य इत्यर्थे पचति पश्य इति प्रयोगो यथा दृश्यते तथा अस्मिन्नेव अर्थे पच्यते पश्येति प्रयोगः अपि इष्यते । नवीनमते कर्माख्यातस्थले फलस्य विशेष्यत्वेन प्राधान्याद् व्यापारस्य च अप्राधान्यात् पूर्वोक्तार्थे पच्यते पश्य इति प्रयोगो न सिध्यति । फलेन

---

[९] प्रौढमनोरमा, भैरवी, पृ-८०१ ।
[१०] निरुक्तम्, पृ-०२ ।
[११] प्रौढमनोरमा, भैरवी, पृ-८०१ ।
[१२] प्रौढमनोरमा, भैरवी, पृ-८०१ ।

साकं विशेषणतया अन्वितस्य पाकव्यापारस्य दृशिक्रियायाम् अनन्वयात्[१३]। विशेषणेऽपि तस्मिन् दृशिक्रियान्वयो न शङ्क्यः, विक्लित्तिं प्रति विशेषणत्वेन सम्बद्धस्य पाकव्यापारस्य पुनः दृशिक्रियायां विशेषणत्वस्य असम्भवात्। एकपदार्थं प्रति विशेषणीभूतस्य पुनः अपरपदार्थं प्रति विशेषणत्वं न सम्भवतीति नियमः प्रकृते प्रमाणं बोध्यम्।

**(५) भाष्यसङ्गतिः** — सुप आत्मनः क्यच् [अष्टाध्यायी ०३.०१.०८] इत्यत्र भाष्ये आत्मनः पुत्रमिच्छति इति विग्रहे क्यच् विहितः। इष्यते पुत्रः, इष्टः पुत्र इति उभयत्र भिन्नार्थत्वाद् एव क्यजभावो व्याख्यातः। वस्तुतः अत्र भिन्नविशेष्यकबोधजनकत्वरूपं भिन्नार्थत्वं न विवक्षितम्। तथाहि पुत्रीयति इत्यतः प्रतीयमाने अर्थसमुदाये कर्तृकर्मादिरूपः अर्थः प्रतीयते, अयं सर्वोऽपि अर्थः पुत्रमिच्छति इति स्थले अपि भासते। परन्तु इष्यते पुत्रः, इष्टः पुत्र इत्याभ्यां कर्तृत्वप्रतीतिः न सम्भवतीति कारणाद् अत्र भिन्नार्थत्वम्[१४]। अथ इष्यते पुत्र इत्यादौ अपि आक्षेपसामर्थ्यात् कर्तृपदं लभ्यत एव इति रीत्या समानार्थत्वं न शङ्क्यम्, पदद्वयघटितविग्रहे चरितार्थस्य विधेः पदत्रयघटितविग्रहे कल्पने गौरवदोषात्। अतः कर्माख्याते अपि व्यापारस्य प्राधान्ये न कापि भाष्यासङ्गतिः इति बोध्यम्।

**विमर्शः**

(१) फलविशेष्यकबोधस्वीकारे विक्लित्त्यनुत्पत्तिदशायां पच्यत इति प्रयोगानुपपत्तिः इति पूर्वं प्रतिपादितम्, तद् अयुक्तम्। कर्माख्याते फलस्य प्राधान्ये सत्यपि कालान्वयो व्यापारे एव भवति। व्यापारे एव कालस्य साकाङ्क्षत्वाद् विशेषणीभूते अपि तस्मिन् कालान्वयः। ततश्च विक्लित्त्यनुत्पत्तिदशायाम् अपि वर्तमानकालिकव्यापारस्य विद्यमानत्वाद् भवत्येव पच्यत इति प्रयोगोपपत्तिः। अतः कर्माख्याते फलप्राधान्यस्य स्वीकारे न प्रयोगानुपपत्तिरूपो दोषः[१५]।

(२) कर्माख्याते फलस्य प्राधान्ये स्वीकृते अपि

---

[१३] प्रौढमनोरमा, भैरवी, पृ-८०१।

[१४] प्रौढमनोरमा, भावप्रकाशः, पृ-८०१।

[१५] प्रौढमनोरमा, भावप्रकाशः, पृ-८०१।

"भावप्रधानमाख्यातम्[१६]" इति वचनं न विरुध्यते, तत्र भावपदस्य धात्वर्थपरत्वात् । क्रियाप्रधानमाख्यातमिति सिद्धान्तः अपि न अनुपपन्नः, तत्र क्रियापदस्य साध्यत्वेन प्रतीयमाना या क्रिया तत्परत्वात् । क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं साध्यत्वम्[१७], एतादृशस्य साध्यत्वस्य कर्माख्याते अपि विद्यमानत्वाद् न दोष इति भावः । अथवा क्रियाप्रधानमाख्यातम् इत्यत्र क्रियापदं करणव्युत्पत्त्या व्यापारपरं कर्मव्युत्पत्त्या फलपरम् इति बोध्यम् । एवमेव भाव्यते अनेन इति व्युत्पत्त्या भावशब्दो व्यापारपरः, भावयति एनम् इति व्युत्पत्त्या भावशब्दः फलपरः[१८] । एवंविधो भावः प्रधानं मुख्यो यस्मिन्निति तद् भावप्रधानम् इति रीत्या भावप्रधानमाख्यातम् इति वचनम् उभयविशेष्यकशाब्दबोधपरं सम्भवति । ततश्च न कापि वचनविरोधापत्तिः ।

(३) कर्मणि प्रयोगे धात्वर्थभूतस्य फलस्य प्राधान्यात् न कर्मणः कर्तृत्वापत्तिः, कर्तृप्रत्ययसमभिव्याहार एव प्रधानीभूतधात्वर्थाश्रयस्य कर्तृत्वनियमात्[१९] । तथाहि लः कर्मणि च भावे चाकर्मकेभ्यः [अष्टाध्यायी ०३.०४.६९] इत्यनेन सकर्मकधातुभ्यः कर्तृकर्मणोः अकर्मकधातुभ्यः च कर्तृभावयोः अर्थयोः लकारा विधीयन्ते । तदा देवदत्तः तण्डुलं पचति इत्यत्र प्रधानीभूतधात्वर्थाश्रयत्वेन देवदत्तस्य कर्तृत्वाद् यथा कर्तरि लकारः, तथैव देवदत्तेन तण्डुलः पच्यत इत्यत्र अपि प्रधानीभूतधात्वर्थाश्रयत्वेन तण्डुलस्य कर्तृत्वात् तस्मिन्नर्थे कर्तरि लकारः सम्भवति । इत्थम् उभयत्र अपि कर्त्रर्थकलकारस्य एव उपस्थितेः कर्मार्थकलकारस्य क्वापि विधानं न सम्भवति इति तद्विधानम् अनुपपन्नम् । एवञ्च एतद् अनुपपन्नं कर्मार्थकलकारविधानम् एव सूचयति यत् प्रधानीभूतधात्वर्थाश्रयमात्रस्य न कर्तृत्वम् अपि तु कर्तृप्रत्ययसमभिव्याहार एव तादृशधात्वर्थाश्रयस्य कर्तृत्वमिति । ततः कर्माख्याते तण्डुलस्य प्रधानीभूतधात्वर्थाश्रयत्वे अपि कर्तृप्रत्ययसमभिव्याहाराभावाद् न तत्र कर्त्रर्थकलकारः अपि तु कर्मार्थकलकार एव इति तद्विधानम् उपपन्नम् । अतः कर्मणि अर्थे

---

[१६] निरुक्तम्, पृ-०२ ।

[१७] भूषणसारः (प्रभा-दर्पणोपेतः), पृ-१८ ।

[१८] प्रौढमनोरमा, भैरवी, पृ-८०१ ।

[१९] लघुशब्देन्दुशेखरः, पृ-७०१ ।

धात्वर्थभूतस्य फलस्य प्राधान्ये सत्त्वेऽपि तदाश्रयभूततण्डुलादेः कर्मणो न कर्तृत्वापत्तिः इति बोध्यम् ।

(४) कर्माख्यातस्थले फलस्य विशेष्यत्वे विक्लित्त्यनुकूलपाककर्मक-दर्शनरूपार्थे पच्यते पश्य इति प्रयोगो न सिध्येद् इति यत् प्राचीनैः आशङ्कितं तदपि अयुक्तम्, प्रामाण्याभावात् । पचति पश्य इत्यत्र यथा विक्लित्त्यनुकूल-पाकक्रियां पश्य इत्याकारको बोधः तथा पच्यते पश्य इति प्रयोगे अपि समानाकारक एव बोधः स्याद् इति पक्षे न लभ्यते कापि विनिगमना[२०] । अतः पच्यते पश्य इत्यत्र पाकक्रियाजन्यविक्लित्तिं पश्य इत्याकारकस्य बोधस्य स्वीकारे क्रियमाणे अपि दोषाभावः । ततश्च कर्मणि फलांशस्य प्राधान्ये सत्त्वेऽपि पच्यते पश्य इत्येवं प्रयोगस्य न कापि अनुपपत्तिः ।

(५) सुप आत्मनः क्यच् [अष्टाध्यायी ०३.०१.०८] इति सूत्रस्थे भाष्ये निविष्टं भिन्नार्थत्वं प्राचीनदिशा व्याख्यातुं न शक्यते । तथाहि लोके यथा पुत्रीयति देवदत्त इति प्रयोगो दृश्यते तथा पुत्रमिच्छति देवदत्तः, पुत्र इष्यते देवदत्तेन इत्युभयविधः अपि प्रयोगः अवलोक्यते । क्वचित् कर्तृप्रयोगाभावो वाक्यैकदेशन्यायेन बोध्यः । एवञ्च सर्वत्र अपि कर्तृप्रतीतेः तुल्यत्वात् तदप्रतीतिप्रयुक्तं भिन्नार्थत्वं न युक्तम् । इष्यते पुत्र इत्यादौ च कर्तुः आक्षेपे गौरवदोषः प्रतिपादितः तदपि न युक्तम्, वृत्त्यर्थावबोधकवाक्यस्यैव विग्रहत्वेन तथा लाघवगौरवव्यवस्थाया असम्भवात् । वृत्त्यर्थावबोधकवाक्यं विग्रहः, तदनुसारञ्च इष्यते पुत्र इति पदद्वयघटितस्य वाक्यस्य विग्रहत्वं न सम्भवति इति आशयः ।

किञ्च, तथा लाघवस्वीकारे पुत्रमिच्छति देवदत्त इत्यस्यापि विग्रहत्वं न स्यात् । अथ देवदत्तः पुत्रीयति इति वृत्तौ देवदत्तपदस्य सत्त्वेन पुत्रीयति इति प्रयोगस्य एव विग्रहप्रदर्शनम् उचितं, तथा च पुत्रमिच्छति इत्यस्यैव विग्रहवाक्यत्वम् इति चेत् तुल्यरीत्या इष्यते पुत्र इत्यत्र अपि विग्रहत्वं युक्तम्[२१] । अतः इष्यते पुत्र इत्यादौ फलस्य विशेष्यत्वेन प्रतीतौ भिन्नार्थत्वाद् न तत्र क्यच् इत्येव व्याख्यानं युक्तम् इति बोध्यम् ।

**सिद्धान्तः**

(१) वैयाकरणाचार्येण भट्टोजिदीक्षितेन स्वग्रन्थे प्रौढमनोरमादौ कर्तरि

---

[२०] प्रौढमनोरमा, भावप्रकाशः, पृ-८०२ ।

[२१] प्रौढमनोरमा, भावप्रकाशः, पृ-८०२ ।

अर्थे वाक्ये यथा धात्वर्थव्यापारस्य मुख्यत्वेन उपस्थितिः सिद्धान्तिता, तथा कर्मणि अर्थे प्रयुज्यमाने वाक्ये अपि धात्वर्थव्यापारस्य एव प्रधानतया प्रतीतिः निरूपिता । नव्यवैयाकरणेन आचार्येण नागेशेन तु कर्तरि प्रयोगे धात्वर्थव्यापारस्य प्राधान्येन प्रतीतिः प्रतिपाद्यते, कर्मणि प्रयोगे च धात्वर्थफलस्य मुख्यत्वेन उपस्थितिः व्याख्यायते । एवम् आचार्यस्य नागेशस्य मते कर्तरि कर्मणि चेति उभयविधे अर्थे प्रयुक्ते वाक्ये धात्वर्थोपस्थितेः विषये वैलक्षण्यं लक्ष्यते । अत्र उभयत्र अपि कार्यकारणभावस्य आश्रयणे सति दीक्षितरीत्या कर्तरि कर्मणि चेति उभयत्रापि शाब्दबोधं प्रति धात्वर्थव्यापारस्य मुख्यत्वेन उपस्थितिः कारणम् इति कार्यकारणभावो लभ्यते । नागेशरीत्या तु कर्तरि प्रयोगे शाब्दबोधं प्रति धात्वर्थव्यापारस्य मुख्यत्वेन उपस्थितिः कारणम्, कर्मणि प्रयोगे च शाब्दबोधं प्रति धात्वर्थफलस्य मुख्यत्वेन उपस्थितिः कारणम् इति कार्यकारणभावद्वयं कल्पनीयं भवति । इत्थं लाघवगौरवदिशा विचारे क्रियमाणे लाघवाद् दीक्षितमतम् एव युक्तमिति भाति ।

(२) कार्यकारणभावे लाघवाद् यद्यपि दीक्षितमतस्य युक्ततरत्वं प्रतीयते तथापि अनुभवप्रामाण्याद् नागेशस्य मतम् एव युक्तमिति भाति । पचति पश्य, पच्यते पश्य इति अनयोः प्रयोगयोः विषये बोधगतं वैषम्यं सर्वैः अपि अनुभूयत इति भावः । पचति पश्य इत्यत्र पाकानुकूलस्य व्यापारस्य दर्शनक्रियायां कर्मत्वेन भानं भवति, पच्यते पश्य इत्यत्र च पच्-धात्वर्थभूताया विक्लित्तेः दर्शनक्रियायां कर्मत्वेन प्रतीतिः भवति इति आशयः ।

(३) कर्तरि अर्थे प्रयुज्यमाने वाक्ये धात्वर्थभूतस्य व्यापारस्य प्राधान्येन बोधः, कर्मणि अर्थे च प्रयुज्यमाने वाक्ये धात्वर्थभूतस्य फलस्य प्राधान्येन बोधः अनुभवसिद्ध एव । अत एव सम्प्रदायान्तरेषु अपि कर्तरि अर्थे कर्मणि अर्थे च प्रयुज्यमानयोः वाक्ययोः विषये शाब्दबोधगतं वैचित्र्यं प्रतिपाद्यते । यथा नैयायिकैः कर्तरि अर्थे प्रयुक्ते वाक्ये कृतिः, कालः, सङ्ख्या चेति त्रयाणाम् आख्यातार्थत्वेन प्रतिपादनं क्रियते । कर्मणि अर्थे च प्रयुक्ते वाक्ये फलम्, कालः, सङ्ख्या चेति त्रयाणाम् आख्यातार्थत्वेन प्रतीतिः स्वीक्रियते । एवम् आख्यातवाददीधितौ रघुनाथशिरोमणिना मण्डनमिश्रस्य मतम् अनूद्यते । तदनुसारेण मण्डनमिश्रस्य मते तण्डुलं पचति चैत्रः, इत्यत्र तण्डुलवृत्ति-फलविशेषजनक-व्यापारवान् चैत्र इति बोधो भवति । मैत्रण पच्यते तण्डुलः

इत्यत्र च मैत्रनिष्ठव्यापारजन्य-फलविशेषशाली तण्डुलः इति बोधो जायते । एवं मण्डनमिश्रमते चैत्रः ग्रामं गच्छति इति वाक्ये ग्रामवृत्ति-संयोगजनक-ग्रामभिन्नसमवेत-व्यापारवान् चैत्र इति बोधो जायते । चैत्रेण ग्रामो गम्यत इत्यत्र च चैत्रवृत्ति-ग्रामभिन्नसमवेत-व्यापारजन्य-संयोगशाली ग्राम इति शाब्दबोधो भवति[२२] । एवं रीत्या मण्डनमिश्रमते अपि कर्तरि धात्वर्थयोः फलव्यापारयोः व्यापारस्य प्राधान्यम्, कर्मणि च अर्थे फलस्य प्रधानतया भानं भवति इति ज्ञायते । स्वमतस्य समर्थनाय भाष्यग्रन्थे अपि भिन्नेषु स्थलेषु विशिष्टानि स्थलानि प्रदर्शितानि नागेशेन । अतः प्रमाणान्तरस्य सत्त्वात् नागेशमतं युक्तम् इति सिद्धान्तयितुं शक्यते ।

(४) कर्मणि प्रयोगे कर्तृप्रयोगवत् धात्वर्थव्यापारमुख्यविशेष्यत्वेन एव शाब्दबोधो भवति इति दीक्षितादीनां पक्षः । तत्र धात्वर्थफलमुख्यविशेष्यत्वेन एव प्रतीतिः इति नागेशभट्टादीनां पक्षः । इदं पक्षद्वयम् आश्रित्य एव प्रकृतप्रबन्धे विचारः प्रस्तुतः । तत्र उभयस्मिन् अपि पक्षे स्वमतसमर्थिन्यः परमतविरोधिन्यः च युक्तय उपस्थापिताः । दीक्षितप्रभृतिभिः नवीनमते ये दोषा आक्षिप्ताः, नागेशेन तेषां परिहारः प्रदर्शितः । परन्तु नवीनैः नागेशादिभिः प्राचीनमते ये दोषाः सम्भाविताः तेषां क्वापि परिहारो न दृश्यते । इत्थं निर्दुष्टत्वाद् अपि नागेशाचार्यस्य अभिमतं नवीनमतम् एव युक्तम् इति प्रकृतप्रबन्धे निष्कर्षो बोध्यः । अतः कर्मणि प्रयोगे धात्वर्थफलस्य एव मुख्यविशेष्यत्वेन प्रतीतिः भवति इति प्रकृते सिद्धान्तो लभ्यते ।

**उपसंहारः**

धात्वर्थस्य विषये आख्यातार्थस्य विषये च सम्प्रदायेषु महान् विवादो दृश्यते । वैयाकरणाः फलव्यापारयोः धात्वर्थत्वं, कर्तृ-कर्म-सङ्ख्या-कालानां च आख्यातार्थत्वं प्रतिपादयन्ति । नैयायिकाः सामान्यतः फलव्यापारयोः धात्वर्थत्वम्, कृति-काल-सङ्ख्यानां च आख्यातार्थत्वं प्रतिपादयन्ति । एवं मीमांसकाः सामान्यतः फलमात्रस्य धात्वर्थत्वम्, भावना-काल-सङ्ख्यानां च आख्यातार्थत्वं स्वीकुर्वन्ति । इत्थं सामान्यरूपेण तत्र तत्र सम्प्रदायेषु धात्वाख्यातयोः अर्थाः सङ्गृह्यन्ते । तत्र विशेषतः अवलोक्यमाने सम्प्रदायेषु धात्वर्था भिद्यन्ते, कर्त्राख्याते कर्माख्याते च आख्यातबोध्या अर्था अपि

[२२] आख्यातवाददीधितिः, पृ –VII

भिद्यन्ते । अत्र दीक्षितनागेशयोः आख्यातार्थविषये विवादो न वर्तते, उभयोरपि मते कर्तृ-कर्म-सङ्ख्या-कालानाम् एव आख्यातार्थत्वम् । किन्तु कर्तरि कर्मणि चार्थे प्रयुज्यमाने वाक्ये धात्वर्थयोः फलव्यापारयोः कुत्र कस्य प्राधान्यम् इति विषय एव विवादो दृश्यते । कर्त्राख्यातवत् कर्माख्याते अपि व्यापारविशेष्यकफलप्रकारक एव शाब्दबोध इति प्राचीनानाम् अभिमतिः । कर्त्राख्यातस्थले व्यापारविशेष्यकफलप्रकारकः शाब्दबोधः, कर्माख्यातस्थले तु व्यापारप्रकारकफलविशेष्यकः शाब्दबोध इति नवीनानां निर्णयः । अत्र प्राचीनदिशा नवीनदिशा चेति उभयथा अपि शाब्दबोधे धात्वर्थविशेष्यकत्वम् अक्षतम्, अतो धात्वर्थमुख्यविशेष्यकः शाब्दबोध इति वैयाकरणसिद्धान्तस्य न कोऽपि बाधः । परन्तु धात्वर्थयोः अपि फलव्यापारयोः मध्ये कुत्र कस्य प्राधान्यम् इति विषये विवादावसरो दृश्यते । अनयोः कतरः पक्ष आदर्तव्य इति विषये प्रकृतप्रबन्धे विचारः प्रस्तुतः । तत्तन्मतम् आश्रित्य कृते च विमर्शे नवीनानां मतम् एव प्रकृते सिद्धान्तत्वेन प्रतिपादितम् । अत्र विषयोपस्थापने एकैकस्य अपि अंशस्य युक्तत्वायुक्तत्वे विद्वांस एव प्रमाणम् इति विनिवेद्य अत्रैव विरम्यत इति शम् ।

***

## Bibliography


1. *वैयाकरणसिद्धान्तभूषणम्* (निरञ्जनी- व्याख्यया प्रकाश-टिप्पण्या च समुल्लसितम्) ; प्रथमो भागः ; कौण्डभट्टः ; के. वि. रामकृष्णमाचार्यः (सम्पादकः) ; गुजराट : श्री सोमनाथ संस्कृत विश्वविद्यालय ; पण्डिचेरी फ्रेंच संस्थान ; २०१५ ई. ।
2. *वैयाकरणभूषणसारः* (तत्त्वदर्शिनी- व्याख्यया समुल्लसितः) ; कौण्डभट्टः ; श्रीवेङ्कटेश्वर-वेद-विश्वविद्यालयः ; तिरुपतिः ; २०१६ ई. ।
3. *वैयाकरणभूषणसारः* (प्रभा– दर्पण- व्याख्याद्वयोपेतः) ; कौण्डभट्टः ; चौखम्भा संस्कृत संस्थान ; वाराणसी ; २०७८ वि.सं. ; पुनर्मुद्रण ।
4. *प्रौढमनोरमा* (शब्दरत्न- सहिता) ; भट्टोजिदीक्षितः ; पण्डित गोपालशास्त्री नेने (सम्पादकः) ; चौखम्भा संस्कृत भवन ; वाराणसी ; २०७५ वि.सं. ; प्रथमसंस्करण ।
5. *वैयाकरणसिद्धान्तकौमुदी* (मूलमात्रम्) ; भट्टोजिदीक्षितः ; गोविन्दाचार्यः (सम्पादकः) ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; २०२० ई. ।
6. *लघुशब्देन्दुशेखरः* (षट्टीकोपेतः अव्ययीभावान्तो भागः) ; नागेशभट्टः ; भार्गव पुस्तकालय ; वाराणसी ; १९९२ ई. ।

7. *वैयाकरणसिद्धान्तलघुमञ्जूषा* ; (द्वितीयो भागः) ; नागेशभट्टः ; आचार्य श्रीरामप्रसाद त्रिपाठी (सम्पादकः) ; सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ; वाराणसी ; १९९० ई. ।
8. *निरुक्तम्* (प्रथम-द्वितीयाध्यायौ) ; यास्काचार्यः ; डा० उमाशङ्करशर्मा (ऋषि) (सम्पादकः) ; चौखम्बा विद्याभवन ; वाराणसी ; २००४ ई. ; पुनर्मुद्रण ।
9. *आख्यातवाददीधितिः* ; रघुनाथशिरोमणिः ; सरस्वती महाल ग्रन्थालयः ; तञ्जाबूर ; १९७२ ई. ।

* * *

# द्वितीयादियोगविभागसमीक्षणम्

**सैकत-मोहान्तः** *

## Abstract

["महान् हि शब्दस्य प्रयोगविषयः । सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः— एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृचम्, नवधाथर्वणो वेदः, वाकोवाक्यम्, इतिहासः, पुराणं, वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः"[१]इति भाष्यानुसारम् एतादृशे प्रयोगाब्धौ तादृशाः प्रयोगाः उपलभ्यन्ते यत्र पाणिनीयसूत्रैः समासः साधयितुमशक्यः । तत्तत्प्रयोगसाधुत्वनिर्वाहाय समासविधायकसूत्रेषु योगविभागः स्वीकृतः काशिकादिप्राचीनवैयाकरणैः । नागेशादिनव्यैस्तु भिन्नः पन्थाः स्वीकृतः इति विशेषः । अमुमेव विषयमादाय अत्र शोधप्रबन्धः प्रस्तुतः ।]

**कुञ्चिकाशब्दाः** — योगविभागः, सूत्राणि, अष्टाध्यायी, वार्तिकानि, काशिका, शेखरः ।

## ०. उपक्रमः

व्याकरणशास्त्रे पाणिनीयसूत्रैर्यत्र शिष्टकृतप्रयोगाणां निर्वचनमशक्यं तत्र योगविभागाख्यः विशिष्टः पन्थाः आश्रीयते । अत एव पारिभाषेन्दुशेखरे "योगविभागादिष्टसिद्धिः"[२] इति परिभाषा समुल्लसिता । योगः सूत्रं, तस्य विभागो योगविभागः, विभज्य सूत्रप्रदर्शनम् इष्टरूपाणां सिद्ध्ये उपयुज्यते, न तु अनिष्टरूपाणाम् । यथा "आतो धातोः" [अष्टाध्यायी ६.४.१४०] इति सूत्रे आतः इति योगविभागात् "समासेऽनञ्पूर्वे क्त्वो ल्यप्" [अष्टाध्यायी ७.१.३७] इति सूत्रे क्त्वः, "हलः श्नः शानज्झौ" [अष्टाध्यायी ३.१.८३] इति सूत्रे श्नः इत्यादीष्टरूपाणां व्याकरणसम्मतत्वं सिद्धम् । यद्यपि हाहान् इत्यत्रापि आतः इति योगेन लोपः प्राप्नोति तथापि नात्र लोपः, अत्र लोपस्यानिष्टत्वात् । धातोः इति द्वितीययोगेन आतः इति प्रथमयोगस्य अनित्यत्वज्ञापनमत्र बीजम् । तथाहि आतः इति योगेन धात्वधातुविशेषेण आकारस्य लोपे सिद्धे धातोः इत्यनेन धात्ववयवमात्रस्य आकारलोपविधानं व्यर्थं भवति । तदेतत्

---

* शोधच्छात्रः, बेलुडमठस्थस्य रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य संस्कृत-दर्शन-विभागे, saikatmohantavedvid@gmail.com

१ व्याकरणमहाभाष्यम् [प्रथमो भागः], पत्रम्-७०-७१

२ परिभाषेन्दुशेखरः, पत्रम्-४५०

व्यर्थं सत् आतः इत्यस्य अनित्यत्वं ज्ञापयति । इत्थम् इष्टरूपसिद्धये एव अयं योगविभागः कार्यः ।

"द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" [अष्टाध्यायी २.१.१४], "तृतीया तत्कृतार्थेन गुणवचनेन" [अष्टाध्यायी २.१.३०], "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" [अष्टाध्यायी २.१.३६], "पञ्चमी भयेन" [अष्टाध्यायी २.१.३७], "षष्ठी" [अष्टाध्यायी २.२.८], "सप्तमी शौण्डैः" [अष्टाध्यायी २.१.४०] इत्येतैः समासविधायकसूत्रैः द्वितीयान्तादिसुबन्तानां श्रितादितत्तत्प्रकृतिकसुबन्तैः समासो विहितः । सर्वत्र काव्यादिषु केवलसूत्रोक्ततत्तत्प्रकृतिकसुबन्तैः समस्तप्रयोगाः न परिलक्ष्यन्ते । यथा रघुवंशे "वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकङ्कपत्रे"[3] इत्यादिश्लोके वामात् इतरः वामेतरः इति पञ्चमीतत्पुरुषो द्रष्टव्यः । सप्तमीतत्पुरुषो यथा तत्रैव "रश्मिष्विवादाय नगेन्द्रसक्ताम्"[4] इत्यादिश्लोके नगेन्द्रे सक्ता नगेन्द्रसक्ता इति । एतादृशप्रयोगेषु पूर्वोक्तसूत्रैः समासः साधयितुं न शक्यते । तत्रेत्थं मार्गाः विमृश्यन्ते ।

## १. द्वितीयातत्पुरुषः

द्वितीयातत्पुरुषसमासे "गम्यादीनामुपसंख्यानम्"[5] इत्येकम् वार्त्तिकम् प्रस्तुतम् । तत्र तत्त्वबोधिनीकारः अलिखत्— "गम्यादयो प्रयोगतो ज्ञेयाः"[6] इति । माघकाव्यस्य "विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः"[7] इति श्लोके विशेषविदुषः इति पदस्य व्याख्यानावसरे मल्लिनाथेन— "गतिगम्यादिपाठाद् द्वितीयासमासः"[8] इति व्याख्यायि । एतादृशं शिष्टप्रदत्तसमाधानं प्रेक्ष्य स्तोत्रादिषु द्वितीयासमासस्थले प्रकृतवार्त्तिकेन समासः अवगन्तुं शक्यः ।

काशिकामते द्वितीयेत्यादिसूत्रे योगविभागः स्वीक्रियते । तथा चोक्तं काशिकान्यासे— "द्वितीया इति योगविभागः क्रियते, तेन गमिगामिप्रभृतिभिरपि समासो भवति"[9] इति । एवं पत्युर्नो यज्ञसंयोगे

[3] रघुवंशम् २.३१, पत्रम्-७३
[4] रघुवंशम् २.२८, पत्रम्-७१
[5] वैयाकरणसिद्धान्तकौमुदी [द्वितीयः भागः], पत्रम्-३४
[6] वैयाकरणसिद्धान्तकौमुदी [द्वितीयः भागः], पत्रम्-३४
[7] शिशुपालवधम् २.७५, पत्रम्-९७
[8] शिशुपालवधम्, पत्रम्-९७
[9] काशिका [द्वितीयोभागः], पत्रम्-२७४

[अष्टाध्यायी ४.१.३३] इति सूत्रस्य न्यासे काशिकास्थस्य फलगृहीतृत्वशब्दस्य निरूपणे— “द्वितीयेति योगविभागात् तृन्नन्तेन द्वितीयासमासः”[१०] इत्युक्तम् ।

## २. तृतीयातत्पुरुषः

तृतीयातत्पुरुषसमासे दीक्षितदिशा योगविभागात् समासः स्वीकार्यः । तथाहि “एकादिश्चैकस्य चादुक्” [अष्टाध्यायी ६.३.७६] इति सूत्रे एकान्नविंशतिः इति प्रयोगस्य समाससिद्ध्यर्थं “नञो विंशत्या सह समासे कृते एकशब्देन सह तृतीयेति योगविभागात्समासः”[११] इति दीक्षितेन कौमुद्याम् अवादि । एवं “बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने” [अष्टाध्यायी ६.२.१६२] इति सूत्रे अनेन प्रथमः इदंप्रथमः इति समासं प्रदर्श्य तत्र दीक्षितेन सिद्धान्तकौमुद्यां “तृतीयेति योगविभागात् समासः”[१२] इत्युक्तम् । अपि च, “आत्मनश्च” [अष्टाध्यायी ६.३.६] इति सूत्रस्थे आत्मनापञ्चमः इत्युदाहरणे तत्त्वबोधिनीकारेणापि— “तृतीया इति योगविभागात् समासः”[१३] इति दीक्षितमार्गः समर्थितः । अतो दीक्षितदिशा तृतीयेति योगविभागात् समासः वक्तुं शक्यः ।

नागेशस्तु आत्मनापञ्चम इत्यत्र लघुशब्देन्दुशेखरे— “सुप्सुपेति समासः”[१४] इत्यवादीत् । लण्सूत्रभाष्ये “अर्धचतस्रो मात्राः” इति प्रयोगस्य प्रदीपे— “अर्धेन चतस्रः” इत्युक्तम्[१५], अत्रापि नागेशदिशा सुप्सुपासमासः स्वीकार्यः ।

किञ्च, कृदन्तशब्दैः समासविषये “कर्तृकरणे कृता बहुलम्” [अष्टाध्यायी २.१.३१] इति सूत्रेण कर्तृतृतीयान्तं करणतृतीयान्तं च सुबन्तं क्तप्रत्ययान्तप्रकृतिकसुबन्तमात्रेण समस्यते, बहुलग्रहणात् तथापि “साधनं कृता”[१६] इति भाष्योक्तयोगात् कारकसामान्यस्य सकलकृत्प्रत्ययान्तप्रकृतिकसुबन्तैः समासोऽपि अनुसन्धेयः । अत एव

---

१० काशिका [चतुर्थो भागः], पत्रम्-३२६
११ वैयाकरणसिद्धान्तकौमुदी [द्वितीयः भागः], पत्रम्-११७
१२ वैयाकरणसिद्धान्तकौमुदी [चतुर्थो भागः], पत्रम्-५८७
१३ वैयाकरणसिद्धान्तकौमुदी [द्वितीयः भागः], पत्रम्-२३१
१४ लघुशब्देन्दुशेखरः [चतुर्थः खण्डः], पत्रम्-४१८
१५ व्याकरणमहाभाष्यम् [प्रथमो भागः], पत्रम्-१४५
१६ महाभाष्यम् [द्वितीयभागः], पत्रम्-३७६

लघुशब्देन्दुशेखरे नागेशः "नेन्सिद्धबध्नातिषु च" [अष्टाध्यायी ६.३.१९] इति सूत्रस्थे चक्रबद्धः इत्युदाहरणे "सप्तम्यन्तेन निष्ठान्तस्य साधनं कृता इति समासः"[१७] इत्यवादीत्। अतः कृदन्तस्थले "साधनं कृता" इति योगात् समासः स्वीकार्यः।

काशिकामते तृतीयेत्यादिसूत्रे योगविभागः स्वीक्रियते। तथाहि काशिकायां "बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने" [अष्टाध्यायी ६.२.१६२] इति सूत्रे अनेन प्रथमः इदंप्रथमः इति समासं प्रदर्श्य तत्र "तृतीयेति योगविभागात् समासः"[१८] इत्युक्तम्। "आदरानादरयोः सदसती" [अष्टाध्यायी १.४.६३] इति सूत्रस्य न्यासेऽपि "परिभवेणौदासीन्यं परिभवौदासीन्यमिति, तृतीया इति योगविभागात् समासः"[१९] योगविभागः समर्थितः। एवं "लटः शतृशानचावप्रथमासमानाधिकरणे" [अष्टाध्यायी ३.२.१२४] इति सूत्रे अप्रथमासमानाधिकरणे इति पदस्य समासनिरूपणे न्यासे तावदुक्तम्— "तृतीया इति योगविभागात् समासः"[२०] इति।

### ३. चतुर्थीतत्पुरुषः

चतुर्थीतत्पुरुषविषये भट्टोजिदीक्षितदिशा "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" [अष्टाध्यायी २.१.३६] इति सूत्रे योगविभागः स्वीकृतः। "वैयाकरणाख्यायां चतुर्थ्याः" [अष्टाध्यायी ६.३.७] इत्यादिसूत्रेषु आत्मनेपदम्, परस्मैपदम् इत्यादिशब्दानां समासनिरूपणे दीक्षितेनोक्तं— "चतुर्थी इति योगविभागात्समासः"[२१] इति।

नागेशस्तु चतुर्थीत्यादिसूत्रे योगविभागं नाङ्गीकरोति। तन्मते आत्मनेपदम् परस्मैपदम् इत्यादौ सुप्सुपासमास एव उचितः। तदुक्तं लघुशब्देन्दुशेखरे— "सह सुपा [अष्टाध्यायी २.१.४] इति समास इत्युचितम्" इति। अत एव पस्पसाह्निके धर्मनियमशब्दनिरूपणावसरे नागेशेनापि उक्तं— "चतुर्थी इति योगविभागो न भाष्यारूढः, सुप्सुपा इति समासः

---

१७ लघुशब्देन्दुशेखरः [चतुर्थः खण्डः], पत्रम्-४३२

१८ काशिका [सप्तमो भागः], पत्रम्-४४३

१९ काशिका [द्वितीयो भागः], पत्रम्-१९३

२० काशिका [तृतीयो भागः], पत्रम्-५०७

२१ वैयाकरणसिद्धान्तकौमुदी [द्वितीयः भागः], पत्रम्-२३२

इत्यगतिकगतिः”[२२] इति। यद्यपि महाभाष्यस्य पस्पसाह्निके “धर्माय नियमः धर्मनियमः”[२३], “वृत्तये समवायः वृत्तिसमवायः”[२४] इत्येतौ प्रयोगौ दृश्येते तथापि तत्र कैयटेनापि सम्बन्धसामान्ये षष्ठीमाश्रित्य समासः साधितः। तेनोक्तम्— “सम्बन्धसामान्ये तु षष्ठीं विधाय समासः कर्तव्यः, चतुर्थीसमासस्य प्रकृतिविकृतिभाव एव विधानात्”[२५] इति। “वृत्तये समवायः वृत्तिसमवायः”[२६] इति भाष्यप्रयोगेऽपि पूर्ववत् समासः ज्ञेयः। अनेन इदं स्पष्टं विज्ञायते स्तोत्रादिषु चतुर्थीसमासस्थले सम्बन्धसामान्ये षष्ठ्या समासः, सुप्सुपासमासो वा अङ्गीकार्यः।

नागेशमते तु “चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः” [अष्टाध्यायी २.१.३६] इति सूत्रभाष्ये “योगविभागः करिष्यते— चतुर्थी सुबन्तेन सह समस्यते”[२७] इति योगविभागः उक्तः स एकदेशित्वात् हेयः। इत्थं दीक्षितानुसारं चतुर्थीति योगविभागात्, नागेशानुसारं सुप्सुपा इति योगाद्वा समासः स्वीकार्यः।

## ४. पञ्चमीतत्पुरुषः

पञ्चमीतत्पुरुषसमासविषयेऽपि सुप्सुपासमासः एव स्वीकार्यः, भाष्ये योगविभागस्यादर्शनात्।

दीक्षितानुसारं “पञ्चमी भयेन” [अष्टाध्यायी २.१.३७] इति सूत्रे योगविभागः अङ्गीक्रियते। तत्त्वबोधिन्याम् पारस्करप्रभृतीनि च संज्ञायाम् [अष्टाध्यायी ६.१.१५७] इति सूत्रे परश्शतानि इति प्रयोगस्य सिद्ध्यर्थम्— “पञ्चमीति योगविभागाद्वा समासः”[२८] इत्यवादि।

काशिकान्यासदिशा अपि योगविभागः स्वीक्रियते। तथाहि “क्क्ङिति च” [अष्टाध्यायी १.१.५] इति सूत्रस्थन्यासे [अष्टाध्यायी २.१.३७] काशिकास्थितस्य निमित्तपञ्चमीशब्दस्य निरूपणे— “पञ्चमी भयेन इति

---

[२२] महाभाष्यम् [द्वितीयभागः], पत्रम्-६५
[२३] महाभाष्यम् [द्वितीयभागः], पत्रम्-६५
[२४] महाभाष्यम् [द्वितीयभागः], पत्रम्-८०
[२५] महाभाष्यम् [द्वितीयभागः], पत्रम्-६५
[२६] महाभाष्यम् [द्वितीयभागः], पत्रम्-८०
[२७] महाभाष्यम् [द्वितीयभागः], पत्रम्-३८१
[२८] वैयाकरणसिद्धान्तकौमुदी [द्वितीयो भागः], पत्रम्-२७३

पञ्चमी इति योगविभागात् समासः" [२९] इत्युक्तम् । तथा च "तपरस्तत्कालस्य" [अष्टाध्यायी १.१.७०] इति सूत्रन्यासे— "स पुनः पञ्चमीति योगविभागात् समास इति" [३०] तात्परः तपरः इत्यंशव्याख्यानावसरे दृश्यते ।

## ५. षष्ठीतत्पुरुषः

षष्ठीतत्पुरुषसमासविषये तु सन्देहावकाशः एव नास्ति, तत्र "षष्ठी" [अष्टाध्यायी २.२.८] इति एकपदात्मकसूत्रस्य दर्शनात् । षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन समस्यते, स तत्पुरुषः इति हि तदर्थः । अनेन तु सर्वत्र षष्ठीसमासः सुलभः ।

## ६. सप्तमीतत्पुरुषः

सप्तमीतत्पुरुषसमासविषयेऽपि दीक्षितदिशा योगविभागः स्व्यकारि । तेन प्रौढमनोरमायाम् "हलन्त्यम्" [अष्टाध्यायी १.३.३] इति सूत्रे "हलि अन्त्यमिति विग्रहे सप्तमीति योगविभागात् सुप्सुपा इति वा समासः" [३१] इत्युक्तम् । तत्त्वबोधिन्यामपि सुराष्ट्रब्रह्मादिशब्दानां समासप्रसङ्गे— "सप्तमीति योगविभागात् समासः" [३२] इति योगविभागः समर्थितः । "तुल्यास्यप्रयत्नं सवर्णम्" [अष्टाध्यायी १.१.९] इति सूत्रभाष्ये "आस्ये प्रयत्नः आस्यप्रयत्नः" [३३] इति यो विग्रहः प्रदर्शितः स सुप्सुपासमासत्वेनैव साध्यः ।

काशिकामतेऽपि सप्तमीति योगविभागः अङ्गीक्रियते । तथाहि "ब्रह्मणो जानपदाख्यायाम्" [अष्टाध्यायी ५.४.१०४] इति सूत्रस्य उदाहरणेषु सुराष्ट्रब्रह्मः, अवन्तिब्रह्मः इत्यादिषु समासप्रसङ्गे— "योगविभागात्सप्तमीसमासः" [३४] इति काशिकायामुक्तम् । अन्यत्रापि "सप्तम्याः पुण्यम्" [अष्टाध्यायी ६.२.१५२] इति सूत्रे वेदे पुण्यं वेदपुण्यम् इति समासः योगविभागात् साधितः [३५] । एवमन्यत्रापि अन्तेगुरुः, अप्सुयोनिः, अप्सव्यः, चक्रबद्धः, चारबद्धः इत्यादिप्रयोगेषु सवत्र

[२९] काशिका [प्रथमो भागः], पत्रम्-७१
[३०] काशिका [प्रथमो भागः], पत्रम्-२१६
[३१] प्रौढमनोरमा [पञ्चसन्ध्यन्ता], पत्रम्-११
[३२] वैयाकरणसिद्धान्तकौमुदी [द्वितीयः भागः], पत्रम्-११३
[३३] व्याकरणमहाभाष्यम् [प्रथमो भागः], पत्रम्-२४७
[३४] काशिका [षष्ठो भागः], पत्रम्-३१४
[३५] काशिका [सप्तमो भागः], पत्रम्-४३२

सप्तमीति योगविभागात् समासः स्वीकृतः[३६]। अपि च, “अनृष्यानन्तर्ये बिदादिभ्योऽञ्” [अष्टाध्यायी ४.१.१०४] इति सूत्रस्य काशिकान्यासे— “सप्तमी इति योगविभागात्समासः”[३७] इति। एवं “भस्त्रादिभ्यः ष्ठन्” [अष्टाध्यायी ४.४.१६] इति सूत्रस्य काशिकान्यासे शीर्षेभार इति भाष्यप्रयोगसिद्ध्यर्थं तावदुक्तम्— “सप्तमीति योगविभागात्समासः”[३८] इति। काशिकादीक्षितमतमेव अनुसृत्य प्रक्रियासर्वस्वेऽपि तावदुक्तम्—

“इहानुक्तं समासार्थं द्वितीयेत्यादि खण्ड्यताम्।
कृता बहुलमित्येतद् बाहुल्यं वा विजृम्भताम्” ॥इति ॥[३९]

## ७. उपसंहारः

इत्थं काशिका-कौमुदी-प्रक्रियाकौमुदी-दिशा द्वितीयेत्यादि-समासविधायक-सूत्रेषु योगविभागं स्वीकृत्य शिष्टप्रयोगाणां सिद्धिः कर्तुं शक्या। नागेशमतानुसारं तु सर्वत्र सुप्सुपासमासः स्वीकार्यः इति शम्।

✶✶✶

## Bibliography


1. *वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीसहिता)*; भट्टोजिदीक्षितः; गिरिधरधर्मा-चतुर्वेदः; परमेश्वरानन्दशर्मा-विद्याभास्करः(सम्पादकौ); मोतीलाल बनारसीदास; दिल्ली; २०१४ द्वादश-पुनर्मुद्रणम्
2. *रघुवंशमहाकाव्यम्*; कालिदासः; रामचन्द्र-झा (सम्पादकः); चौखम्बा कृष्णदास अकादमी; वाराणसी; २००७ पुनर्मुद्रितम्
3. *प्रौढमनोरमा (पञ्चसन्ध्यन्ता)*; भट्टोजिदीक्षितः; वैद्यनाथ-झा (सम्पादकः); रचना प्रकाशन; जयपुर; २०१२ प्रथमसंस्करणम्;
4. *परिभाषेन्दुशेखरः*; नागेश-भट्टः; विश्वनाथ-मिश्रः (सम्पादकः); चौखम्बा सुरभारती प्रकाशन; वाराणसी; २००५ प्रथमसंस्करणम्;
5. *व्याकरणमहाभाष्यम् (द्वितीयं खण्डम्)*; पतञ्जलिः; भार्गव-शास्त्री-जोशी (संशोधकः); चौखम्बा-संस्कृत-प्रतिष्ठानम्; दिल्ली; २०१४ पुनर्मुद्रितं संस्करणम्;


[३६] मध्याद्गुरौ [अष्टाध्यायी ६.३.११], शयवासवासिष्वकालात् [अष्टाध्यायी ६.३.१८], नेन्सिद्धबध्नातिषु [अष्टाध्यायी ६.३.१९] इत्यादीनां सूत्राणां काशिका द्रष्टव्या।

[३७] काशिका [चतुर्थो भागः], पत्रम्-४४४-४४५

[३८] काशिका [पञ्चमो भागः], पत्रम्-२४२

[३९] प्रक्रियासर्वस्वम्, पत्रम्-२९४

6. *काशिका (न्यास-पदमञ्जरी-भावबोधिनी-सहिता)*; वामन-जयादित्यौ ; जयशङ्करलाल-त्रिपाठी ; सुधाकर-मालवीयः (सम्पादकौ) ; तारा- बुक-एजेन्सी ; वाराणसी ; १९९०
7. *प्रक्रियासर्वस्वम्*; नारायण-भट्टः ; के.पी.नारायण-पिषारोटी (सम्पादकः) ; गुरुवायुर् देवसोम ; केरलम् ; १९९८ प्रथमसंस्करणम्
8. *शिशुपालवधम्*; कालिदासः ; हरगोविन्द-शास्त्री (व्याख्याकारः) ; चौखम्बा-विद्याभवनम् ; वाराणसी ; २०१३ पुनर्मुद्रितम्
9. *लघुशब्देन्दुशेखरः* ; नागेश-भट्टः, प्रो. हरिनारायण-तिवारी (टीकाकारः) ; चौखम्बा संस्कृत भवन, वाराणसी, २०१५ प्रथम संस्करण

✳ ✳ ✳

# तद्धितप्रत्ययविमर्शः

**डॉ.कादम्बिनीपाढिः** *

## Abstract

[पञ्चसु वृत्तिषु अन्यतमा तद्धितवृत्तिः । भगवता पाणिनिना अष्टाध्याय्यां तद्धिताः [अष्टाध्यायी ४.१.७६] इति अधिकारेण तद्धितप्रत्ययानां विधानं कृतम् । यद्यपि सामान्यतः तद्धितप्रत्ययाः विकल्पेन भवन्ति, तथापि केचन नित्यतद्धितप्रत्ययाः अपि सन्ति । केषाञ्चन समासान्तप्रत्ययानामपि तद्धितसंज्ञा विहिता । तद्धितप्रत्ययविधानेऽपि पाणिनिना कुत्रचित् प्रथमान्तेन अर्थनिर्देशः कृतः, कुत्रचित् तिङन्तेन अर्थनिर्देशः कृतः । केचन विलक्षणप्रत्ययाः अपि तद्धिताधिकारे प्राप्यन्ते येषां प्रयोगेण निष्पन्नः शब्दः स्वतन्त्रशब्दत्वेन प्रतीयते । अयं तद्धितान्तः इति नैव ज्ञायते । एते एव विषयाः अस्मिन् प्रबन्धे यथामति आलोच्यन्ते ।]

**कुञ्चिकाशब्दाः** — तद्धिताः, अपत्यम्, समासान्ताः, वृत्तिः, पाणिनिः ।

## १. उपक्रमः

प्रातिपदिकेभ्यः सुबन्तेभ्यश्च तद्धितप्रत्ययाः विधीयन्ते । अत्र पक्षद्वयं वर्तते । प्रातिपदिकेभ्यः तद्धितोत्पत्तिः इत्येकः पक्षः । सुबन्तात् तद्धितोत्पत्तिरिति अपरः पक्षः । यथा— उपगोः अपत्यं पुमान् इति विग्रहे उपगु इति प्रातिपदिकात् अण्प्रत्यये औपगवः इति तद्धितान्तं पदं सिध्यति । तेभ्यः प्रयोगेभ्यः हिताः तद्धिताः इति महासंज्ञा स्वीक्रियते । तेभ्यः नाम प्रयोगेभ्यः, हिताः इत्युक्ते उपकारिणः । अर्थात् ते प्रयोगार्थमुपयुक्ताः सन्ति । तथा च तेषां संयोगेन प्रयोगे मधुरता लघुता चागच्छति । 'प्रियतद्धिताः दाक्षिणात्याः' इति भगवता भाष्यकृता प्रोक्तम् । व्याकरणशास्त्रे तद्धितप्रकरणं व्यापकं भवति । तद्धिताः इत्यधिकारे एते प्रत्ययाः विहिताः भवन्ति । अण्-ठक्-ढक्-यत्-ण्य-इञ्-फक्-इलच्-धा-विनि-त्व-तल्-तसिल्-मतुप्-दा-थाल्-प्रभृतयः तद्धितप्रत्ययाः भवन्ति ।

'परार्थाभिधानं वृत्तिः ।' कृदादिषु पञ्चसु वृत्तिषु तद्धितवृत्तिः भवति द्वितीया । अष्टाध्याय्यां 'तद्धिताः' इति सूत्रं प्रणीतं पाणिनिना । सूत्रमिदं संज्ञासूत्रम्, अधिकारसूत्रञ्च । इतः परं पञ्चमाध्यायस्य समाप्तिपर्यन्तं

---

* प्रवक्त्री, केन्द्रपाडास्थस्य ए.एन्.संस्कृत-महाविद्यालयस्य व्याकरणविभागे, ओडिशासु

ये प्रत्ययाः वक्ष्यन्ते ते तद्धितसंज्ञकाः भवन्ति। अयं तद्धिताधिकारः। अस्मात् सूत्रात् तद्धितप्रत्ययाः आरभन्ते। एतेषां व्याप्तिः पञ्चमाध्यायस्य चतुर्थपादस्यान्तिमसूत्रपर्यन्तं विद्यते। एतेषु सूत्रेषु ये प्रत्ययाः प्रोक्ताः, ते सर्वे तद्धितसंज्ञकाः भवन्ति।

## २. समासान्तानां तद्धितसंज्ञा

तद्धिताधिकारे समासान्ताः प्रत्ययाः अपि उक्ताः सन्ति। एवञ्च समासान्तप्रत्ययानामपि तद्धितसंज्ञा भवति। तद्धितसंज्ञायाः फलं भवति यथा—

क. राज्ञः समीपमित्यर्थे राजन् ङस् उप इत्यलौकिके विग्रहे 'अव्ययं विभक्तिसमीप...' [अष्टाध्यायी २.१.६] इत्यादिना सूत्रेण अव्ययीभावसमासे समासकार्ये उपराजन् इति जाते 'अनश्च' [अष्टाध्यायी ५.४.१०८] इति सूत्रेण टच्प्रत्यये समासान्ते कृते तस्य तद्धितसंज्ञायां 'नस्तद्धिते' [अष्टाध्यायी ६.४.१४४] इति सूत्रेण टेः अन् इत्यस्य लोपे उपराजमिति रूपं निष्पद्यते।

ख. बाहुभ्यां च प्रवृत्तं युद्धमित्यर्थे 'तत्र तेनेदमिति सरूपे' [अष्टाध्यायी २.२.२७] इति सूत्रेण बहुव्रीहिसमासे प्रातिपदिकसंज्ञायां सुपो लुकि 'अन्येषामपि दृश्यते' [अष्टाध्यायी ६.३.१३७] इति सूत्रेण आद्ये बाहुशब्दे दीर्घे 'इच् कर्मव्यतिहारे' [अष्टाध्यायी ५.४.१२७] इति सूत्रेण समासान्ते इच्प्रत्यये तस्याजादित्वमाश्रित्य भसंज्ञायां 'ओर्गुणः' [अष्टाध्यायी ६.४.१४६] इति गुणे ओकारे अयादेशे च बाहूबाहवि इति रूपं सिध्यति।

ग. व्यूढम् उरः यस्य सः इत्यर्थे बहुव्रीहिसमासे 'शेषाद्विभाषा' [अष्टाध्यायी ५.४.१५४] इति सूत्रेण समासान्ते वैकल्पिके कप्प्रत्यये व्यूढोरस्कः इति रूपं जायते। अत्र समासान्तस्य कप्प्रत्ययस्य तद्धितत्वादेव 'लशक्वतद्धिते' [अष्टाध्यायी १.३.८] इति सूत्रे अतद्धिते इति पर्युदासेन ककारस्य इत्संज्ञा न भवति।

इत्थं समासान्तप्रत्ययानां तद्धितसंज्ञायां बहूनि प्रयोजनानि सन्ति।

## ३. नित्यतद्धितप्रत्ययाः

तद्धितप्रकरणे 'समर्थः पदविधिः' [अष्टाध्यायी २.१.१] इति सूत्रं प्रवर्तते। तेन सामर्थ्ये (एकार्थीभावे) सत्त्वेन तद्धितप्रत्ययाः विधीयन्ते। एवं स्थिते तद्धितप्रकरणस्य प्रारम्भे 'समर्थानां प्रथमाद्वा' [अष्टाध्यायी ४.१.८२] इति

सूत्रेपि समर्थपदं श्रूयते । परन्तु अस्य सूत्रस्य समर्थपदं न एकार्थीभावपरम् । अत्र सामर्थ्यं नाम परिनिष्ठितत्वम् । स्पष्टमिदं सिद्धान्तकौमुद्याम्[१] । सूत्रेस्मिन् वा शब्दः एकार्थीभावस्य वैकल्पिकत्वबोधकः ।

एकार्थीभावस्य वैकल्पिकत्वे च अणादितद्धितप्रत्ययानामपि वैकल्पिकत्वं सिध्यति । अत्रापि कृत्समासाविव अलौकिकविग्रहवाक्ये एकार्थीभावं विधाय ततः तद्धिताः प्रवर्तनीयाः । 'समर्थानां प्रथमाद्वा' इति सूत्रानुसारं सर्वेषां तद्धितप्रत्ययानां वैकल्पिकत्वमिति न मन्तव्यम् । केचन नित्यतद्धितप्रत्ययाः सन्ति । तद्यथा— क. तमादयः प्राक्कनः, ख. ञ्यादयः प्राग्वुनः, ग. आमादयः प्राङ्मयटः, घ. बृहती जात्यन्ताः, ङ. समासान्ताः । अषडक्षाशित इति सूत्रे भाष्ये[२] के पुनः नित्यप्रत्ययाः इत्याशंक्य एतेषां पञ्चानामुल्लेखः कृतः ।

**क. तमादयः प्राक्कनः**

'अतिशायने तमबिष्ठनौ'[अष्टाध्यायी ५.३.५५] इति सूत्रादारभ्य 'अवक्षेपणे कन्' [अष्टाध्यायी ५.३.९५] इति सूत्रपर्यन्तमेकत्रिंशत्सूत्रैः त्रयोविंशतिः प्रत्ययाः प्रोक्ताः ।

**ख. ञ्यादयः प्राग्वुनः**

'पूगाञ्ञ्योग्रामणीपूर्वात्' [अष्टाध्यायी ५.३.११२] इति सूत्रादारभ्य 'पादशतस्य संख्यादेर्वीप्सायां वुन्' [अष्टाध्यायी ५.४.१] इति सूत्रं यावत् अष्टभिः सूत्रैः अष्टौ प्रत्ययाः निगदिताः ।

**ग. अमादयः प्राङ्मयटः**

'किमेत्तिङव्ययधादास्वद्रव्यप्रकर्षे' [अष्टाध्यायी ५.४.११] इति सूत्रादारभ्य 'तत्प्रकृतवचने मयट्' [अष्टाध्यायी ५.४.२१] इति सूत्रं यावत् एकादशभिः सूत्रैः दशप्रत्ययाः उक्ताः ।

**घ. बृहती जात्यन्ताः**

'बृहत्या आच्छादने' [अष्टाध्यायी ५.४.६] इति सूत्रादारभ्य 'जात्यन्ताच्छ बन्धुनि' [अष्टाध्यायी ५.४.९] इति चतुर्भिः सूत्रैः त्रयः प्रत्ययाः विहिताः ।

---

१ सि.कौ.सूत्रसंख्या—१०७२, अष्टाध्यायी ४.१.८२ सूत्रे ।

२ महाभाष्यम्, ५.४.७ सूत्रे महाभाष्यम् पृष्ठम्-४०७

### ङ. समासान्ताः

‘बहुव्रीहौ संख्येये डजबहुगणात्’ [अष्टाध्यायी ५.४.७३] सूत्रादारभ्य ‘शेषाद्विभाषा’ [अष्टाध्यायी ५.४.१५४] इति सूत्रपर्यन्तं सप्तपञ्चाशत्सूत्रैः एकादशप्रत्ययाः विहिताः ।

एवमाहत्य एकादशोत्तरशतेन सूत्रैः पञ्चपञ्चाशन्नित्यतद्धितप्रत्ययाः प्रेक्ताः ।

## ४. तद्धितप्रत्ययेषु विशेषसंज्ञा

नित्यतद्धितस्य लक्षणं भवति अविग्रहः । परन्तु नित्यतद्धितप्रत्ययेषु विग्रहं प्रदर्श्यते लोके । यथा— अयमनयोः अतिशयेन पटुः पटुतरः । वस्तुतः नेदं विग्रहवाक्यं किन्तु तद्धितान्तस्य अर्थबोधकं स्वतन्त्रं वाक्यम् । एते प्रत्ययाः विशिष्यार्थबोधकाः न भवन्ति । अपि तु स्वार्थिका एव । अयमनयोरतिशयेन इति तु प्रकृतेरेवार्थः । अतः पटु सु इत्येवमादिभ्यः प्रथमान्तेभ्यः तरबादयः प्रत्ययाः विधीयन्ते । अनित्यतद्धितेषु तु लौकिकविग्रहो भवत्येव ।

भगवतः पाणिनेः तत्तत्सूत्रनिर्देशानुसारं द्विविधः अर्थनिर्देशः ।

क. क्वचित् प्रथमान्तैः पदैः अर्थो निर्दिष्टः । यथा— ‘तस्यापत्यम्’ [अष्टाध्यायी ४.१.९२], ‘परिवृतो रथः’ [अष्टाध्यायी ४.२.१०], ‘संस्कृतं भक्षाः’ [अष्टाध्यायी ४.२.१६] ।

ख. क्वचित् तिङन्तेनैव निर्दिश्यते । यथा— ‘तेन दीव्यति खनति जयति जितम्’ [अष्टाध्यायी ४.४.२], ‘रक्षति’ [अष्टाध्यायी ४.४.३३], ‘पक्षिमत्स्यमृगान् हन्ति’ [अष्टाध्यायी ४.४.३५], ‘निकटे वसति’ [अष्टाध्यायी ४.४.७] ।

पाणिनेः संज्ञाप्रणयनरीतिः विलक्षणा वर्तते । ‘ते तद्राजा’ [अष्टाध्यायी ४.१.१७४] इति सूत्रं चतुर्थाध्यायस्य प्रथमपादे पठितम् । ‘ञ्यादयस्तराजा’ [अष्टाध्यायी ५.३.११९] इति सूत्रं तु पञ्चमाध्यायस्य तृतीयपादे पठितम् । चतुर्थाध्याये पठिता तद्राजासंज्ञा भवति अन्वर्था । तद्राजानमाचक्षाणः तद्राजः इत्यर्थः । पञ्चमाध्याये पठिता तद्राजसंज्ञा तु नान्वर्था । पञ्चमाध्यायविहिताः तद्राजाः स्वार्थिकाः । अत्र प्रयोजनं लुगेव । चतुर्थाध्याये पठिताः तद्राजप्रत्ययाः अन्वर्थाः । एवञ्च ‘ते तद्राजाः’, ‘ञ्यादयस्तद्राजाः’ इति सूत्रद्वयेन त्रयोदशानां प्रत्ययानां तद्राजसंज्ञा कथिता ।

‘अतिशायने तमबिष्ठनौ’ इति सूत्रेण द्विवचनविभज्योपपदे तरबीयसुनौ

इति सूत्रेण च अतिशायने अर्थे तमप्, इष्ठन्, तरप्, ईयसुन् इति चत्वारः प्रत्ययाः प्रोक्ताः । एतेषु तरप्तमपोः प्रत्यययोः 'तरप्तमपौ घः' इति सूत्रेण घसंज्ञा विहिता । इयं घसंज्ञा तद्धितप्रकरणे न विहिता, किन्तु प्रथमाध्याये पठिता । यतो हि अस्याः संज्ञायाः प्रयोजनं न केवलं तद्धितप्रकरणे वर्तते अपि तु प्रकरणान्तरेपि ।

### ५. तद्धितप्रत्ययेषु कानिचन विलक्षणानि

तद्धितप्रकरणे केचन तद्धितान्ताः तद्धितरहिताः अव्युत्पन्नाः इव दृश्यन्ते । एवं केचन प्रत्ययाः अपि अव्युत्पन्नशब्दाः इव प्रतीयन्ते । वस्तुतः न ते अव्युत्पन्नशब्दाः । यथा—

क. लोके विशालम्, विशङ्कटम् इति द्वौ शब्दौ व्यवहृतौ । विस्तृतमिति तदर्थः । अत्र 'वेः शालच्छङ्कटचौ' [अष्टाध्यायी ५.२.२८] इति सूत्रेण विशब्दात् शालच्, शङ्कटच् इति प्रत्ययौ प्रवर्तेते । किन्तु अनयोः द्वयोः शब्दयोः इमौ द्वौ प्रत्ययौ स्तः इति प्रायो न ज्ञायते । विशालविशङ्कटशब्दयोः स्वतन्त्रशब्दत्वेन भानं भवति ।

ख. एवं विना, नाना इत्यत्रापि वि, न इति निपाताभ्यां 'विनञ्भ्यां नानाञौ न सह' [अष्टाध्यायी ५.२.२७] इति सूत्रेण नप्रत्यये, आनप्रत्यये च विना, नाना इति शव्दौ सिद्धौ भवतः ।

ग. केचन प्रत्ययाः अव्युत्पन्नशब्दत्वेन दृश्यन्ते । यथा— गोगोष्ठम् । अत्र गवां स्थानमित्यर्थे गोशब्दात् 'गोष्ठजादयः स्थानादिषु पशुनामभ्यः'[३] इति वार्त्तिकेन गोष्ठच्प्रत्ययो विधीयते । तेन गोगोष्ठमिति पदं सिध्यति ।

घ. अवीनां संघातः इत्यर्थे 'अविशब्दात् विस्तारे पटच्'[४] इति वार्त्तिकेन पटच्प्रत्ययो विहितः । तेन अविपट इति रूपं सिद्धम् ।

ङ. एवं कश्चित् प्रत्ययः स्वतन्त्रतया लोके प्रयुज्यते । यथा अधुना । इदं शब्दात् सप्तम्यन्तात् कालवाचकात् स्वार्थे 'अधुना' [अष्टाध्यायी ५.३.१७] इति सूत्रेण अधुनाप्रत्ययो विधीयते । इदम् अधुना इति दशायां 'त्यदादीनामः' [अष्टाध्यायी ७.२.१०२] इति सूत्रेण मकारस्य स्थाने अकारादेशे 'अतो गुणे' [अष्टाध्यायी ६.१.९७] इति पररूपे इद अधुना

[३] सिद्धान्तकौमुदी, पृष्ठम्-२९६

[४] सिद्धान्तकौमुदी, पृष्ठम्-२९६

इति जाते 'इदम् इश्' [अष्टाध्यायी ५.३.३] इति सूत्रेण इदंशब्दस्य स्थाने इशादेशे शकारस्यानुबन्धलोपे इ अधुना इति स्थिते 'यस्येति च' [अष्टाध्यायी ६.४.१४८] इति इकारलोपे (एतावता सम्पूर्णा प्रकृतिः लुप्ता) अधुना इति रूपं सिध्यति । अत्र प्रत्यय एव शिष्यते । अस्मिन् काले इति तदर्थः ।

च. इयान् इति शब्दः पुंलिङ्गे वर्तते । इदं शब्दात् परिमाणार्थे इदं परिमाणमस्य इत्यर्थे 'किमिदम्भ्यां वो घः' [अष्टाध्यायी ५.२.४०] इति सूत्रेण वतुप्प्रत्ययो विधीयते । अनेनैव सूत्रेण वस्य स्थाने घादेशो भवति । अत्रापि घस्थाने इयादेशे इदं स्थाने ईशादेशे च शकारस्यानुबन्धलोपे यस्येति च इति सूत्रेण ईकारलोपे इयत् इति रूपं भवति । तत्र शब्दाधिकारप्रक्रियायाम् इयान् इति रूपम् । अत्रापि प्रत्यय एव श्रूयते ।

**६. उपसंहारः**

अष्टाध्याय्यां तद्धिताधिकारे २८१ प्रत्ययाः प्रोक्ताः पाणिनिना । विभिन्नेषु अर्थेषु भिन्नेभ्यः प्रतिपदिकेभ्यः एते प्रत्ययाः विहिताः भवन्ति । सर्वे तद्धितप्रत्ययाः सर्वेषु अर्थेषु सर्वेभ्यः प्रातिपदिकेभ्यो न भवन्ति । तद्धितवृत्तौ अपत्यार्थादारभ्य परिवापणमित्यर्थं यावत् ९२६ संख्याकैः सूत्रैः १४० वार्त्तिकैश्च ३०२ अर्थेषु २६४ अणादयस्तद्धितप्रत्ययाः विहिताः ।

✶ ✶ ✶

## Bibliography


1. *वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीसहिता)*; भट्टोजिदीक्षितः ; गिरिधरधर्मा-चतुर्वेदः ; परमेश्वरानन्दशर्मा-विद्याभास्करः(सम्पादकौ) ; मोतीलाल बनारसीदास ; दिल्ली ; २०१४ द्वादश-पुनर्मुद्रणम् ।
2. *व्याकरणमहाभाष्यम्* ; पतञ्जलिः ; भार्गव-शास्त्री-जोशी (संशोधकः) ; चौखम्बा-संस्कृत-प्रतिष्ठानम् ; दिल्ली ; २०१४ पुनर्मुद्रितं संस्करणम् ।
3. *काशिका (न्यास-पदमञ्जरी-भावबोधिनी-सहिता)*; वामन-जयादित्यौ ; जयशङ्करलाल-त्रिपाठी ; सुधाकर-मालवीयः (सम्पादकौ) ; तारा- बुक-एजेन्सी ; वाराणसी ; १९९० ।


✳ ✳ ✳

# परवर्तिवैयाकरणैः न्यासमतखण्डनम्

**मानसीमालः ***

## Abstract

[जिनेन्द्रबुद्धिकृतन्यासटीकायां काशिकावृत्तेः सर्वेषां विषयाणां चर्चा विहिता । न्यासकारस्य मतस्य खण्डनं क्रियते उत्तरवर्तिवैयाकरणैः । 'अग्रेवणम्' इति संज्ञा न्यासकारेण स्वीक्रियते । किन्तु परवर्तिवैयाकरणैः इयं संज्ञा न स्वीक्रियते । न्यासकारस्य वक्तव्यं 'यवलपरे यवला वा' [वार्तिकम् २९] इति वार्तिकानुसारेण 'अण्' इति सवर्णग्रहणं स्यात्, यच्च 'अणुदित्सवर्णस्य चाप्रत्ययः' [अष्टाध्यायी १.१.६९] इति सूत्रानुसारेण उपपन्नं नास्ति । भाष्यं हि परमं प्रमाणमिति स्वीकृत्य उत्तरवर्तिवैयाकरणैः न्यासकारमतं खण्ड्यते । उत्तरोत्तरं मुनीनां प्रामाण्यम् इति वचनं न्यासकारेण न स्वीक्रियते । काशिकाकारेणापि बहुषु स्थानेषु भाष्यकारस्य मतस्य खण्डनं कृत्वा वृत्तिकाराणां मतं समर्थ्यते । विषयेऽस्मिन् शबरस्वामिना उक्तम्— 'सद्वादित्वात् पाणिनेर्वचनं प्रमाणम् असद्वादित्वान्न कात्यायनस्य ।'[१] परवर्तिनि काले न्यासकारस्य व्याख्यानं 'तस्य समूहः' [अष्टाध्यायी ४.२.३७], 'काम्यच्च' [अष्टाध्यायी ३.१.९], 'दधातेर्हिः' [अष्टाध्यायी ७.४.४२], 'भवतेरः' [अष्टाध्यायी ७.४.७३] इत्यादीनां सूत्राणां विचारप्रसङ्गे निराक्रियते परवर्तिवैयाकरणैः ।]

**कुञ्चिकाशब्दाः** — सूत्रम्, न्यासमतम्, प्रत्ययः, आदेशः, आगमः, स्वरः ।

## भूमिका

व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दाः असाधुशब्देभ्यः पृथक्कृत्य ज्ञायन्ते येन इति तद् व्याकरणम् । इदं व्याकरणं षडङ्गेषु प्रधानम् । व्याकरणेन शब्दानाम् अन्वाख्यानं क्रियते । व्याकरणशास्त्रस्य अनेके ग्रन्थाः महर्षिभिः विरचिताः । सर्वेषु व्याकरणग्रन्थेषु पाणिनीयव्याकरणं प्रामुख्यं भजते । अत उक्तम् —

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥

[प्रक्रियाकौमुदी ७.३.५६]

पाणिनीयव्याकरणस्य प्रसिद्धत्वात्, अस्य बहवः व्याख्यानग्रन्थाः प्राप्यन्ते । पाणिनीयसूत्राणाम् उपरि अनेके वृत्तिग्रन्थाः सन्ति । तेषु वामन-

---

* शोधच्छात्रा, रायगञ्जविश्वविद्यालयस्य संस्कृतविभागे, पश्चिमवङ्गेषु ।

[१] मीमांसाशाबरभाष्यम् १०.८.४

जयादित्याभ्यां प्रणीतो काशिकानामको वृत्तिग्रन्थः प्राचीनः प्रसिद्धः च वर्तते । काशिकायाः समुपलब्धेषु व्याख्यानग्रन्थेषु जिनेन्द्रबुद्धेः न्यासटीका, हरदत्तमिश्रप्रणीता पदमञ्जरीटीका च प्रसिद्धा वर्तते ।

१. **काम्यच्च** [अष्टाध्यायी ३.१.९] इति सूत्रस्यार्थः सुबन्तात् कर्मणः आत्मेच्छायां विषये काम्यच् प्रत्ययः स्यात् । सूत्रस्य व्याख्याप्रसङ्गे वार्तिककारेण भाष्यकारेण च निरूपितम्— काम्यच्-प्रत्ययस्य चित्-करणम् अनर्थकम्, यतः चित्-करणस्य प्रयोजनं 'चितः' [अष्टाध्यायी ६.१.१६३] इति सूत्रेण अन्तोदात्तत्वम् । किन्तु इदं प्रयोजनं 'धातोः' [अष्टाध्यायी ६.१.१६२] इति सूत्रेण सिद्ध्यति । अतः चित्-करणस्य प्रयोजनं नास्ति । परन्तु न्यासकारेण चित्-करणस्य प्रयोजनविषये उक्तम्— *अथ द्वितीयश्चकारः किमर्थः? यावता 'धातोः' इत्येवमन्तोदात्तत्वं सिद्धम्? इह 'पुत्रकाम्यिष्यति' इति सतिशिष्टस्वरमपि बाधित्वा चित्करणसामर्थ्यात् काम्यच एव स्वरो यथा स्यात् ।* अर्थात् न्यासकारस्य वक्तव्यं यत् पुत्रकाम्यादि-प्रयोगविषये धातुस्वरस्य अन्तोदात्तत्वं सिद्धं भवति । अस्मिन् विषये चित्-करणस्य आवश्यकता नास्ति । किन्तु पुत्रकाम्यिष्यति इति प्रयोगविषये स्य-इत्यत्र धातुस्वरः सतिशिष्टस्वरो भवति । अतः अस्मिन् प्रयोगविषये आचार्यपाणिनिना काम्यच्-प्रत्ययस्य चित्-करणं कृतम् ।

न्यासकारस्य व्याख्यानं हरदत्तमिश्रः, सायनाचार्यः, स्वामिदयानन्दसरस्वत्यादयः उत्तरवर्तिवैयाकरणाः अनुसृतवन्तः । किन्तु भट्टोजिदीक्षितः न्यासकारस्य वक्तव्यं खण्डयति । शब्दकौस्तुभग्रन्थे भट्टोजिदीक्षितेन उक्तम्— *चकारस्तु भाष्यवार्तिकयोः प्रत्याख्यातः । न्यासकार-हरदत्त-माधवास्तु पुत्रकाम्यिष्यतीत्यादौ सतिशिष्टमपि स्य-स्वरं बाधित्वा धातुस्वरौ यथा स्याताम् इत्येतदर्थं चित्करणमित्याहुः । तत्तु प्रौढिवादमात्रं मुनिवचनविरोधेन स्वोत्प्रेक्षितस्वारस्यस्य अनादर्त्तव्यत्वादिति सुहृदयैर्विभाव्यताम् ।*[2]

नागेशभट्टेन उक्तम्— *काम्यचश्चित्करणानर्थक्यमिति वार्तिकविरोधेन पुत्रकाम्यिष्यतीत्यादौ सति शिष्टस्य स्वरं बाधित्वा चित्स्वर एव यथा स्यादिति चित्त्वम्— इति हरदत्तोक्तमपास्तम् ।*[3]

---

[2] काम्यच्च, शब्दकौस्तुभः

[3] काम्यच्च, उद्योतव्याख्या

बृहच्छब्देन्दुशेखरे अस्ति— *धातुस्वरेण सिद्धेऽस्य चित्त्वं व्यर्थम् । माधवस्तु पुत्रकाम्यिष्यतीत्यादौ सतिशिष्ट-स्य-स्वरं बाधित्वा धातुस्वरो यथा स्यादिति चित्त्वमित्याह ।*[४]

लघुशब्देन्दुशेखरे अस्ति— *धातुस्वरेण सिद्धेऽस्य चित्त्वञ्चिन्त्यप्रयोजनम् ।*[५]

**२. दधातेर्हिः** [अष्टाध्यायी ७.४.४२] इति सूत्रस्यार्थः दधातेरङ्गस्य 'हि' इति आदेशो भवति तकारादौ किति प्रत्यये परे । सुत्रस्य व्याख्याप्रसङ्गे न्यासकारेण उक्तम्— *श्तिपा निर्देशो यङ्लुक्-निवृत्त्यर्थः । तेन यङ्लुगन्तस्य हिरादेशो न भवति । दाधीतः, दाधीतवान्, दाधीत्वेति ।*[६] अस्यार्थः भवति— 'श्तिपा शपानुबन्धेन' इति परिभाषानुसारं यङ्लुगन्तप्रकरणे अस्य सूत्रस्य प्रयोगो नास्ति । यतो हि सूत्रस्थदधातेरिति पदे श्तिपः निर्देशो वर्तते । यङ्लुकि क्तप्रत्यये परे दाधाक्त इत्यत्र 'घुमास्थागापाजहातिसां हलि' [अष्टाध्यायी ६.४.६६] इति सूत्रानुसारेण आकारस्य स्थाने ईकारे कृते 'दाधीतः' इति प्रयोगो भवति । अनेन प्रकारेण 'दाधीतवान्', 'दाधीत्वा' इत्यादीनि रूपाणि सिध्यन्ति । न्यासकारस्य व्याख्यानम् उत्तरवर्तिवैयाकरणैः खण्डितम् । तथाहि भट्टोजिदीक्षितेन प्रौढमनोरमायाम् उक्तम्— *श्तिपा निर्देशो धेटो निवृत्त्यर्थः । तीत्यनुवृत्तेर्यङ्लुकि तु 'दाधितः' । अत्रापि प्रसादकृता श्तिपा निर्देशस्य यङ्लुङ्निवृत्त्यर्थत्वाद् दाधीत इति घुमास्थेतीत्त्वमुदाहृतं तत्पूर्ववदेव हेयम् ।*[७]

अभयनन्दिना उक्तम्— *अनुबन्धनिर्देशो यङुबन्तनिवृत्त्यर्थः । दाधीतः, दाधीतवान् ।*[८]

हरदत्तमिश्रेणापि उक्तम्— *श्तिपा निर्देशो धेटो मा भूदिति । 'ध' इत्युच्यमाने धेटोऽप्यनुकरणं सम्भाव्येत, यथा दाधाघ्वदाप् इत्यत्र । यङ्लुकि त्विटि सति 'दाधितः' इति भवति ।*[९]

---

४ बृहच्छब्देन्दुशेखरः, पृ.१८८१

५ लघुशब्देन्दुशेखरः, पृ.२९३

६ काम्यच्च, न्यासव्याख्या

७ दधातेर्हिः, प्रौढमनोरमा

८ जैनेन्द्रमहावृत्तिः ५.२.१४६

९ दधातेर्हिः, पदमञ्जरीव्याख्या

**३. भवतेरः** [अष्टाध्यायी ७.४.७३]— सूत्रस्य व्याख्यानप्रसङ्गे न्यासकारस्य वक्तव्यम्— *श्तिपा निर्देशो यङ्लुग्निवृत्त्यर्थः— बोभावेति ।*[१०] न्यासकारस्य वक्तव्यम् अनुसृत्य हरदत्तमिश्रेणापि उक्तम्— *श्तिपा निर्देशो यङ्लुग्निवृत्त्यर्थः ।*[११]

**४. तस्य समूहः** [अष्टाध्यायी ४.२.३७]— अस्य सूत्रस्य व्याख्याप्रसङ्गे काशिकावृत्तौ 'शौकम्' इति उदाहरणं प्रदत्तम् । 'शौकम्' इति शब्दस्यार्थः शुकानां समूहः शौकमिति । विषयेऽस्मिन् न्यासकारस्य वक्तव्यम्— *काकम्, शौकम्, बाकमिति । काक-शुक-बकशब्दा आद्युदात्ताः, 'प्राणिनां कुपूर्वाणाम्' [फिट् सूत्रम्] इत्यनेन । अस्यायमर्थः— प्राणिविशेषवाचिनां शब्दानां ये आदिभूताः कवर्गात् पूर्वं तेषामुदात्तो भवतीति ।*[१२] न्यासकारस्य व्याख्यानं परवर्तिवैयाकरणैः खण्डितम् । हरदत्तमिश्रेण उक्तम्— *तत्र शौकमित्यनुदाहरणम्, खण्डिकादिषु पाठात् । बकशब्दस्तूदाहार्यः ।*[१३] भट्टोजिदीक्षितेनापि उक्तम्— *इह शौकमिति वृत्तिन्यासयोरुदाहृतम् । तदन्याय्यम् । खण्डिकादिषु शुकशब्दस्य भाष्ये वृत्तौ च पठितत्वेनाजन्तत्वात् ।*[१४]

**५. डः सि धुट्** [अष्टाध्यायी ८.३.२९]— अस्य सूत्रस्य व्याख्यानप्रसङ्गे न्यासकारस्य वक्तव्यम्— सूत्रस्थस्य 'धुट्'-शब्दस्य स्थाने 'तुट्'-आगमं कृत्वा प्रयोगगतं लाघवं भवति । अपि च 'चर्त्वम्' इत्यस्य प्रयोजनं नास्ति । विषयेऽस्मिन् न्यासकारेण उक्तम्— *प्रक्रियालाघवार्थं तु तुटि वक्तव्ये धुड्वचनमुत्तरार्थम् । नश्च इत्यत्र धुड् यथा स्यात् तुड् मा भूदिति । यदि हि स्यात्तर्हि किम्? भवान्त्साय इत्यत्र नश्छव्यप्रशान् इति रुः प्रसज्येत? नैतदस्ति, अम्पर इत्यत्रानुवर्तते, न चेहाम्परस्तकारोऽस्ति । अथेहापि भूतपूर्वेण उकारेणाम्परः स्यात्? एवमप्यसिद्धत्वात्तुटो रुत्वं न भविष्यति । तस्मात् तुडेव वक्तव्यः । एवं तर्हि वैचित्र्यार्थं धुड्वचनम् ।*[१५] न्यासकारस्य

[१०] भवतेरः, न्यासव्याख्या
[११] भवतेरः, पदमञ्जरीव्याख्या
[१२] तस्य समूहः, न्यासव्याख्या
[१३] तस्य समूहः, पदमञ्जरीव्याख्या
[१४] तस्य समूहः, शब्दकौस्तुभः
[१५] डः सि धुट्, न्यासव्याख्या

वक्तव्यं खण्ड्यते उत्तरवर्तिवैयाकरणैः । भट्टोजिदीक्षितेन प्रौढमनोरमायाम् उक्तम्— *यत्त्वाहुः— एवमपि प्रक्रियालाघवार्थं तुडेव कर्त्तुमुचित इति, तन्न । 'चयो द्वितीयाः'— इति पक्षे थकारापत्तेः ।*[१६]

नागेशभट्टेन उक्तम्— *चर्त्वस्याऽसिद्धत्वाच्चयो द्वितीया इति न । अत एव 'डः सि तुट्' इति नाऽसूत्रि ।*[१७]

**उपसंहारः**

न्यासे सर्वेषां पाणिनिसूत्राणां व्याख्या विहिता । न्यासस्य भाषा सरला, सुगमा, सहजबोध्या च वर्तते । न्यासस्य रचनाशैली अतीव गम्भीरज्ञानप्रदा च वर्तते । अतः न्यासग्रन्थः सर्वेषां छात्राणां विदुषां च कृते उपकारकः भवति । अपि च न्यासव्याख्यानेन सरलतया सम्यग्रूपेण च बोधो जायते । अतः परवर्तिवैयाकरणेषु न्यासकारस्य अतीव प्रभावः परिलक्ष्यते । तथापि न्यासकारस्य मतं खण्डितं परवर्तिवैयाकरणैः । एतेषु भट्टोजिदीक्षितः, नागेशभट्टः, हरदत्तमिश्रः चेत्यादयः वैयाकरणाः न्यासकारस्य विविधानि मतानि अखण्डयन् ।

✶ ✶ ✶

## Bibliography


1. *जैनेन्द्रमहावृत्तिः*; आचार्यः अभयनन्दी; शम्भुनाथत्रिपाठी (सम्पादकः); भारतीयज्ञानपीठम्; काशी; १९५६ ।
2. *काशिकायां पठितवार्तिकानां समीक्षा*; ऋद्धिनाथः झा; कलाप्रकाशनम्; वाराणसी; २०१३ ।
3. *लघुशब्देन्दुशेखरः (भैरवमिश्रकृतटीकासहितः)*; नागेशभट्टः; श्रीवैकुण्ठनाथशास्त्री (सम्पादकः); चैखम्बा सुरभारती प्रकाशन; वाराणसी; २०१७ ।
4. *बृहच्छब्देन्दुशेखरः*; नागेशभट्टः; श्रीसीतारामशास्त्री (सम्पादकः); सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः; वाराणसी; १९६० ।
5. *व्याकरणमहाभाष्यम् (प्रदीपोद्योतसंवलितम्)*; नागेशभट्टः; भार्गवशास्त्री (सम्पादकः); चैखम्बासंस्कृतप्रतिष्ठानम्; दिल्ली; १९८८ ।


[१६] डः सि धुट्, प्रौढमनोरमा

[१७] बृहच्छब्देन्दुशेखरः, पृ.२६२

6. *अष्टाध्यायीसूत्रपाठः* ; महर्षिपाणिनिः ; पुष्पादीक्षितः (सम्पादिका) ; संस्कृतभारती ; नवदेहली ; २०१९ ।
7. *काशिका (न्यास-पदमञ्जरी-भावबोधिनी-सहिता)*; वामनजयादित्यौ ; जयशङ्करलालत्रिपाठी (सम्पादकः) ; तारा बुक एजेन्सी ; वाराणसी ; २०१६ ।
8. *काशिका (न्यास-पदमञ्जरी-सहिता)*; वामनजयादित्यौ ; नारायणमिश्रः (सम्पादकः) ; रत्ना पब्लिकेशन ; वाराणसी ; १९८५ ।
9. *काशिका*; (भागः १, २) ; वामनजयादित्यौ ; आर्येन्द्रशर्मा (सम्पादकः) ; संस्कृतपरिषद्, उस्मानियाविश्वविद्यालयः ; हैदराबादः ; १९७० ।
10. *काशिका का समालोचनात्मक अध्ययन*; रघुवीर वेदालंकार ; नाग पब्लिशर्स ; दिल्ली ; १९७७ ।
11. *काशिकावृत्ति-वैयाकरणसिद्धान्तकौमुद्योः तुलनात्मकमध्ययनम्*; महेशदत्तशर्मा ; निरुपमा प्रिन्टर्स ; नईदिल्ली ; १९८५ ।
12. *न्यास पर्यालोचन*; भीमसेन शास्त्री ; भैमीप्रकाशन ; दिल्ली ; १९७९ ।

* * *

# रावणार्जुनीयमहाकाव्ये अष्टाध्यायीसूत्रक्रमानुसारं विभक्तिप्रयोगः

**अरिजित्-गुप्तः** *

[अयं शोधलेखः पाणिनीयाष्टाध्यायी-सूत्राणां क्रममनुसृत्य भट्टभीमकृतस्य रावणार्जुनीयमहाकाव्यस्य विभक्तिप्रयोगाणां समालोचनात्मकमध्ययनं प्रस्तौति। विशेषतः षष्ठकाण्डे द्वितीयाध्यायस्य तृतीयपादस्थविभक्तिसूत्राणां द्वितीयातः सप्तमीपर्यन्तं क्रमबद्धं निरूपणं कृतम्। कर्तृकर्मादिकारकविभक्तीनां तथा उपपदनिबद्धविभक्तीनां प्रयोगाः प्रकृतिचित्रणेन विप्रलम्भशृङ्गारवर्णनैश्च सह काव्यप्रवाहे संयोजिताः। एवं कविः परम्परागतव्याकरणग्रन्थेषु दृष्टानां कृत्रिमोदाहरणानां स्थाने कथानुरूपाणि ललितानि पदानि प्रायुङ्क्त। तेन व्याकरणशास्त्रं काव्यिकलालित्येन समन्वेति।]

**कुञ्चिकाशब्दाः** — कारकम्, विभक्तिः, महाकाव्यम्, सूत्रम्, अष्टाध्यायी।

## भूमिका

व्याकरणादिशास्त्राणां पदप्रयोगादीनां काव्यमार्गेण याथातथ्येन व्याख्यानाय निर्मितं काव्यरूपं शास्त्रकाव्यमित्याख्यां लभतेरूपम्। शास्त्रकाव्यतया भट्टिकविना प्राथम्येन विरचितं विंशतिसर्गात्मकं रावणवधाख्यं महाकाव्यम्। भट्टिकवेः कल्पनासाफल्यं शास्त्रकाव्यस्य रोचकत्वं च दर्शं दर्शमनुवर्तिनः कवयोऽनुप्रेरणां लभमानाः समप्रकारके काव्यनिर्माणे प्रयत्नशीला दृश्यन्ते। एतेषु कश्मीरनिवासकर्ता भट्टभीमो भौमको वा विशेषस्थानभाग्भवति, तस्य रावणार्जुनीयाख्यस्य शास्त्रकाव्यस्य रचयितृत्वात्।

रावणार्जुनीयस्य कर्ता भट्टभीमो भट्टभौमको वा कस्मिन् काले कस्मिन्देशे कस्मिन्भूमण्डले जनिमलभत तन्निश्चयेन वक्तुमसाम्प्रतम्। सुवृत्ततिलके आचार्यः क्षेमेन्द्रः शास्त्रकाव्यकर्तृतया भट्टिकविना सह भट्टभीममपि उल्लिलेख—

> शास्त्रकाव्यं चतुर्वर्गप्रायं सर्वोपदेशकृत्।
> भट्टि-भौमककाव्यादि काव्यशास्त्रं प्रचक्षते॥

[सुवृत्ततिलकम् ३.४]

* सहायकाध्यापकः, संस्कृतविभागे, द्विजेन्द्रलालरायमहाविद्यालयस्य, कृष्णनगरस्थितस्य, Email : arijitgupta89@gmail.com

महाकाव्यमिदं कार्तवीर्यार्जुनरावणयोः सङ्गरवर्णनव्याजेन वैदिकसूत्राण्यपास्य अष्टाध्यायीस्थानाम् अखिलानां सूत्राणाम् अष्टाध्यायीक्रमेणैव प्रयोगान् प्रदर्शयति। महाकाव्यस्य सप्तविंशतौ सर्गेषु अष्टाध्यायीपादविभागविधिना संरचनं साधितम्। सामूहिकतया, सप्तविंशतिसर्गात्मके रावणार्जुनीये महाकाव्ये राज्ञः कृतवीर्यसूनोः अर्जुनस्य चरित्रवर्णनं तथा च रावणेन सह तस्य युद्धवर्णनं च निबध्यते।

अष्टाध्यायीक्रमानुसारं चतुर्थे पञ्चमे च सर्गे समासविषयिसूत्रोदाहरणैः नृपस्य नर्मदाजलविहारं तथा सूर्यास्तसमयं तदनन्तरं सन्ध्याकालं च वर्णयति महाकविर्भट्टभीमः। षष्ठसर्गे लब्धावसरो महाकविः विभक्तिविधायकैः सूत्रैः विषयक्रममनुसृत्यैव चन्द्रोदयवर्णनं रात्रिक्रीडाचित्रणञ्च विदधाति। अष्टाध्याय्याः द्वितीयाध्यायस्य तृतीयपादे अनभिहिताधिकारादारभ्य द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठीत्याद्याश्रित्य सप्तमीपर्यन्तं प्रायः सर्वाणि विभक्तिविधायीनि सूत्राणि काव्यात्मकतया उदाहृतानि। अत्र विभक्तिषु कारकजन्या उपपदजन्या चोभयप्रकारा विभक्तिः चन्द्रोदयादिवर्णनप्रसङ्गे प्रयुक्ता दृश्यते।

अस्मिन् सर्गे चन्द्रोदयवर्णनसनाथेनैव नायिकाम् आलम्बनीकृत्य विप्रलम्भशृङ्गारः परिस्फुरितः। प्रसङ्गेऽस्मिन् विरहिणी नायिका दयितानयनाय दूतीं सखीं वाऽऽदिशतीति विषयः भृशमुवर्णितम्। एवञ्च, रात्रिकालिकी रमणीया प्रकृतिः, कुमुद्वती-सरोजिनीत्यादयः, तत्सम्बन्धिनः भ्रमराश्च स्वाभाविकतया कवित्वशक्त्या श्लोकत्वमाप्नुवन्ति। चन्द्रोदयमुहूर्ते पृथिव्याः रूपान्तरं रमणीयत्वप्राप्तिः, शृङ्गारविस्तारे चन्द्रस्य सक्रियतामनुस्मृत्य चन्द्रस्तुतिमपि प्रस्तौति महाकविर्भट्टभीमः। चन्द्रोदयानन्तरं रात्रिकलिकी क्रियावली विप्रलम्भशृङ्गारपरिवेशनेन उपन्यस्ता। अत्र महाकवेः काव्यप्रतिभा नितरां चकास्तितमाम्। अत्र शास्त्रकाव्यस्य सीमानमतिक्रम्य काव्यत्वावच्छिन्नरूपेण रावणार्जुनीयं साहित्यिकोपकरणैः संवर्धितम्। नायक-प्रतिनायकयोः वीररसाश्रितं युद्धादिवर्णनं विहायात्र विप्रलम्भशृङ्गाररसेन महाकाव्यकदम्बं विलसति।

**द्वितीया विभक्तिः**

द्वितीयाविधायकसूत्राणि उदाहर्तुं विविधविषयाः कविना संगृहीताः। तद्यथा, रवावस्तमिते चन्द्रोदयः, चन्द्रिकापरिव्याप्त्या

जगतः परिपूर्तिः, दिनावसाने भृङ्गाणाम् अवस्थान्तरम्, चन्द्रोदये तारकाणां तेजप्रतापाश्च, चन्द्रद्युतेः मेघान्तर्भागं परित्यज्य प्रकाशनम्, कौमुदीपरिव्यापने प्रियाविरहकातरायाः विरहिण्या अस्थैर्यम्, सन्ध्याकालिकी प्रवृत्तीत्यादिविषयाः द्वितीयाविभक्तिविधायिभिः सूत्रैः श्लोकरूपतामाप्तवन्तः ।

षष्ठसर्गारम्भे प्रथमश्लोकेन चन्द्रोदयवर्णने अन्तरान्तरेण युक्ते [अष्टाध्यायी २.३.४] इति सूत्रमुदाहृतम् । पूर्वस्यां दिशि चन्द्ररश्मिद्युतिः कलिकेव भासमानं सौन्दर्यं व्यतनोत् । अत्र कविर्निगदति—

अथान्तरेणोद्यदनेकताराम् धर्माधिपाशां दिशमुत्तराञ्च ।
उवाह शीतांशुकरालिदृश्यां मूर्ध्नोदयाद्रिः कलिकायमानाम् ॥
[रावणार्जुनीयम् ६.१]

चन्द्रकौमुदी सूर्यरश्मिरिव पूर्वस्याः पश्चिमस्याश्च दिशः मध्यभागे रमणीयत्वमातनोत्—

प्राचीं प्रतीचीं च दिशं हिमांशोः सूतोऽन्तरा भानुवदुष्णरश्मेः ।
[रावणार्जुनीयम् ६.२]

चन्द्रोदये कुमुद्वती विकसति, भ्रमराः कुमुद्वतीसौरभाकृष्टाः पद्मिनीं परित्यज्य कुमुद्वतीमन्विष्यन्तः क्रोशव्यापिमार्गं गुञ्जन्तो व्रजिताः—

चुक्रोश चक्राह्वयुगं त्रियामाम्... ।
...भृङ्गा ययुः क्रोशमपि क्वणन्तः ॥ [रावणार्जुनीयम् ६.३]

सखानयने दूतीं दत्तादेशा काचित् कुलस्त्री प्रियविरहिता मदनपीडिता सती सखीं प्रति स्वमनस्थितिं प्रकाशयतीत्यत्र 'अभितः-परितः-समयानिकषा-हा-प्रतियोगेऽपि' इति वार्तिकं प्रयुक्तम् । एकस्मिन्नेव श्लोके पञ्च-अव्ययानां प्रयोगे विरहिण्याः मनोभावनां बोधयति शास्त्रकविर्भट्टभीमः—

धिक् त्वां न यातासि सखि प्रियार्थं हा मां कथं यास्यति मे त्रियामा ।
धृतेषुरास्ते समयात्मभूर्मां काचिज्जगादेति सखीं कुलस्त्री ॥
[रावणार्जुनीयम् ६.१५]

सूर्यास्तेरनन्तरं तमिस्रां विनाशयन्, मृदुरश्मिः चन्द्रकान्तिः उदयाचलमारुह्य सूर्याकृतेः स्तोकेन हीनोऽभवत् । सूर्यः प्रखरतेजाः, तमोभङ्गाय शक्ततरः, चन्द्रस्तु मृदुकरः, तथापि तमोनाशने तस्य प्रवृत्तेः, सूर्यापेक्षया तस्य हीनत्वमेव द्योत्यत इत्याह महाकविः—

शीतांशुरुद्यन्नुदयाद्रिशृङ्गमारुह्य सूर्याकृतिमन्वतिष्ठत् ।

[रावणार्जुनीयम् ६.८]

**तृतीया विभक्तिः**

श‍ृङ्गारशास्त्रानुसारं प्रियया पीतशेषं मधु पिबन्ति प्रणयाभिलाषिणः । अत्र प्रणयपरिणामविषये महाकविना वर्णितम् । श‍ृङ्गारक्रियायां पानविधौ वनिताजनैः पातुमारब्धं मद्यं चतुरः पतिः आस्वाद्य पश्चाद्ददातीत्यत्र प्रणयिणः अभिप्रायबोधनाय 'प्रकृत्यादिभ्य उपसंख्यानम्' इति वार्तिकमुदाहृतम्—

आस्वाद्य दत्तं प्रतिपक्षदृष्टं तत्र प्रकृत्या चतुरेण पत्या ॥

[रावणार्जुनीयम् ६.२३]

तृतीयाविभक्तिविधायकं प्रधानं सूत्रं- कर्तृकरणयोस्तृतीया [अष्टाध्यायी २.३.१८], चन्द्रकिरणेन भिद्यमानः मत्तगजेन्द्रः उदयाचलं त्यक्त्वा सङ्कोचत्वमाप्नोति । अत्र मृगाधिपतया चन्द्रवर्णने उपमारूपकश्लेषसनाथेन सङ्करालङ्कारः प्रयुक्तः । शास्त्रेण साकं कवित्वं युगपत् संयुक्तम् । निशि चन्द्रोदये सति पङ्कजानि सङ्कुचीयन्ते स्म । कवेः कल्पनेन चन्द्रतेजसा मत्तकरिवरोऽपि स्वीयशुण्डं संकुच्य उदयगिरिं परित्यजतीत्यत्र सहयुक्तेऽप्रधाने [अष्टाध्यायी २.३.१९] इति सूत्रप्रयोगः संलक्ष्यते—

करैः नखाग्रैरिव भिद्यमानः सङ्कोचमागात्सह पुष्करेण ॥

[रावणार्जुनीयम् ६.२४]

चन्द्रकिरणप्रभावितहस्तिवर्णनेऽत्र उपमारूपकश्लेषालङ्काराः सुप्रयुक्ताः । नखाग्राः यथा सहजतया वस्तु भिनत्ति, तद्वत् चन्द्रस्य निर्मलतीक्ष्णाः कराः हस्तिनः सङ्कोञ्चयन्ति ।

सन्ध्यागमने विहङ्गानां निश्चेष्टत्वं वर्णयति महाकविर्भट्टभीमः । भास्करराहित्ये स्वाभाविकतयैव प्राणिनः चलच्छक्तिरहिताः सञ्जायन्ते, आलोकाभावेन दर्शनाशक्यत्वात् । अत्र पक्षिणां निश्चेष्टत्वम् येनाङ्गविकारः [अष्टाध्यायी २.३.२०] इति सूत्रेण काव्यत्वमाप्नोति । पङ्गुर्यथा चलच्छक्तिरहिततया चरणखञ्जत्वं स्वीकरोति, विहङ्गमा अपि दर्शनाशक्यतया क्रियाशीलत्वं विहाय स्वनिलये तुष्णीं विराजन्ते । अङ्गशब्दोऽत्राङ्गसमुदाये शरीरे वर्तते । अवयवो हेतुत्वेन निर्दिष्टः । विकृतेन अङ्गसमुदायेन अङ्गिनः विहगसङ्घस्य विकारलक्षणात् यथासूत्रं तृतीया विहिता ।

सायं षट्पदाः कुमुद्वतीमुपविशति । कुमुदपुष्पाणि च सरसि विकसन्ति । कविः निर्दिशति कुमुद्वत्याः षट्पदैः भ्रमरैः, सरसश्च विकसद्भिः कुमुदैः विशेषावस्थाप्राप्तिः संलक्ष्यते । अत्र कुमुद्वत्याः सरसश्च विशेषावस्थासूचने इत्थम्भूतलक्षणे [अष्टाध्यायी २.३.२१] इति सूत्रमाश्रित्य तृतीयाया विधानम्, क्रमतः षट्पदानां कुमुदानां चोपलक्षकतया परिकल्पनात् । यथा वर्णितं रावणार्जुनीये—

पादेन वा पङ्गुसचेष्टवृत्तिश्चन्द्रोदयेऽध्यस्तविहङ्गसङ्घः ।
कुमुद्वती सन्ददृशे द्विरेफैर्विकासवद्भिः कुमुदैस्सरश्च ॥

[रावणार्जुनीयम् ६.२५]

फेनकल्पशुभ्राः राजहंसाः विशुद्धचन्द्रकिरणधवलतया ज्योत्स्नाधवलितायां रात्रौ विचेया भवन्ति, सर्वेषां तुल्यवर्णत्वात् । अत्र हेतौ [अष्टाध्यायी २.३.२३] सूत्रमुदाहृतम्—

हंसा विसान्नेन समापतन्तः... ॥ [रावणार्जुनीयम् ६.२७]

## चतुर्थी विभक्तिः

सुर्यास्तेरनन्तरं चन्द्रमा आलोकदानेन गुरुभारं निर्वहति । षष्ठसर्गे रात्रिवर्णनप्रसङ्गे कौमुदीधवलिते परिवेशे शृङ्गारविकसितचेतसः नागरिकाः रमणाय प्रवर्तन्ते । चन्द्रमसः जगतः कृते आलोकप्रदाने सम्प्रदानजन्यं चतुर्थीत्वं निर्दिशति भट्टभीमः । तद्यथा—

आलोकमिन्दुं प्रददौ जनाय जनोऽपि गन्तुं रतये सचेतः ।

[रावणार्जुनीयम् ६.१७]

भट्टभीमस्य सन्ध्यावर्णने विलासिनी कामिनी विरहिणी कान्ता चोपवर्ण्यते । निर्मलकिरणं चन्द्रं दृष्ट्वा उद्दीपितविरहा काचिन्नारी कान्तमानेतुं दूतीमनुरुणद्धि । काचिच्च विलासवती अभिमानं विसृज्य रमणार्थं प्रस्थिता । वर्णनेऽस्मिन् चतुर्थीविधायकं सुत्रद्वयम् उदाहृतं महाकविना—

कान्ताय याहीति जगाद दूतीं काचिद्विलोक्येन्दुमपेतपङ्कम् ।
विमुच्य मानं रतये प्रतस्थे विलासिनी दूतिकया सहान्या ॥

[रावणार्जुनीयम् ६.१८]

क्रियार्था क्रिया उपपदं यस्य तस्य तुमुन्नन्तायाः क्रियायाः कर्मणि चतुर्थीत्वं विधीयते क्रियार्थोपपदस्य च कर्मणि स्थानिनः [अष्टाध्यायी

२.३.१४] इत्यस्मात्सूत्रात्। कान्तमानेतुं प्रेरणम्— कान्ताय याहीति पदेनोक्तम्। अत्र क्रियार्था क्रिया गमनक्रिया, आनयनक्रियायै गमनक्रियायाः अनुष्ठीयमानत्वात्। गमनक्रिया आनयनक्रियार्था, गमनस्य आनयनोद्देश्यत्वात्। गमनक्रिया क्रियार्था क्रिया, आनेतुमिति क्रियार्थोपपदस्य आहर्तुमिति तुमुन्नन्तपदसमीपे उच्चार्यमाणत्वात्। क्रियार्थोपपदस्य आनेतुमित्यस्य अप्रयुज्यमानायाः क्रियायाः कर्मणि चतुर्थी विहिता, तुमर्थाच्च भाववचनात् [अष्टाध्यायी २.३.१५] इति सूत्रात्। विलासिनी 'रतये प्रतस्थे' इत्यत्र 'रम्'-धातोः तुमर्थे (निमित्तार्थे) क्तिन्प्रत्यये युक्ते रतिशब्दः निष्पद्यते, अतः रतये पदे तुमर्थे चतुर्थी विहिता।

एकस्मिन्नेव श्लोके तुल्यप्रकारके विषये द्विविधाभ्यां नायिकाभ्यां द्विविधा चतुर्थी प्रदर्शिता। अहो! आश्चर्यं कवेः सृजनम्।

वियोगिनी नारी विरहदुःखमपास्य प्रियमेलनाय सहर्षा जाता। आकाशे चन्द्रोदये सति तमः अनादरेण तृणवद् परिगण्य प्रियं जनं सम्प्राप्य उपचितहर्षा नार्यः वियोगशोकं परिहरन्ति। अत्र मन्यकर्मण्यनादरे विभाषाऽप्राणिषु [अष्टाध्यायी २.३.१७] इति सूत्रं प्रयुक्तम्। ध्वान्तस्य विरहदुःखस्य चानादरकथनेऽत्र मन्-धातोः अनादरबोधके कर्मणि वैकल्पिकतया चतुर्थी द्वितीया च विहिते। एकस्मिन्नेव श्लोके युगपत्प्रयोगः प्रदर्शितः—

ध्वान्तं तृणं व्योमनि मन्यमानं चन्द्रं समासाद्य जनं प्रियञ्च।
...वियोगदुःखानि तृणाय नार्यः॥ [रावणार्जुनीयम् ६.२२]

अत्र प्रियजनः आलम्बनविभावः, चन्द्रः उद्दीपनविभावः, वियोगदुःखानादरश्चानुभावः, सन्तोषः व्यभिचारी। वियोगिन्यां विरहदुःखानादरे सम्भावनात् उत्प्रेक्षापि कविना परिकल्पिता। अहो रम्यम्।

नमः-स्वस्ति-स्वाहा-स्वधा-अलं-वषट्-योगेन चतुर्थी विभक्तिर्विधीयते [अष्टाध्यायी २.३.१६], उपपदविभक्तिरियम्। अस्मिन् अंशे चन्द्रविषयिणी स्तुतिः परिलक्ष्यते। व्योमतः अन्धकारं दूरीकुर्वतः चन्द्रमसः कृते नमस्कारः वितन्यते। चन्द्रोदये सति प्रियप्रत्यावर्तनेन दयितानां निःसन्दिग्धतया निर्भयेन प्रियोपभोगसम्भावनातः तासां कृते चन्द्रः स्वस्तिप्रदायी आश्वासकारकश्च। यथा स्तौति कविर्भट्टभीमः—

नमोऽस्तु चन्द्राय चिराय तस्मै खं कुर्वता येन गतान्धकारम्।

प्रियोपभोगः प्रमदेन चक्रे स्वस्ति प्रकामं प्रमदाजनाय ॥

[रावणार्जुनीयम् ६.१९]

पुनः प्रमदामुखेन निगदति कविवरः- सायंकालः श्रृङ्गाररमणीयतया प्रियसमागमाय च पर्याप्तः, चन्द्रस्तु सर्वजनहितकरः । अतः प्रियमानेतुं पुनः सखीप्रेरणं कविना वर्णितम्—

अलं प्रदोषः प्रियसङ्गमाय मानक्षयायास्तु हिताय चन्द्रः ।

[रावणार्जुनीयम् ६.२३]

**पञ्चमी विभक्तिः**

कौमुदीकवलिते निशि जनसमुदायेषु श्रृङ्गारपरिव्यापनं वर्ण्यते । कामिजनः प्रतिगृहं रमणोपभोगाय उन्मुखीभवति । चन्द्रतः उद्भूतः किरणजालं तेषां सम्भोगवाञ्छामुद्दीपयति । अत्र चन्द्रकिरणः उद्दीपनविभावतया वर्णितः । प्रसङ्गेऽस्मिन् अपादाने पञ्चमी [अष्टाध्यायी २.२.२८] प्रदर्शिता, चन्द्रमण्डलात् रमणीयकिरणप्रवहणात्—

मयूखजालेन हिमांशुविम्बादुपेयुषा वर्धितमन्मथेच्छः ।

[रावणार्जुनीयम् ६.३३]

मानिनी नायिका चित्रीयते भट्टभीमेन । काचिन्मानवती चन्द्रोदये सति अकृतधैर्या सती स्वयमेव कान्तसमीपं व्रजन्ती सख्याः निषेधवचसा जाड्यबद्धा हरिणीवाभूत् । अत्र विभाषा गुणेऽस्त्रियाम् [अष्टाध्यायी २.३.२५] बहुलप्रसिद्धं सूत्रं यथाप्रसङ्गं काव्यत्वमाप्नोति—

निषेधवाग्वागुरयैत्य सख्या जाडयेन रुद्धा हरिणीव काचित् ।
जाड्याद्विमुक्ता दयितेन काचिच्चन्द्रावभासा दहनीयति स्म ॥

[रावणार्जुनीयम् ६.२९-३०]

सूत्रस्य वैकल्पिकमुदाहरणमपि काव्यायते परवर्तिनि श्लोके । अत्र स्वीयापराधे दहनीयमना विरहोत्कण्ठिता नायिका ।

प्रियापीतशेषमपि मधु पिबन्ति प्रणयिण इति शास्त्रेषु उदीरितम् । महाकविः एवमपि वर्णयति यद् दयिता स्वप्रियैः आस्वाद्य दत्तां सुरां पीत्वा प्रियहृदयविहारिणी सञ्जाता, मधुभ्योऽपि प्रियापीतसुरायाः विशेषहृद्यत्वाद् विभ्रमकारित्वाच्च । अत्र पञ्चमी विभक्ते [अष्टाध्यायी २.३.४२], इत्यनुसारेण निर्धार्यमाणः 'सुरा', निर्धारणावधिः 'मधु', निर्धारणहेतुः— 'हृद्यत्वम्' । मधुसुरयोः अन्योन्यविभक्तेः अत्र निर्धारणावधौ मधुनि पञ्चमी निर्दिष्टा ।

अपादानभिन्नजन्या अन्यकारणनिष्पन्ना पञ्चमी अपि महाकविना भट्टभीमेन अस्मिन्नेव चन्द्रोदयसहितरात्रिवर्णनप्रसङ्गे उदाहृता । काचित्प्रमदा रात्रिकाले चन्द्रप्रभावं दुतीं कथयन्ती आसीद्यत्—चन्द्रः अग्निवदेव दाहकारको जायते, शशिकिरणेन मन्मथोद्दीप्ततया दाहजनकत्वात् । तस्याः प्रियसखा एवाह्लादकारणमित्यतस्तमानेतुं दूत्या गमनीयमित्थमुवाच काचिदन्या । अत्र पृथक्, विना, नाना इत्यादिशब्दयोगात् वैकल्पिकपञ्चमीविधानं स्वाभाविकतया दृक्पथमायाति । तद्यथा—

> विनापि चन्द्रेण विनापि धैर्यान्नार्यो ययुर्वा वसतिं प्रियाणाम् ।
> दुनोति चन्द्रात् पृथगप्यनङ्गः... ।
> नानापि वह्नेर्दहतीव चन्द्रश्चन्द्रेण नानापि पुनस्स कान्तः ।
>
> [रावणार्जुनीयम् ६.३९-४१]

चन्द्रः वह्नेः नाना अपि दहतीव इत्यत्र एकस्मिन् श्लोके एकस्मिन्नेव चरणे नाना-शब्दयोगात् 'वह्नेः' इति पदे पञ्चम्याः, 'चन्द्रात्' इति पदे च तृतीयायाः प्रयोगः सुष्ठु प्रदर्शितः ।

शृङ्गारस्य अङ्गिभूतं मानः रोषः मानभङ्गश्चेत्यादि । नायिकापरिणामवर्णने अभिमानिन्या नायिकायाः चित्रणं संदृश्यते रावणार्जुनीये । काचन नायिका स्तोकेन प्रियजनाय रोषमनुभवति, क्षणादेव प्रियं सम्प्राप्य तुष्टिमुपगता । अत्र करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य [अष्टाध्यायी २.३.३३] इति सूत्रेण एकस्मिन्नेव श्लोके तृतीयापञ्चम्यौ विधीयेते । रात्रिवर्णनप्रसङ्गे नारीणां वर्णनम् असकृद्दृग्गोचरीभवति । अमुष्मिन् क्षेत्रेऽपि नारीप्रसङ्गः पुनरुत्थितः । पूर्णदिनं यावत् दूरगतम् प्रियवल्लभं सन्ध्यायां बहुक्लेशेन सम्प्राप्य नार्यः सुखमवाप्नुवन्ति, पतिप्रेम्णा क्षणादेव विरहव्यथायाः मोचनात् । नारीणां प्रियलाभ एव सुखास्पदो भवति, सम्भोगस्तु अधिकमेव । अत्र आनन्दप्राप्तौ व्यथामुक्तौ च करणजन्या पञ्चमी प्रदर्शिता, आनन्दप्राप्तिरूपस्य व्यथामोचनरूपस्य च धर्ममात्रस्य करणतया विवक्ष्यमाणत्वात्—

> कृच्छ्रादवाप्तं दिवसावसाने कृच्छ्रेण मुक्ता विरहव्यथा हि ।
>
> [रावणार्जुनीयम् ६.४२]

अन्यस्याः वर्णनं विधत्ते भौमककविः—

> स्तोकेन रुष्टा दयिताय नारी स्तोकादुपेता पुनरेव तोषम् ।
>
> [रावणार्जुनीयम् ६.४३]

काचन अधीरा मानिनी कस्माच्चित्कारणात् दयितमभिक्रुध्यति, पुनः क्षणादेव कियत्कालात्परमेव सन्तोषमनुभूय पतिप्रेम्णा स्वामिनं गृह्णातीत्यत्र सन्तोषानुभूतौ वैकल्पिकतया करणविहिता पञ्चमी निर्दिष्टा ।

**सप्तमी विभक्तिः**

षष्ठसर्गस्य वर्ण्यमाणा विषयाः रात्रिवर्णनप्रियारमणादिविषयमाश्रित्य कवेः स्वाभाविकवर्णनेन काव्यत्वेन परिपूर्णा जाताः । काचित् पतिप्राणा प्रेयसी पतिमाकाङ्क्षमाणा मृत्युं वाञ्छन्ती पथि पश्यन्ती आसीत् । पतिर्नागच्छति चेत् मरणं व्रजिष्यति, आयाति चेत्तेन सङ्गमिष्यतीति विचिन्त्य मार्गे दृष्टिं ददती आसीत् । कान्तः नायिकाया दूरवर्ती, मरणमस्या निकटवर्ति इति नायिकासखी भणति नायकम् । अस्मिन् स्वाभाविककान्ताचित्रणे साधारणतया सप्तम्यधिकरणे च [अष्टाध्यायी २.३.३६] इति सूत्रात् सप्तमी उदाहृता—

आस्ते प्रिया वर्त्मनि सम्मुखीना मृत्युं भवन्तं च निरीक्षमाणा ।

[रावणार्जुनीयम् ६.४८]

चन्द्रकिरणप्लावितायां रात्रौ कश्चित् पुरुषः सादरं सप्रेम आलिङ्गति स्वकान्ताम् । तत्र सम्भोगशृङ्गारसृजने प्रियामेलनस्य विविधा स्थितिः कविना यथासूत्रमुपदिष्टा । कश्चिदन्यः पुरुषः रोदनशीलां प्रियामनादृत्य प्रस्थातुमुद्यमति । तस्याः सखी तं मानयितुमवनता सत्यपि पूर्णतया तामुपेक्ष्य स्वमार्गं चलितः स्वार्थी स्वाभिमानी स जनः । अत्र यस्य च भावेन भावलक्षणम् [अष्टाध्यायी २.३.३७] इत्यनेन बहुलप्रसिद्धा 'भावे सप्तमी' प्रदर्शिता । तद्यथा—

नार्यां रुदन्त्यां प्रययौ रुषान्यः सख्यां नतायामपि नैव तस्थौ ।

[रावणार्जुनीयम् ६.५०]

**षष्ठी विभक्तिः**

मानिनीं नायिकां चित्रयतिरूपं सम्यक्कविशक्तिः । कान्तं वाञ्छन्ती गृहेषु पुष्पोपहारादिकं कित्वा मुहुः प्रतीक्षते । दयितानयनाय सखीं प्रेषयित्वा तेन विना प्रत्यावर्तमानां सखीं प्रति सखेदं प्रियस्य अनागमनकारणं, सख्याः विलम्बकारणञ्च जिज्ञासितवती नायिका—

कान्तस्य हेतोर्गृहदेहभूषां मुहुर्मुहुश्चक्रुरुदीक्षमाणाः ।

स कस्य हेतोस्सल्हि नागतोऽद्य त्वं हेतुना केन चिरादुपेता ।

[रावणार्जुनीयम् ६.३१-३२]

विलम्बहेतुप्रच्छने षष्ठी हेतुप्रयोगे [अष्टाध्यायी २.३.२६] सर्वनाम्नस्तृतीया च [अष्टाध्यायी २.३.२७] इति सूत्रयुगं काव्यत्वेन उदाहृतम् ।

विरहमसहमाना काचन नारी प्रियानयनार्थं दूतीमनुरुध्नाति सप्तभिः श्लोकैः । प्रियानयनाय अङ्गीकर्तुं तया उक्तानि वचनानि श्लोकबद्धतया उपन्यस्यन्ते । अस्मिन् प्रसङ्गे षष्ठीसप्तमीविधायकं स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च [अष्टाध्यायी २.३.३९] इति सूत्रं प्रयुक्तम् । सप्तसु अन्यतमोऽयम्—

तमानयेहापतिं मयि त्वं यमात्मनः काऽधिपतिं न कुर्यात् ।
रूपेण दायादमिव स्मरस्य श्रियापि दायादमिवोडुनाथे ॥

[रावणार्जुनीयम् ६.४३]

यूनां स्वाभाविकः स्त्रीसङ्गमः काव्यशास्त्रयोः मणिकाञ्चनसंयोगेन महाकविना रम्यतया उपवर्णितः । रात्रीणामुत्कृष्टां पूर्णचन्द्रसनाथां तमोरहितां रात्रिं लब्ध्वा रमणीयाः युवानः रमणीषु उपगच्छन्ति । पुनरपि रमणीषु रमणीरत्नरूपेण समाख्याताः रमणीश्रेष्ठाः रमयन्तीत्यत्र, निर्धारणं दर्शयित्वा निर्धारणाविधौ 'निशानाम्', 'स्त्रीषु' इत्यत्र षष्ठीसप्तम्योः वैकल्पिकविधानम् । अत्र सम्भोगश्रृङ्गारः रमणीयतया शास्त्रकविना निगदितः, यत्र प्रचलितनिर्धारणम् अतिरिच्य 'निशानां निशा' 'स्त्रीषु मनोहराः' इति अभिनवं प्रयोगं विधत्ते शास्त्रकविर्भट्टभीमः—

लब्ध्वा युवानो विहतान्धकाराम् निशां निशानां परमां सचन्द्राम् ।
सुहृत्समेता रमयाम्बभूवुः सयौवनाः स्त्रीषु मनोहरा याः ॥

[रावणार्जुनीयम् ६.६०]

तुल्यप्रसङ्गे एकस्मिन्नेव श्लोके निर्धारणविषये षष्ठीसप्तम्योः उभयप्रयोगः रम्यत्वं प्राप्तः । चन्द्रकिरणेन सर्वत्र काममयवातावरणस्य परिवाहः द्योतितः— गृहवधूनां ललितश्रृङ्गारचन्दनेषु, पुष्पमाल्यानां वीथीषु, सत्सङ्गानां समितिषु मादकतां वितनोति । सार्वत्रिकमदधारणाय कोऽपि समर्थयति इति सन्देहः उत्थापितः—

पादा हिमांशोर्ललितं वधूनां गन्धः स्रजां सत्सुहृदां च गोष्ठ्यः ।

[रावणार्जुनीयम् ६.६६]

अत्र षष्ठी शेषे [अष्टाध्यायी २.३.५०] सूत्रमाश्रितम् ।

हिमांशोः पादाः— अवयवावयविभावसम्बन्धः

ललितं वधूनाम्— गुणगुणिनोः सम्बन्धः

स्रजां गन्धः— गुणगुणिनोः सम्बन्धः

सत्सुहृदां गोष्ठ्यः— स्वस्वामिभावसम्बन्धः

सख्या प्रियानयनमिति भृशमालोचितो विषयः पुनरालोच्यते । निशि सख्याः कृते शतवारं नायकचरणमाश्रित्य प्रणिपतन्त्या दूत्या स नायक आशु आनेतव्य इति कृत्वसुच्प्रत्यययोगे अधिकरणस्य षष्ठीप्राप्तिः अभिनवतया उदाहरणसनाथीकृता । नायिकाऽत्र शुभ्रशशिकिरणेन उद्दीप्तमन्मथा, अतः असहायतामनुभूय कान्तमाकाङ्क्षति—

सखि तं प्रियमानयाशु रात्रेः शतकृत्वः प्रणिपत्य मानवर्जम् ।

[रावणार्जुनीयम् ६.७५]

कुत्रचित्तु, विपदः रक्षयितारं, सुखस्य दापयितारं कान्तमभिलष्य तत्सकाशं व्रजतीति स्वयंगमनस्य अभिप्रायं भणति काचिन्नारीत्यत्र तृच्-ण्वुल् इति कृत्प्रत्ययान्तयोः ‘दाता’ ‘अदायक’ इति पदयोः योगात् विपद्दानकर्तरि सुखदानकर्तरि षष्ठी विहिता, कर्तृकर्मणोः कृति [अष्टाध्यायी २.३.६५] इति प्रसिद्धसूत्रानुसारम् ।[१]

अङ्गनालिङ्गनजन्यम् औत्सुक्यमपि द्योत्यते भट्टभीमस्य रचनायाम् । कुपितमनसः दयितस्य अकथनमाश्चर्यमिति कथयति काचनाङ्गना । दूती तत् नायिकामवादीदिति आश्चर्यमित्यत्र ल्युट्प्रत्ययान्तस्य अवचनमिति पदयोगेन प्रियस्येति पदे षष्ठी प्रदर्शिता ।

अत्र उभयप्राप्तौ कर्मणीति [अष्टाध्यायी २.३.६६] सूत्रमाकरितम् । दूतीशब्दात् तृतीयैव, अवचनक्रियायाः कर्मणि प्रियस्येति पदे कर्मणि षष्ठी विधीयते ।

## मूल्यायनम्

कविवरो भट्टभीमः स्वीये रावणार्जुनीये महाकाव्ये अष्टाध्यायीस्थानां सूत्राणां यथाक्रममुदाहरणानि काव्यवर्त्मना उपास्थापयत् । एतस्मात्तस्य प्रयोगधर्मिता विज्ञायते । सूत्राणां प्रचलितोदाहरणानि यानि

१ रावणार्जुनीयम् ६.७६

काशिकाकौमुद्यादिग्रन्थे दरीदृश्यन्ते, तान्यतिरिच्य काव्यकथानकानुसारं नवीनान् प्रयोगान् सम्प्रदर्श्य अभिनवां शैलीमरचयत्। महाकाव्यस्य कथानकस्य पुष्ट्यर्थं ये ये विषयाः, यानि यानि पात्राणि आगच्छन्ति, तान्यधिकृत्यैव विभक्तिसूत्राणां प्रयोगाः दर्शिताः। किञ्च, विषयाणाम् अवयवविशेषोऽपि क्वचित् क्वचित् विभक्तिकोटौ प्रतिस्थाप्यते। यथा अन्तरान्तरेण युक्ते [अष्टाध्यायी २.३.४] इति सूत्रेण चन्द्रोदयवर्णनम्, अभितः-परितः-समयानिकषा-हा-प्रतियोगेऽपि इति वार्तिकेन मदन-पीडितसखीवर्णनम्, येनाङ्गविकारः [अष्टाध्यायी २.३.२०] इति सूत्रेण सन्ध्यागमने विहङ्गानां निश्चेष्टत्ववर्णनम्, इत्थम्भूतलक्षणे [अष्टाध्यायी २.३.२१] इति सूत्रमाश्रित्य कुमुद्वत्याः सरसश्च विशेषावस्थासूचनम्, क्रियार्थोपपदस्य च कर्मणि स्थानिनः [अष्टाध्यायी २.३.१४] इति सूत्रेण उद्दीपितविरहया कयाचन नार्या कान्तमानेतुमनुरोधवर्णनम्, नमः-स्वस्ति-स्वाहा-स्वधा-अलं-वषट्-योगाच्च [अष्टाध्यायी २.३.१५] इति सूत्रेण चन्द्रविषयि स्तवनम्, विभाषा गुणेऽस्त्रियाम् [अष्टाध्यायी २.३.२५] इत्यनेन चन्द्रोदये सति अकृतधैर्यायाः जाड्यबद्धनायिकायाः चित्रणम्, पञ्चमी विभक्ते [अष्टाध्यायी २.३.४२] इति सूत्रेण प्रियप्रिययोः प्रेमवर्णनावसरे प्रियेण प्रियापीतशेषमधुपानवर्णनम्, यस्य च भावेन भावलक्षणम् [अष्टाध्यायी २.३.३७] इत्यनेन मानयितुमवनताया नायिकामुपेक्ष्य नायकस्य स्वमार्गचलनवर्णनम्, यतश्च निर्धारणम् [अष्टाध्यायी २.३.४१] इत्यनेन उत्तमरजन्यां रमणीश्रेष्ठाया रमणवर्णनम् इत्यादिषु एव विषयेषु तदवयवविशेषेषु च भिन्नभिन्नाधारेण द्वितीयाविभक्तिः प्रयुक्ता। इयमेव कवेः कल्पनशक्तिः वर्णनविदग्धता च।

इत्थमवलोकितम्, महाकाव्यस्य कथानकानुसारं वस्तुपात्र-विषयचरित्रादीनामेव भिन्नभिन्नसन्दर्भेषु भिन्नभिन्नाधारेषु भिन्नभिन्न-विभक्तियः उदाहृताः। काशिकादिशास्त्रे यानि प्रचलितोदाहरणानि लभ्यन्ते, ततो पूर्णतया भिद्यन्त एतादृशाः प्रयोगाः। एतादृशं नवीनं चिन्तनं भट्टभीमस्य रचनायाः प्रधानं वैशिष्ट्यम्। अतः शास्त्रकाव्यस्यास्य चन्द्रोदयादिकथानकवर्णनात्मकत्वेन काव्यत्वम्, क्रमेण सूत्रोदाहरणात्मकतया च शास्त्रत्वमपि सिद्धमित्यलम्।

✶✶✶

# Bibliography


1. *अर्जुनरावणीयम् (कैरेलीटीकीकोपेतम्)*; भूभट्टः ; विजयपालसशास्त्री (सम्पादकः) ; राष्ट्रीयसंस्कृतसंस्थानम् ; नवदेहली ; २००८ ।
2. *रावणार्जुनीयम्*; भट्टभीमः ; ब्रजेशकुमारः श्रीवास्तवः (सम्पादकः) ; चौखम्भा विद्याभवनम् ; वाराणसी ; २०१५ ।
3. *अष्टाध्यायी-सूत्रपाठः (पाठ्यम्)*; गोपालदत्तपाण्डेयः ; चौखम्भा सुरभारती प्रकाशनम् ; वाराणसी ; २००७ ।
4. *अष्टाध्यायी-भाष्य-प्रथमावृत्तिः* (खण्डः-१, २) ; ब्रह्मदत्तजिज्ञासुः ; रामलाल कपूर ट्रस्ट प्रकाशनम् ; हरियाणा ; २०११ ।
5. *कृत्प्रत्यय-विश्लेषणम्*; गोपबन्धुमिश्रः ; संस्कृतप्रसारपरिषद् ; आरा ; २००५ ।
6. *सिद्धान्तकौमुदी कारकप्रकरणम्*; भट्टोजीदिक्षितः ; सच्चिदानन्दमुखोपाध्यायः (सम्पादकः) ; साहित्यनिकेतनम् ; कलिकाता ; २००८ ।
7. *Pāṇinīyam : A Higher Sanskrit Grammar and Composition*; Lahiri and Shasti ; The Dhaka Students' Library ; Kolkata ; 2012.


* * *

# आशाधरभट्टविरचिताया मङ्गलवाक्यार्थविवेचनायाः समीक्षात्मकं सम्पादनम्

डॉ. श्रीमन्तभद्रः *, डॉ. सुमन्तचौधुरी†

## Abstract

[ग्रन्थारम्भे 'श्रीगणेशाय नमः' इति दरीदृश्यमानस्य मङ्गलवाक्यस्य व्याख्यानपरो लघुकलेवरः पदवाक्यप्रमाण-पारावारीणरामजिभट्टात्मजाशाधरभट्टप्रणीतोऽप्रकाशितो मङ्गलवाक्यार्थविवेचनाख्यो ग्रन्थः । ग्रन्थेऽस्मिन् 'श्रीगणेशाय नमः' इति मङ्गलवाक्यस्य नानाव्युत्पत्तिपक्षमवलम्ब्य अभिनवान् रमणीयानर्थान् प्रतिपाद्य पाण्डित्यस्य पराकाष्ठां प्रादर्शयदाशाधरः । एवं सहृदयचेतश्चमत्कारिकाया मङ्गलवाक्यार्थविवेचनाया मातृकापञ्चकाधारेण पाठसमीक्षात्मकसम्पादनमिह लघुबन्धे प्रस्तोष्यते । उपोद्घातरूपेण ग्रन्थपरिचयः, ग्रन्थकर्तुः देशकालकृतयः, मातृकाविवरणं, सम्पादनपद्धतिश्चेत्येते विषयाः अपि प्रपञ्चयिष्यन्ते । भारतीयज्ञानपरम्परासंवर्धकमेतादृशं समीक्षात्मकसम्पादनकार्यं महदिष्ट-साधकम् । स्पष्टञ्चेदं विंशत्युत्तरविंशतिशततमे ख्रीष्टवर्षे प्रकाशितायां राष्ट्रियशिक्षानीतौ (२२.१६)]

**कुञ्चिकाशब्दाः** — सूत्रम्, न्यासमतम्, प्रत्ययः, आदेशः, आगमः, स्वरः ।

## १. उपोद्घातः

भावयित्रीकारयित्र्युभय-प्रतिभाशाली पद-वाक्य-प्रमाण-पारावारीणो[१] बहुश्रुतस्तत्त्वाभिनिवेशी भावकः कविः[२] व्याकरण-तन्त्रादि-शास्त्रकुशल-यदुरामभट्टशिष्यः[३] आलङ्कारिकधरणीधरशिष्यो[४]

---

* सहायकाध्यापकः, राजानरेन्द्रलालखानमहिलामहाविद्यालयः, पश्चिमवङ्गेषु ।

† सहायकाध्यापकः, सबं सजनीकान्तमहिलामहाविद्यालयः, पश्चिमवङ्गेषु ।

[१] "इति श्रीपदवाक्यप्रमाणपारावारीणमहोपाध्यायाशाधरभट्टविरचितायां कोविदानन्द-सहजायां त्रिवेणिकायां द्वितीयं लक्षणाप्रकरणं समाप्तम्"— कालिकाप्रसाद-शुक्लसम्पादितायास्त्रिवेणिकाया लक्षणाप्रकरणस्य पुष्पिकायाम्, पृ.३३

[२] "आशाधरेण कविना रामजीभट्टसूनुना ।/क्रियते कारिकाटीका बालानामुपकारिणी ॥" —कुवलयानन्दकारिकाव्याख्याया अलङ्कारदीपिकाया द्वितीयो मङ्गलश्लोकः ।

[३] "प्रणम्य स्वगुरुं शेषं यदुरामपदाभिधम् ।/करोमि कारिकाव्याख्यां शाब्दबोधज्ञनन्दिनीम्"—बोधवर्धिन्याः तृतीयो मङ्गलश्लोकः ।

[४] "शिवयोस्तनयं नत्वा गुरुञ्च धरणीधरम् ।/कुर्वे कुवलयानन्दकारिकादीपिकां मुदे ॥" —

नूतनतरीविचारदीपाख्यग्रन्थद्वयकृद्भगवद्भट्टगुरुः[५] लल्लुभायिसमाश्रितः[६] पदवाक्यप्रमाणपारङ्गत-रामजिभट्टसुत[७] आशाधरभट्टः। तत्रभवता आशाधरेण लल्लुभायिसभायामुपन्यासार्थं 'श्रीगणेशाय नमः' इति ग्रन्थारम्भे दरीदृश्यमानस्य मङ्गलवाक्यस्य व्याख्यानपरो लघुशोधबन्धः प्रणीतः इति प्रकृतग्रन्थे आशाधरेणैव स्पष्टीकृतम्—

सिद्धान्तरङ्गार्हमुखा प्रकृत्या चारुः परप्रत्ययशालिशब्दा।
एतत्सभा व्याकरणोपमेया यस्यामसाधुर्नहि कश्चिदस्ति॥
तस्यामुपन्यासकृते कृतेयं विवेचनाशाधरपण्डितेन।
या श्रीगणेशाय नमोऽर्थनिष्ठा सान्यत्र शक्तिं प्रकटीकरोतु॥

साम्प्रतं मातृकापञ्चकमाश्रित्य प्रकृतग्रन्थस्य समीक्षात्मकं सम्पादनं प्रस्तूयते।

## १.१. ग्रन्थपरिचयः

त्रिवेणिकाद्यनेकग्रन्थप्रणेत्रा भट्टेन प्रकृतग्रन्थस्य मङ्गलाचरणे ग्रन्थसारः सम्यक्प्रादर्शि–

प्रारम्भे श्रीगणेशाय नम इत्युच्यते तु यत्।
व्याख्यानं क्रियते तस्य गुणज्ञजनतुष्टये॥

ग्रन्थेऽस्मिन् 'श्रीगणेशाय नमः' इति मङ्गलवाक्ये श्रीगणेशायेति पदद्वयमिति पूर्वपक्षमुपस्थापयता एकपदत्वं साधयता नानाव्युत्पत्तिपक्षमवलम्ब्य अभिनवान् रमणीयानर्थान् प्रतिपादयता द्वेधा वाक्यान्वयं निरूपयता शाब्दबोधं विलिखता चतुर्थीप्रयोगहेतून् वर्णयता पाण्डित्यस्य पराकाष्ठां प्रादर्शि आशाधरेण। अधुना अध्ययनमुखेन ग्रन्थविषयो निरूप्यते—

### १.१.१. ग्रन्थविषयः

आशाधरभट्टविरचितस्य मङ्गलवाक्यार्थविवेचनाख्यस्य ग्रन्थस्य

---

कुवलयानन्दकारिकाव्याख्याया अलङ्कारदीपिकायाः प्रथमो मङ्गलश्लोकः।

[५] "विस्तरस्तु आशाधरगुरुकृतत्रिवेणिकायां द्रष्टव्यः"— [विचारदीपः, पृ.२३]

[६] आशाधरभट्टस्य देशनिर्णयावसरे स्पष्टीकरिष्यते।

[७] "इति श्रीपदवाक्यप्रमाणपारावारीणरामजीभट्टात्मजाशाधरविरचितः शतृशानजादेशविचारः सम्पूर्णः"— शतृशानजादेशविचारस्य पुष्पिकायाम्।

प्रतिपाद्यमानो विषयः 'श्रीगणेशाय नमः' इति मङ्गलवाक्यार्थपर्यालोचनम् । तत्र श्रीगणेशाय इत्येकमेव पदम् । परन्तु केषाञ्चित् मते श्रीशब्दस्य स्वरूपतः मङ्गलप्रयोजकत्वात्, स्वतन्त्रतया प्रयोगार्हत्वेन साधुत्वात् भिन्नपदत्वम् । दृश्यते हि बहवः श्रीशब्दाः प्रकृतार्थेन सह अनन्विताः सन्तोऽपि वर्णनीयविषयस्य उत्कर्षतां वर्धयन्ति । केचन कथयन्ति बहूनां श्रीशब्दानां विषये मत्वर्थलक्षणां विधाय कर्मधारयसमासः विधेयः । तत्रोच्यते, युगपद् बहूनां समासविधानं शास्त्रविरुद्धं, प्रत्येकमपि समासस्य दुरूहत्वेन क्लिष्टत्वञ्च । यथा ॐ इति प्रणवपूर्वकमन्त्रोच्चारणे प्रकृतमन्त्रेण सह सामानाधिकरण्यासम्भवात् यथा वा मन्त्रेषु क्लीं, ग्लीमित्याद्यनेकबीजशब्दप्रयोगे अन्वयानुपपत्तेः समासाभावेन ॐ, क्लीं, ग्लीं चेत्यादीनां पृथक्पदत्वमेव अङ्गीक्रियते तथैव श्रीगणेशाय इत्यत्रापि सामानाधिकरण्याभावेन समासासम्भवात् श्रीशब्दस्य पृथक्पदत्वमेव स्वीकरणीयम् । ननु विभक्तिं विना कथं पदत्वसिद्धिरिति चेदुच्यते, यथा गीतगोविन्दे हरि हरि इति प्रयोगे हरिशब्दस्य निपातत्वेन अव्ययत्वं, तथैवात्रापि श्रीशब्दस्य अव्ययत्वेन विभक्तिलोपः । सन्ति च केचन अनव्ययाः शब्दा येषां कुत्रचित् अव्ययत्वेन प्रयोगः परिलक्ष्यते । यथा स्वस्तिवाचनपरिशिष्टे अनव्ययत्वेन श्रुतस्य स्वस्तिशब्दस्य "स्वस्त्यस्तु ते निर्गलिताम्बुगर्भम्" [रघुवंशम् ५.१७] इत्यादिषु अव्ययत्वेन प्रयोगः । एवं चिरसायशब्दयोर्विषयेऽपि बोद्धव्यम् । तस्मादेव कारणात् "श्रीआदिनाथाय नमोऽस्तु तस्मै" [१.१], "श्रीआदिनाथेन सपादकोटिः" [४.६६] इति हठप्रदीपश्लोकयोः श्रीशब्दस्य अव्ययत्वहेतोः पृथक्पदत्वेन प्रयोगात् 'इको यणचि' [अष्टाध्यायी ६.१.७७] इति सूत्रेण न यण्सन्धिः । समासे सति संहिताया नित्यत्वेन सन्धिः भवेदेव । वाक्यान्तःपातित्वे तु संहिताया विवक्षाधीनत्वात् सन्धिः स्यादेव । वाक्यानन्वितत्वे तु सन्धिशङ्का नास्ति । ननु पूर्वोक्तस्थले प्रकृतिभावेन सन्धिर्बाधित इति चेन्न, प्रकृतिभावे सति 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' [अष्टाध्यायी ६.१.१२७] इति श्रीशब्दस्य ह्रस्वान्तः पाठः स्यात् । अत्र श्रीशब्दस्य पादपूरणार्थकचकारादिवत् वाक्यानन्वितत्वेऽपि वाक्यान्तःसमभिव्याहारः सम्भवति । श्रीआदिनाथाय इत्यादिस्थलेषु श्रीशब्दस्य पादपूरणमात्रं प्रयोजनं, श्रीगणेशाय इत्यत्र तु मङ्गलमेव प्रयोजनम् । एवं पूर्वपक्षिभिः श्रीगणेशाय इति पदं न

समस्तम्, अपि तु व्यस्तमिति प्रत्यपादि । तत्र ग्रन्थकारेण सिद्धान्तितं यत् श्रीगणेशाय इत्यत्र कर्मधारयसमासेन एकपदत्वमेव स्वीकरणीयमिति । स्वरूपेण मङ्गलप्रयोजकस्यापि श्रीशब्दस्य श्रियः कुरूणामधिपस्य पालनीं, श्रियः पतिः श्रीमति इत्यादिमहाकविप्रयोगेषु प्रकृतवाक्यार्थेन सह अन्वयदर्शनात्, प्रसिद्धार्थापरित्यागेनापि प्रयोगयोग्यतायाः सत्त्वात्, अव्ययत्वं न स्वीकृत्यापि समाधानसम्भवात् एकपदत्वस्वीकारे न कश्चित् सन्देहावकाशः । हरि हरि इत्यत्र तु अव्ययत्वं गत्यन्तराभावात् स्वीकरणीयमेव । युगपदनेकश्रीशब्दप्रयोगस्थले समासशास्त्रप्रवृत्तिसम्भवात् असकृत् कर्मधारय-समासस्वीकारे न कोऽपि क्लेशः । प्रणवपूर्वकमन्त्रप्रयोगे प्रणवस्य पृथक् मन्त्रत्वस्वीकारेण पृथग्वाक्यत्वात् सन्धिसमासयोः प्राप्तिरेव नास्ति । यथा सूक्तस्य मन्त्रत्वात् सूक्तावयवभूतानां प्रत्येकम् ऋचामपि मन्त्रत्वं तथैव मन्त्रेषु अनेकबीजप्रयोगस्थले तु तेषां पृथक् मन्त्रत्वमेव अङ्गीकरणीयम् । श्रीगणेशाय इत्यत्र तु मन्त्रत्वविवक्षा नास्ति । तस्मादत्र श्रीशब्दस्य पृथक्पदत्वं न कल्पनीयम् । श्रीआदिनाथाय इत्यत्र च 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति सूत्रेण प्रकृतिभावपक्षे ह्रस्वान्तपाठः, तदभावपक्षे च यणादेशः कर्तव्य एवेति दीर्घपाठः प्रामादिकः । स्वस्तिशब्दस्य तु सर्वदा अव्ययत्वेनैव प्रयोगः । स्वस्तिरस्तु शिवं चास्तु इति स्थले तु स्वस्तिः इत्यत्र 'इक्श्तिपौ धातुनिर्देशे' इति वार्तिकेन श्तिपा निर्देशात् धातोरेव बोधः । एतावता श्रीगणेशाय इति एकमेव पदमिति साधितम् । किञ्च, श्रयति हरिमिति व्युत्पत्त्या, कोशवचनाच्च श्रीशब्दस्य द्रव्यवाचित्वेन 'चादयोऽसत्त्वे' [अष्टाध्यायी १.४.५७] इति सूत्रेण निपातसंज्ञानिषेधाद् अव्ययत्वं नास्त्येव । आकृतिगणत्वेन कथञ्चित् स्वरादिगणे पाठस्वीकारेऽपि स्वरादीनां निपातत्वाभावात् श्रीशब्दस्य षोढा प्रयोगे षड्विधगुरूत्कर्षद्योतकत्वं न सम्भवति, वैयाकरणभूषणादिषु स्वरादीनां वाचकत्वेन निपातानां च द्योतकत्वेन व्यवस्थापनात् ।

समासपक्षे श्रीगणेशशब्दस्य नानाव्युत्पत्त्या नानाविधार्थलाभः सम्भवति । तथाहि— योगरूढ्या श्रीगणेशशब्दस्य गजाननपरत्वम् । अवयवार्थस्वीकारे तु श्रीगणेशाय इति नानाविधदेवतावाची भवति । तथाहि—

**विष्णुपक्षे**

श्रीर्लक्ष्मीस्तस्या गणः समूहः, शोभासम्पत्तिपद्मारूपस्तस्येशोऽधिष्ठाता विष्णुस्तस्मै ।

श्रीर्लक्ष्मीः गणाश्च पार्षदा नन्दसुनन्दादयस्तेषामीशाय ।

श्रियं लक्ष्मीं गच्छति प्राप्नोतीति श्रीगः, णस्य ज्ञानस्य ईशः णेशः, “णकारः कीर्तितो ज्ञाने निश्चये च प्रकीर्तितः” इत्येकाक्षरकोशोक्तेः श्रीगश्चासौ णेशश्च श्रीगणेशस्तस्मै ।

श्रियं राज्यलक्ष्मीं गणयन्ति सप्रयत्नं सेवन्ते इति श्रीगणाः शक्रादयस्तेषामीशाय ।

**शिवपक्षे**

श्रीर्लक्ष्मीः गं गीतं सामवेदसम्बन्धिगकारस्यैकाक्षरकोशे गीतवाचित्वदर्शनात्, णो निश्चयो वेदार्थसिद्धान्तस्तेषामीशाय दात्रे लक्ष्मीदात्रे सरस्वतीदात्रे ज्ञानदात्रे चेत्यर्थः । ज्ञानं तु शङ्करादिच्छेदिति शङ्करस्य ज्ञानदातृत्वेन प्रसिद्धेः ।

**सूर्यपक्षे**

श्रियः शोभायाः प्रभालक्षणायाः गणानां भागवतोक्तानां द्वादशानामीशाय सूर्यनारायणाय ।

श्रियः कमलादिशोभाया गणस्य किरणसमूहस्य त्रयस्त्रिंशत्कोटिदैवतरूपस्येशाय भर्त्रे ।

**देवीपक्षे**

श्रियं गणयति ज्यैष्ठ्येन मानयतीति श्रीगणा ईशस्यायः शुभावहो विधिः श्रीगणा चासौ ईशायश्चेति कर्मधारयः । तत्सम्बोधने हे श्रीगणेशाय, तुभ्यमिति शेषः ।

**पञ्चायतनपक्षे**

श्रीर्देवी गो गणेशः णः सूर्यः अः श्रीवासुदेवः ईशः शिवः एतेषां समाहारद्वन्द्वे श्रीगणेशशब्दः सिध्यति । तस्येदं चतुर्थ्यन्तं श्रीगणेशायेति ।

एवञ्च श्रीमांश्चासौ गणेशः, अथवा श्रीयुक्तो गणेशः इति व्युत्पत्त्या मध्यपदलोपिसमासे श्रीगणेशशब्दः निष्पद्यते, तस्मै नम इत्यन्वयः । अत्र

'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' [अष्टाध्यायी २.३.१६] इति सूत्रेण नमःशब्दयोगे चतुर्थी । ननु गम्यमानकरणक्रियां प्रति गणेशस्य कर्मत्वेन द्वितीयया चतुर्थी बाध्येत इति चेन्न, अत्र नमःशब्दस्य नमनं करोमि इत्यर्थे क्रियमाणे नमःशब्दार्थस्यैव कर्मत्वमायाति, न तु गणेशशब्दस्य । अस्तु इति क्रियाध्याहारपक्षे श्रीगणेशाय नमः अस्तु इति वाक्ये नमःशब्दार्थस्य कर्तृत्वम् । एवं नमःशब्दप्रयोगे गम्यमानकृधातोः ग्रहणे, अस्तु इति क्रियापदाध्याहारे वा "नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमि" इति तैत्तिरीयारण्यकमन्त्रे क्रियापदद्वयप्रयोगदर्शनं प्रमाणम् ।

कृधातोरध्याहारे श्रीगणेशाय अहं नमनं करोमि इति, अस्तु इति क्रियापदाध्याहारे च श्रीगणेशाय मम नमनम् अस्तु इति वाक्यार्थः सम्पद्यते । प्रथमवाक्यस्य शाब्दबोधः तावत्—

**वैयाकरणपक्षे**—श्रीगणेशोद्देश्यकैकत्वविशिष्टास्मदर्थकर्तृकनमनकर्मक-वर्तमानकालिकः करणाख्यो व्यापारः इति ।

**नैयायिकपक्षे**—श्रीगणेशोद्देश्यकनमनकर्मककरणानुकूलकृतिमानहम् इति ।

द्वितीयवाक्यस्य शाब्दबोधस्तु इत्थम्—

**वैयाकरणपक्षे**—श्रीगणेशोद्देश्यकमत्सम्बन्धविशिष्टनमनकर्तृकप्रार्थना—विशिष्टभवनानुकूलो व्यापारः इति ।

**नैयायिकपक्षे**—श्रीगणेशोद्देश्यकमत्सम्बन्धिनमनं भवनानुकूलकृतिमद् इति ।

श्रीगणेशाय मम नमनम् अस्तु इति वाक्यस्य नैयायिकसम्मतशाब्दबोधे नमनस्य कृतिमत्त्वाभावेऽपि रथो गच्छतीत्यादिवत् अस्मदर्थसम्बन्धी यत्नः नमने उपचर्यते । वैयाकरणसम्मतशाब्दबोधे च नमनस्य तूलमुड्डयते इतिवत् यत्नारोपासम्भवेऽपि कर्तृजन्यत्वसादृश्येन व्यापारमात्रे यत्नत्वारोपे न काचिद् विप्रतिपत्तिः । परन्तु अस्तु इति क्रियापदाध्याहारपक्षः कर्तृत्वकृत्योः औपचारिकत्वात् गौरवग्रस्तः अनार्षश्च । तस्मान्नायं पक्ष आदर्तव्यः ।

ननु मुनित्रयं नमस्कृत्य, नमस्करोति देवान् चेत्यादौ नमःशब्दसत्त्वेऽपि कथं द्वितीयेति चेदुच्यते, अत्र 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी'ति परिभाषया द्वितीया चतुर्थीं बाधते । श्रीगणेशाय नमः इत्यत्र तु नमःशब्दयोगे

चतुर्थ्यां कृतायां क्रियाकाङ्क्षायां क्रियापदमध्याह्रियते। क्रियाध्याहारात् पूर्वं जातायाः चतुर्थ्याः क्रियाध्याहारात्परं कथञ्चिदपि द्वितीयया बाधो न भविष्यति।

ननु नमन्ति फलभारेण रम्भा भूरितरश्रियः इत्यत्र नम्-धातोः अकर्मकत्वेन प्रयोगदर्शनात् नमस्करोति देवान् इत्यत्रापि नमस्करणक्रियायाः अकर्मकत्वं स्यात्, नमस्करणनमनयोः समानार्थत्वादिति चेदुच्यते, प्रह्वीभावमात्रे नम्-धातोः अकर्मकत्वं, प्रह्वीभावजन्यप्रसादनरूपे लक्ष्यार्थे च सकर्मकत्वम्। श्रीगणेशाय नमः इत्यत्र कृधातोरध्याहारपक्षे श्रीगणेशाय अहं नमः नमनं करोमि इति वाक्यार्थे नमःशब्दार्थस्य कर्मत्वात् कृधातोः अकर्मकत्वशङ्का नास्त्येव। अस्तु इति क्रियाध्याहारपक्षे श्रीगणेशाय मम नमः अस्तु इति वाक्यार्थे लब्धे नमःशब्दार्थस्य अत्र कर्तृत्वाद् अस्धातोश्च अकर्मकत्वात् चतुर्थ्यन्तत्वमेव इति निर्विवादम्। स्वयम्भुवे नमस्कृत्य इत्यत्र च स्वयम्भुवम् अनुकूलयितुं नमस्कृत्य इत्यर्थे 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' [अष्टाध्यायी २.३.१४] इति सूत्रेण चतुर्थी भवत्येव।

### १.१.२. ग्रन्थवैशिष्ट्यम्

अधुना मङ्गलवाक्यार्थविवेचनायाः कानिचन वैशिष्ट्यानि प्रतिपाद्यन्ते। तेन आशाधरस्यावदानमपि विज्ञायेत। तथाहि—

श्रीगणेशाय नमः इति लघुवाक्यमादाय पूर्वपक्षोपस्थापनपुरस्सरं ग्रन्थरचनमाशाधरस्य वर्णनकुशलत्वं ख्यापयति।

श्रीगणेशशब्दस्य योगरूढ्या गजाननपरत्वेऽपि अवयवार्थशक्त्या नानाव्युत्पत्तिप्रदर्शनेन कोषवाक्यसमर्थनेन च विष्णु-शिव-सूर्य-देवी-पञ्चायतनादिदेववर्णनमाशाधरस्य कोषव्याकरणयोरप्रतिहतगतिर्दाध्वन्यते।

वाक्यस्य नानाशास्त्ररीत्या शाब्दबोधप्रदर्शनमाशाधरस्यातलस्पर्शिशास्त्र-ज्ञानमनुमापयति।

ग्रन्थेऽस्मिन् हठप्रदीपः, वैयाकरणभूषणम्, भागवतम्, एकाक्षरकोशः, पण्डितमण्डनम् इत्येतेषां ग्रन्थानां समुल्लेखो वर्तते।

ग्रन्थेऽस्मिन् उद्धरणबाहुल्यमाशाधरस्य बहुश्रुततां बोधयति।

### १.२. ग्रन्थकर्तृपरिचयः

संस्कृतवाङ्मये द्वौ प्रसिद्धौ आशाधरनामकौ ग्रन्थकारौ वर्तेते इति

आशाधरगवेषकाः वदन्ति । तौ एक एव इति हरिचाँदशास्त्रिणः संशयः[८] । परं तयोः पितुः नामभेदात् कालभेदात् उभावपि भिन्नौ इति स्पष्टं प्रतिपादयन्ति जगदीशमिश्रभवेन्द्रझाप्रभृतयः । तत्र एकोऽस्ति जैनः त्रिषष्टिस्मृतिप्रणेता सल्लक्षणपुत्रः त्रयोदशशतकीयः आशाधरः । अपरश्च अष्टादशशतकीयः लल्लुभायिसमाश्रितः रामजिभट्टसुतः आशाधरभट्टः । द्वितीयः आशाधरभट्टः एव प्रकृतग्रन्थस्य प्रणेता । तत्र प्रमाणं प्रकृतग्रन्थे लल्लुभायिनः स्तवनं—

राजकार्येषु निष्णायी बहुदायी सदर्थिनाम् ।
भृगुकच्छपुरस्थायी लल्लुभायी बलेः प्रति ॥

किञ्च स्वप्रणीतबोधवर्धिन्यादिग्रन्थोल्लिखितस्य स्वकृतपण्डितमण्डनस्येहाप्युल्लेखोऽकारि– "हेतुप्राचुर्यं तु मत्कृते पण्डितमण्डने द्रष्टव्यम्" इति । अयं पदवाक्यप्रमाणवारावारीणः अर्थात् व्याकरण-मीमांसान्यायशास्त्रपारङ्गतः आसीत् । तत्र बोधवर्धिन्याख्यव्याकरणग्रन्थेन, अद्वैतविवेकाख्यमीमांसाग्रन्थप्रणयनेन, आशाधरीनामकन्यायग्रन्थरचनेन चेदं प्रमाणितं भवति । अस्य आशाधरभट्टस्य साहित्यगुरुः धरणीधरः, व्याकरणगुरुश्च यदुरामभट्टः आसीत् । अयं च भगवद्भट्टस्य गुरुरासीदिति भगवद्भट्टविरचिताया भानुदत्तविरचितरसतरङ्गिण्या नूतनतरीव्याख्याया मङ्गलश्लोकादस्माद्विज्ञायते—

श्रीमदाशाधरगुरोः प्रसादात्क्रियते मया ।
तरी रसतरङ्गिण्याष्टीकेयं नातिविस्तरा ॥ इति ।

रसप्रस्थाने रसिकानन्दप्रणेतुराशाधरस्य शिष्योऽपि व्याख्यानं लिखति । एतेन आशाधरभट्टस्य रसप्रस्थाने महती गतिरासीदिति बुध्यते । वस्तुतस्त्वनेकग्रन्थानां प्रणेतायं सर्वतन्त्रस्वतन्त्र इति निस्सङ्कोचं वक्तुं शक्यते । अष्टादशशतकीयोऽयं[९] विद्वान् जम्बूसरवास्तव्य आसीदिति आशाधरभट्टप्रणीतात् सन्ध्यारत्नप्रदीपाद्विज्ञायते । तदुक्तं—

यद्रेवोत्तरतोऽब्धियोजनपरं मह्याश्च यद्दक्षिणे
गव्यूतित्रितयान्तरे स्थितमदो देशस्य यन्मण्डलम् ।
यस्मिन् श्रीयदुरामभट्टसदृशाः शास्त्राब्धिपारङ्गमा

८ History of Sanskrit Poetics, p. 93
९ "He lived in c. 1720-1790 A.D."—Some Less-known Non-Jaina Sanskrit Writers from Gujrat, p. 185

आसन् भूसुरतल्लजा जयति तज्जम्बूसरः पत्तनम् ॥
[सन्ध्यारत्नप्रदीपः– ८.११२]
तस्मिन् पुरे श्रीगुरुपादपद्मसान्निध्यलोभाद्वसता कृतोऽयम् ।
श्रीरामजीभट्टसुतेन शोध्यः सद्भिर्हितेऽकारणबन्धुदेश्याः ॥ इति ।
[सन्ध्यारत्नप्रदीपः– ८.११३]

श्रीमताशाधरभट्टेन मङ्गलवाक्यार्थविवेचनामतिरिच्यापि नैके ग्रन्थाः प्रणीता इति इतिहासग्रन्थात् आशाधर-प्रणीतग्रन्थात् च अवबुध्यते। तथाहि— १) कोविदानन्दः, २) कादम्बिनी, ३) त्रिवेणिका, ४) अलङ्कारदीपिका ५) रसिकानन्दः इति पञ्च अलङ्कारशास्त्रीयग्रन्थाः; ६) पूर्वपक्षप्रश्नोत्तरा अथवा पूर्वपक्षमञ्जूषा अथवा पूर्वपक्षमञ्जरी, ७) शतृशानजादेशविचारः, ८) वर्णसमाम्नायविवेचना, ९) वर्णविवेकः, १०) तरङ्गमाला, ११) बोधवर्धिनी इति षड् व्याकरणग्रन्थाः; १२) चान्द्रायणव्रतकथा, १३) सन्ध्यारत्नप्रदीपम्, १४) प्रभापटलम् इति त्रयो धर्मशास्त्रीयग्रन्थाः; १५) अद्वैतविवेकः, १६) वेदस्तुतिविशल्या, १७) आशाधरी इति त्रयो दर्शनग्रन्थाः; १८) राधाविलासः, १९) छात्रानन्दः, २०) पीयूषनिर्झरस्तोत्रम् इति त्रयः काव्यसम्बद्धग्रन्थाः; २१) पिङ्गलच्छन्दःसूत्रव्याख्यानम् इति एकश्छन्दःशास्त्रीयग्रन्थः; २२) पण्डितमण्डनम्, २३) पदार्थविवेक इति द्वौ अज्ञातविषयकग्रन्थौ । एतावता साकल्येन चतुर्विंशतिः ग्रन्थाः सन्ति इति विज्ञायते। आशाधरस्य विस्तरेण परिचयलाभाय सन्ध्यारत्नप्रदीपस्य उपोद्घातभागो द्रष्टव्यः

### १.३. मातृकापरिचयः

वादग्रन्थरत्नस्यास्य मातृकापञ्चकं साम्प्रतमुपलभ्यते। मातृकाचतुष्टयं बड़ौदाप्राच्यसंस्थाने उपलभ्यते[१०]। एका मातृका भो.जे.शोधालये समुपलभ्यते[११]। यद्यपि दाहिलक्ष्मीग्रन्थालये एका मातृका उपलभ्यते, तथापि बड़ौदायाम् उपलब्धासु एका तस्या एव छायाचित्रम् इत्यतः सा न पृथक् परिगणिता, न वा सङ्गृहीता। एवम् मातृकापञ्चकं समादाय

१० An Alphabetical List of Manuscripts in The Oriental Institute, Vadodara Vol. II, p. 28 ; Vol. IV, p. 288 ; Vol. V, p.488 & 490

११ A Descriptive Catalogue of Sanskrit and Prakrit Manuscripts of B. J. Institute Museum : Part III, p. 362

एवास्य ग्रन्थस्य समीक्षात्मकं सम्पादनं प्रस्तुतम् । तासां क्रमशः क, ख, ग, घ, ङ इति नामकरणं विहितम् । तत्र क-खमातृकामतिरिच्य अन्यत्र ग्रन्थनाम नोपलभ्यते । तत्र ग्रन्थनाम विवरणात्मकतालिकानुसारेण प्रदत्तम् । ङमातृकां विहाय सर्वत्र अक्षराणि सुस्पष्टानि । अधुना मातृकापञ्चकस्य परिचयः प्रदीयते—

### १.३.१. कमातृका

ग्रन्थालयः— बड़ौदाप्राच्यशोधालयः, मातृकाक्रमाङ्कः– २७३०१, ग्रन्थनाम– मङ्गलवाक्यार्थविवेचना, ग्रन्थकारः– आशाधरभट्टः, उपादानम्– कर्गजपत्रम्, भाषा– संस्कृतम्, लिपिः– देवनागरी, पत्रसङ्ख्या– १०, प्रतिपुटं पङ्क्तयः– ९, व्याप्तिः– सम्पूर्णा ।

### १.३.२. खमातृका

ग्रन्थालयः— बड़ौदाप्राच्यशोधालयः, मातृकाक्रमाङ्कः– ३६४५, ग्रन्थनाम– मङ्गलवाक्यार्थविवेचना, ग्रन्थकारः– आशाधरः, उपादानम्– कर्गजपत्रम्, भाषा– संस्कृतम्, लिपिः– देवनागरी, पत्रसङ्ख्या– ५, प्रतिपुटं पङ्क्तयः– ११, व्याप्तिः– सम्पूर्णा, लेखकः– वंशीधरभट्टः ।

### १.३.३. गमातृका

ग्रन्थालयः— बड़ौदाप्राच्यशोधालयः, मातृकाक्रमाङ्कः– २३२४९, ग्रन्थनाम– श्रीगणेशाय नमः व्याख्यान, ग्रन्थकारः– आशाधरः, उपादानम्– कर्गजपत्रम्, भाषा– संस्कृतम्, लिपिः– देवनागरी, पत्रसङ्ख्या– ५, प्रतिपुटं पङ्क्तयः– ११, व्याप्तिः– खण्डिता (लेखकेन प्रतिलिपीकरणकाले पत्रमेकं मध्ये त्यक्तं), लेखकः– भक्तिनन्दनदासः ।

### १.३.४. घमातृका

ग्रन्थालयः— भो.जे.शोधालयः, मातृकाक्रमाङ्कः– ५९९८, ग्रन्थनाम– गणेशमन्त्रव्याख्या, ग्रन्थकारः– आशाधरभट्टः, उपादानम्– कर्गजपत्रम्, भाषा– संस्कृतम्, लिपिः– देवनागरी, पत्रसङ्ख्या– ६, प्रतिपुटं पङ्क्तयः– १२, व्याप्तिः– सम्पूर्णा, लेखकः– भोलानाथः ।

### १.३.५. ङमातृका

ग्रन्थालयः— बड़ौदाप्राच्यशोधालयः, मातृकाक्रमाङ्कः– २७३०९,

ग्रन्थनाम– श्रीगणेशाय नमः व्याख्यान, ग्रन्थकारः– आशाधरः, उपादानम्– कर्गजपत्रम्, भाषा– संस्कृतम्, लिपिः– देवनागरी, पत्रसङ्ख्या– ५, व्याप्तिः– सम्पूर्णा ।

## १.४. ग्रन्थसम्पादनपद्धतिः

लघुकलेवरस्यास्य ग्रन्थस्य मातृकापञ्चकमुपलभ्यते । तत्र एतासु कमातृकैव प्राचीना पूर्णा च विद्यते । ग्रन्थान्ते क-खमातृकायां पञ्च विवरणश्लोका उपलभ्यन्ते, अन्यासु तिसृषु मातृकासु केवलं पञ्चसु श्लोकेषु आद्यः श्लोकः एव उपलभ्यते । अतः प्राचीनता, पूर्णता इति बिन्दुद्वयं हृदि निधाय ग्रन्थसम्पादनाय कमातृका आधारमातृकात्वेनाङ्गीकृता । ततस्तस्या आदौ प्रतिवर्णीकरणं विधाय तया सह क्रमशोऽन्यासां मातृकाणां पाठसन्तुलनं विहितम् । एवं पाठसन्तुलनं विधाय उपलब्धानां पाठानां युक्तायुक्तत्वं विचार्य युक्तत्वेनाभिमतः पाठः मूले स्थापितः, इतरे च तलटिप्पण्यां सन्निवेशिताः । तत्र युक्तायुक्तत्वविचारे युक्तत्वे किं गमकं, तदपि अपेक्षितस्थले समीक्षात्मकटिप्पणीरूपेण तलटिप्पण्यामुल्लिखितम् । मात्रादिकृतदोषाः प्रायेण पाठभेदरूपेण नोल्लिख्यन्ते । एवं सन्धि-सन्धिविच्छेदादिभेदाः अपि पाठभेदरूपेण नोल्लिखिताः । मातृकासु 'एङः पदान्तादति' [अष्टाध्यायी ६.१.१०९] इति सूत्रविहितपूर्वरूपसन्धौ क्वचित् अवग्रहचिह्नं दत्तं वर्तते क्वचिन्नैव प्रदत्तम् । ग्रन्थसम्पादनकाले च सर्वत्र अवग्रहचिह्नं प्रदर्श्यैव पाठः सन्निवेशितः । एवं विसर्गसकारयोर्युगपत्प्रयोगादयो, बकारवकारविपर्ययाः, नकारणकारविपर्ययाः अपि संशोधिताः । सामान्यदोषाः सर्वत्र परिष्कृताः सन्ति । एतेषां च सामान्यीकरणविधेरन्तर्गतत्वात् तलटिप्पण्यामुल्लेखो न कृतः । मातृकायां यदि सामान्यतः वर्गपञ्चमस्थाने अनुस्वारप्रयोगः तत्र वर्गीयवर्णे परे एव 'वा पदान्तस्य' [अष्टाध्यायी ८.४.५९] इति सूत्रानुसारेण वैकल्पिकवर्गपञ्चमः पदान्ते प्रयुक्तः, अपदान्ते तु 'अनुस्वारस्य ययि परसवर्णः' [अष्टाध्यायी ८.४.५८] इति सूत्रानुसारेण सर्वत्रैव वर्गपञ्चमः प्रयुक्तः । किञ्च 'अचो रहाभ्यां द्वे' [अष्टाध्यायी ८.४.४६] इति सूत्रविहितवैकल्पिकद्वित्वस्यापि आश्रयणं ग्रन्थसम्पादने न विहितम् । यत्र मातृकायां द्वित्वं कृतं विद्यते तत्र तस्य परित्यागो विहितः । तलटिप्पण्यामिमे विषया नोल्लिखिताः । ते हि सामान्यीकरणविधेरन्तर्गताः ।

## २. समीक्षात्मकं सम्पादनम्

आशाधरभट्टविरचिता मङ्गलवाक्यार्थविवेचना

[१२]प्रारम्भे श्रीगणेशाय नम इत्युच्यते तु यत् ।
व्याख्यानं क्रियते तस्य गुणज्ञजनतुष्टये ॥१ ॥

श्रीगणेशाय इत्येकं पदम् । केचित्तु श्रीशब्दस्य स्वरूपेणैव मङ्गलप्रयोजकतया प्रकृतार्थानन्वयेऽपि प्रयोगार्हत्वेन गणेशशब्दसामानाधिकरण्याभावेऽपि साधुत्वं तथा च भिन्नपदत्वमित्याहुः । यथा—

षड्गुरोः स्वामिनः पञ्च द्वौ भ्रातुर्द्विगुणा रिपोः ।
श्रीकाराश्च त्रयो मित्रस्यैकैकं[१३] पुत्रभार्ययोः ॥ इति ।

श्रीशब्दपूर्वकतत्तन्नामनिवेशेन[१४] बहूनां श्रीकाराणां प्रकृतार्थानन्वयेऽपि वर्णनीयोत्कर्षविभावकत्वेन[१५] प्रयोगः शिष्टसम्मतः । न च तत्र प्रकृतनामधेयेन सह मत्वन्तार्थ[१६]लाक्षणिकानां बहूनां श्रीशब्दानां कर्मधारयसमासः शङ्क्यः, युगपद्बहूनां समासानुशासनाभावात् प्रत्येकमपि समासस्य दुरूहत्वेन क्लिष्टत्वाच्च । यथा प्रणवपूर्वकसर्वमन्त्रोच्चारणे सामानाधिकरण्या[१७]सम्भवादनेकबीजसमभिव्याहारे चान्वयानुपपत्ते-र्दर्शनादर्थानुसारेणैव मन्त्रप्रयोग इति नियमाभावात्[१८] पुरुषसूक्तमन्त्र[१९]क्रमेणोपचारार्पणक्रमेऽर्थानुरोधानुपलम्भादिति, तथा तद्वा[२०]क्यानन्वितत्वेन श्रीशब्दस्य पृथक्पदत्वम् । न च विभक्तिं विना कथं पदत्वसिद्धिरिति वाच्यं, “हरि हरि” [गीतगोविन्दस्य तृतीये सर्गे प्रथमगीतस्य प्रथमः श्लोकः] इत्यस्येव निपातत्वाङ्गीकारेण[२१]

[१२] क, ग, ङ-श्रीगणेशायः नमः, ख-श्रीगणेशायः नमः । श्रीगुरुभ्यो नमः । श्रीसरस्वत्यै नमः, घ-श्रीस्वामिनारायणाय नमःइति लेखकप्रणीतमङ्गलवाक्यानि ।

[१३] क, ग, घ-०कैकः

[१४] ख, ङ—०निवेशने

[१५] ङ—०विभाजकत्वेन

[१६] ङ—सहमत्वंतादर्थे

[१७] ग, घ—समानाधिकरण०

[१८] ख-०भावाच्च

[१९] ग, घ–“०मन्त्र०”नास्ति

[२०] ख—तथास्माद्वा०

[२१] ख—निपातान्तःपातित्वाङ्गीकारेण

स्वस्तिशब्दस्येवाव्ययत्वेन लुप्तविभक्तिकत्वोपपत्तेः। अस्ति[२२] च केषाञ्चिच्छब्दानामनव्ययानामपि[२३] प्रयोगवशादव्ययत्वम्। तथाहि स्वस्तिशब्दस्य स्वस्तिवाचनपरिशिष्टेऽनव्ययत्वेन श्रुतस्य "स्वस्त्यस्तु ते निर्गलिताम्बुगर्भम्[२४]" [रघुवंशम् ५.१७] इत्यादिप्रयोगेऽव्ययत्वम्। "चिरनियमकृशोऽपि शैलसारः"[२५] [किरातार्जुनीयम् १०.१४], "सायमण्डनमभि त्वरयन्त्य" [किरातार्जुनीयम् ९.६] इत्यादावनव्ययत्वेन श्रुतयोश्चिरसायशब्दयोः चिरं न सहते स्थातुं, सायमायाहि, याहीत्यादौ त्वव्ययत्वेनाभिधानम्। अत एव "श्रीआदिनाथाय नमोऽस्तु तस्मै" [१.१] "श्रीआदिनाथेन सपादकोटिः" [४.६६] इति हठप्रदीपश्लोकयोः श्रीशब्दस्य[२६] स्वरसन्धिर्न कृतः। समस्तपदत्वे तु संहिताया नित्यत्वेन सन्धिः स्यादेव। वाक्यान्तःपातित्वे च विवक्षातः सन्धिः स्यादेव। वाक्यानन्वितत्वे तु सन्धिशङ्का[२७] नास्ति। न चात्र प्रकृतिभावेन सन्धिर्बाधित इति शङ्क्यं, प्रकृतिभावे सति 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' [अष्टाध्यायी ६.१.१२७] इति श्रीशब्दस्य ह्रस्वान्तः पाठः स्यात्, दृश्यते तु न तथेति। ननु[२८] अनन्वितत्वे कथं वाक्यान्तःसमभिव्याहार इति चेत् पादपूरणार्थकचकारादिवदित्यवधेयम्। यथा तत्र पादपूरणमात्रं प्रयोजनं, तथात्र मङ्गलमात्रमिति दिक्।

वस्तुतस्तु कर्मधारयसमासेनैकपदत्वसम्भवे श्रीशब्दस्य पृथक्पदत्वकल्पनमयुक्तम्। स्वरूपेण मङ्गलप्रयोजकस्यापि श्रीशब्दस्य "श्रियः कुरूणामधिपस्य पालनीं" [किरातार्जुनीयम् १.१], "श्रियः पतिः श्रीमति शासितुं जगद्" [शिशुपालवधम् १.१] इति महाकविप्रयोगेषु

---

२२ ङ–स्वस्ति

२३ ङ–"अनव्ययानाम्"नास्ति

२४ ङ–०गर्वम्

२५ ङ–"शमनिरतोऽपि दुरासदः प्रकृत्या ससचिव इव निर्जनेऽयं तिष्ठन्।/मुनिरपि तुल्यरुचिस्त्रिलोकभर्तुश्चिरनियमकृशोऽपि शैलसारः॥" इति पूर्णश्लोक उद्धृतोऽस्ति। प्रसिद्धपाठे तु पादव्यत्ययो दृश्यते–"चिरनियमकृशोऽपि शैलसारः शमनिरतोऽपि दुरासदः प्रकृत्या।/ससचिव इव निर्जनेऽयं तिष्ठन्मुनिरपि तुल्यरुचिस्त्रिलोकभर्तुः॥"

२६ ङ–"श्रीशब्दस्य"नास्ति

२७ ख–०शङ्कैव

२८ ङ–नच

प्रकृतवाक्यार्थसमन्वयदर्शनात् प्रसिद्धार्थापरित्यागेन[२९] प्रयोगयोग्यताया[३०] अक्षतेश्च, अव्ययत्वकल्पनस्य च सति समाधानसम्भवेऽन्याय्यत्वात्।[३१] "हरि हरि हतादरतया" [गीतगोविन्दस्य तृतीये सर्गे प्रथमगीतस्य प्रथमः श्लोकः] इत्यादौ तु हरि हरि इत्यस्य गत्यन्तराभावादव्ययत्वं न्याय्यमेव। यत्र च युगपदनेकश्रीशब्दप्रयोगस्तत्र मुहुः कर्मधारयस्वीकारे बाधो नास्ति, समासशास्त्रप्रवृत्तिसम्भवात्। यत्र तु प्रणवपूर्वकमन्त्रप्रयोगस्तत्र[३२] प्रणवस्य मन्त्रान्तरत्वस्वीकारेण प्रकृतैकवाक्यतानपेक्षणात् सन्धिसमासयोर्विषयतैव नास्ति। ततो वैधर्म्यान्नायं दृष्टान्तः। अनेकबीजप्रयोगेऽपि प्रत्येकमेव तेषां मन्त्रत्वम्। यथा सूक्तस्य मन्त्रत्वे तदवयवभूतानामृचां प्रत्येकमपि मन्त्रत्वमिति। प्रकृते तु श्रीशब्दस्य[३३] [३४]स्वतन्त्रत्वा[३५]ङ्गीकारे चमत्कारो[३६] नास्ति, मन्त्रत्वविवक्षाया अभावात्[३७]। तद्विवक्षायां तु नादबिन्दुलाञ्छितत्वं[३८] स्यात्। तद्विना बीजत्वाभावेन मन्त्रत्वानभ्युपगमात्[३९]। श्रीआदिनाथायेत्यादौ च नादबिन्दुसंयुक्तोच्चारणे श्लोकाद्बहिर्विन्यासे च[४०] छन्दोभङ्गो भवेदिति। एवञ्च श्रीआदिनाथायेत्यत्र प्रकृतिभावपक्षे[४१] ह्रस्वादेशो दुर्वारस्तदभावे[४२]

---

२९ ग, घ—प्रसिद्धार्थपरित्यागेन

३० ख– प्रयोजनप्रत्ययोपपादकताया

३१ ङ—प्रसिद्धार्थापरित्यागेनइत्यतःसमाधानसम्भवेऽन्याय्यत्वात्इत्यन्तंयावत्पाठोनास्ति।

३२ ग–"प्रयोगस्तत्र" अत्यजत। प्रेत्युपसर्गसाम्यजभ्रमोऽत्र कारणम्

३३ "योयस्यैकाक्षरोमन्त्रस्तन्नाम्नासनिगद्यते।/आदितश्चन्द्रबिन्दुभ्यांतद्बीजंतन्निगद्यते॥ इतिकालिकापुरा[णे]"इतिटिप्पणीकमातृकायाउपरिलिखितावर्तते। कमातृकायां 'श्रीशब्दस्य'इत्यस्यउपरिष्टात्काकपदचिह्नंविधायमार्जितंदृश्यते। तत्काकपदचिह्नंसूचक-रूपेणस्वीकृत्यइयंटिप्पणीखमातृकायांमूलपाठत्वेनयोजिता।

३४ इत आरभ्य 'यद्वा श्रीर्लक्ष्मीः' इति पर्यन्तं खमातृकायां नोपलभ्यते।

३५ ख– मन्त्रत्वा०, ङ—स्वतन्त्रा०

३६ ङ—चमदाग्रहो

३७ घ—अभावाभावात्

३८ घ–न चन्द्रबिन्दु०

३९ ख– मन्त्रत्वाभ्युपगमात्, क— "यो यस्यैकाक्षरो मन्त्रस्तन्नाम्ना स निगद्यते।/आदितश्चन्द्रबिन्दुभ्यां तद्बीजं तन्निगद्यते॥ इति कालिकापुरा[णे]"टिप्पणी।

४० ख—"श्लोकाद्बहिर्विन्यासे च"नास्ति।

४१ ङ–प्रकृतिभावापेक्षो

४२ ङ—सद्भावे

च यणादेश[४३] इति दीर्घपाठः प्रामादिकः। किञ्च स्वस्तिशब्दोऽप्यत्र न दृष्टान्तः। तस्योपसृष्टक्रियापद[४४]प्रतिरूपकत्वेनाव्ययत्वसिद्धौ गणे पाठोऽनव्ययत्वनिषेधार्थ इति। तर्हि 'स्वस्तिरस्तु शिवं चास्त्वि'त्यत्र का गतिरिति चेत्स्वस्तिशब्दप्रयोगे[४५] सैवेति बोध्यम्। तत्र हि धातुनिर्देशार्थप्रत्ययान्तस्य तदर्थे लाक्षणिकत्वम्। 'गच्छतौ परदारादिभ्यः' [वार्तिकम्– ५५५९, महाभाष्यम्— ४.४.१] इत्यादिलिङ्गादित्याहुः।

द्रव्यपरत्वञ्च[४६]। किञ्च श्रयति हरिमिति श्रीरिति व्युत्पत्त्या "शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते" इति कोशाच्च श्रीशब्दस्य द्रव्यवाचित्वाध्यवसायात् 'चादयोऽसत्त्वे' [अष्टाध्यायी १.४.५७] इति[४७] द्रव्यवाचित्वे निपातसंज्ञानिषेधादव्ययत्वं दुर्घटम्। स्वरादीनामप्याकृतिगणत्वेन तदन्तःपातित्वाङ्गीकारेऽपि निपातत्वाभावात्[४८] षोढा प्रयोगे षड्विधगुरूत्कर्षद्योतकत्वानुपपत्तिः। स्वरादीनां वाचकत्वं, कर्तृत्वकर्मत्वा[४९]द्यन्वयान्निपातानां तु द्योतकत्वमेव। "द्योतकाः प्रादयो येन निपाताश्चादयस्तथा" [वैयाकरणमतोन्मज्जनकारिका— ४२] इत्यत्र वैयाकरणभूषणादिषु व्यवस्थापितत्वात्।

अपि च समासपक्षे नानाव्युत्पत्तिलाभान्नानाविधार्थ[५०]प्रतिपत्तिः। तथाहि— श्रीगणेशायेत्यस्य योगरूढ्या गजाननपरत्वं प्रसिद्धमेव। यदि तु चमत्कारोपलम्भाद्रूढिपरित्यागेन "उदधिर्घटः" [सिद्धान्तकौमुदी ९९६] "अम्भोधिर्विकसितवारिजानन" [शिशुपालवधम् ८.२६] इत्यादिष्विव[५१] योगमात्रसंश्रयस्तदा देवतान्तरपरत्वम् अपि स्यादेव। तथाहि— श्रीर्लक्ष्मीस्तस्या गणः समूहः, शोभासम्पत्तिपद्मारूपस्तस्येशोऽधिष्ठाता विष्णुस्तस्मै। यद्वा श्रीर्लक्ष्मीः गणाश्च पार्षदा नन्द[५२]सुनन्दादयस्तेषामीशाय।

---

४३ ङ-यणादेशाभाव

४४ ख– "पद" इति नास्ति। ङ—तस्योपसर्ग०

४५ ख– चेद्वा विज्ञप्तिशब्दप्रायः

४६ ङ—द्रव्यपरत्वं किम्

४७ ख—"द्रव्यवाचित्वाध्यवसायात् चादयोऽसत्त्वेइति"नास्ति।

४८ घ, ङ–"स्वरादीना...निपातत्वाभावात्"इत्ययंभागःनास्ति।

४९ ङ— "०कर्मत्व०" नास्ति

५० घ—नानार्थ०

५१ ङ—इत्यादिरूढ्यभावे

५२ ङ–गणश्च पार्श्वनन्द०

यद्वा श्रियं लक्ष्मीं[५३] गच्छति प्राप्नोतीति श्रीगः, णस्य ज्ञानस्य ईशः "णकारः कीर्तितो ज्ञाने निश्चये च प्रकीर्तितः" इत्येकाक्षरकोशोक्तेः श्रीगश्चासौ णेशश्च श्रीगणेशस्तस्मै । यद्वा श्रियं राज्यलक्ष्मीं गणयन्ति[५४] सप्रयत्नं सेवन्ते इति श्रीगणाः शक्रादयस्तेषामीशाय । एवं विष्णुपक्षे । अथ शिवपक्षे श्रीर्लक्ष्मीः गं गीतं[५५] सामवेदसम्बन्धि, गकारस्यैकाक्षरकोशे गीतवाचित्वदर्शनात्, णो निश्चयो वेदार्थसिद्धान्तस्तेषामीशाय दात्रे लक्ष्मीदात्रे सरस्वतीदात्रे ज्ञानदात्रे[५६] चेत्यर्थः । एवं सूर्यपक्षे श्रियः शोभायाः प्रभालक्षणायाः गणानां "सौरो गणो मासि मासि" [भागवतपुराणम् १२.११.२७] इति भागवतोक्तानां द्वादशानामीशाय सूर्यनारायणाय । यद्वा श्रियः कमलादिशोभाया गणस्य किरणसमूहस्य त्रयस्त्रिंशत्कोटिदैवतरूपस्येशाय भर्त्रे । एवं देवीपक्षे श्रियं गणयति ज्यैष्ठ्येन मानयतीति श्रीगणा ईशस्यायः शुभावहो विधिः श्रीगणा चासौ ईशायश्चेति कर्मधारयः । तत्सम्बोधने हे श्रीगणेशाय, तुभ्यमिति शेषः । "भर्गस्य भाग्यं भजे" [वैद्यजीवनम् १.२], "करुणाशालि कपालिभागधेयम्" [मातङ्गीस्तोत्रम्— ७६] इत्यादाविव रूपकालङ्कारः । एवं पञ्चायतनपक्षे श्रीर्देवी गो गणेशः णः सूर्यः अः श्रीवासुदेवः ईशः शिवः एतेषां समाहारद्वन्द्वे श्रीगणेशशब्दः सिध्यति । तस्येदं चतुर्थ्यन्तं श्रीगणेशायेति । गकारस्यैकाक्षरकोशाद्गणेशवाचित्वम् । णकारस्य[५७] निश्चयवाचिनः 'तत्करोति तदाचष्टे' इति ण्यन्तस्य पचाद्यचि णं करोतीति णयति, णयतीति ण इति व्युत्पत्त्या सूर्यवाचित्वम् ।[५८] एवमन्येऽपि विकल्पाः सम्भवन्तः सुधीभिरूह्याः । एवञ्च श्रीमांश्चासौ गणेशश्च श्रीगणेशस्तस्मै नम इत्यन्वयः । अथवा श्रीयुक्तो गणेशः श्रीगणेश इति मध्यमपदलोपी समासः । श्रीशब्दस्य मत्वन्तार्थे लक्षणायां किं मानमिति चेदुभयथा प्रयोग एवेति बोध्यम् । तथाहि भागवते "श्रीभागवतमिष्यते" [भागवतपुराणम् १२.१३.१५] इति, "श्रीमद्भागवते श्रीमहामुनिकृते" [भागवतपुराणम् १.१.२]

---

५३ ख–"गणाश्च पार्षदा"इत्यतः"श्रियंलक्ष्मीं"इत्यन्तं नास्ति ।

५४ ग, घ–गणयन्ते, घ–गणपतेः

५५ ख–गानं

५६ ख–गान्धर्वज्ञानदात्रे

५७ ङ–णःज्ञानं

५८ ख–"णं करोति" इत्यारभ्य "सूर्यवाचि०" इति पर्यन्तं त्यक्तम् अक्षरसाम्यात्, घ-णकारस्य इत्यारभ्य सूर्यवाचित्वम् इति पर्यन्तं त्यक्तम् ।

इति च ।

अत्र 'नमःस्वस्ती'त्यादिना चतुर्थी[५९]। ननु 'गम्यमानापि क्रिया कारकविभक्तिप्रयोजिके'ति गम्यमानकरणक्रियां प्रति कर्मत्वेन द्वितीया चतुर्थीं बाधते इति चेन्न, यतो[६०]ऽत्र नमो[६१] नमनं करोमीत्यर्थे क्रियमाणे नमःशब्दार्थस्यैव कर्मत्वं न तु नमःकर्मत्वेन[६२] गणेशस्येति । दृश्यते ह्यन्यत्रापि[६३] नमःशब्दार्थस्य कर्मत्वम् । तथाहि माघे "स सञ्चरिष्णुर्भुवनान्तरेष्वि"ति [शिशुपालवधम् १.४६] श्लोके "अकारि तस्यै मुकुटोपलस्खलत्करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नम" इति । एवमस्त्विति क्रियाध्याहारपक्षे नमःशब्दार्थस्य कर्तृत्वं, कर्त्रन्तराश्रवणात् । पक्षद्वयेऽपि— "नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधिभ्यः[६४] । नमो वाचे[६५] नमो वाचस्पतये नमो विष्णवे महते[६६] करोमि" इति [तैत्तिरीयारण्यकम् २.१२] मन्त्रे क्रियापदद्वयप्रयोगदर्शनं मानम्[६७] अध्यवसेयम् । अयञ्चात्र विशेषः— करोतेरध्याहारे श्रीगणेशाय अहं नमनं करोमीति वाक्यार्थसिद्धये कर्तास्मच्छब्दः प्रथमान्तोऽध्याहारमर्हति[६८] । अस्तोरध्याहारे[६९] तु षष्ठ्यन्त इति, श्रीगणेशाय मम नमनमस्त्वित्यर्थानुरोधात् । आद्ये पक्षे श्रीगणेशोद्देश्यकैकत्वविशिष्टास्मदर्थकर्तृकनमनकर्मकवर्तमानकालिकः करणाख्यो[७०] व्यापार इति शाब्दबोधः । द्वितीये पक्षे तु श्रीगणेशोद्देश्यकमत्सम्बन्धविशिष्टनमनकर्तृकप्रार्थनाविशिष्टभवनानुकूलो व्यापार इति । नैयायिकमते चाद्यपक्षे श्रीगणेशोद्देश्यक-

---

[५९] ग, घ, ङ–"कथंनस्यात्" अधिकम्

[६०] ङ– "०ऽत्र नमो नमनं करोमीत्यर्थे क्रियमाणे" नास्ति

[६१] ख– "नमो" नास्ति

[६२] क, ख, ग– "नमःकर्मत्वेन" नास्ति । घ–"तुनमःकर्मत्वेन" नास्ति

[६३] ख– त्वन्यत्रापि । ग– कर्मत्वेन द्वितीया इत्यारभ्य ह्यन्यत्रापि नमःशब्दार्थस्य इति पर्यन्तं त्यक्तं कर्मत्वशब्दसाम्यजभ्रमात्

[६४] ओषधीभ्यः इति उपलब्धपाठः

[६५] ख– नमो अस्त्वग्नये इत्यतः नमो वाचे इत्यन्तं नास्ति ।

[६६] बृहते इति उपलब्धपाठः

[६७] ग, घ, ङ–"मानम्" नास्ति

[६८] ङ– ०ध्याहारः कर्तव्यः इति अशुद्धपाठः

[६९] ख– अस्तेरध्याहारे, ग– अस्त्वध्याहारे, घ– अस्त्विति क्रियाध्याहारे, ङ—अस्त्यध्याहारे

[७०] ख– "०कालिकः करणाख्यो", ग– करणो, ङ– "करणाख्यो" नास्ति

नमनकर्मककरणानुकूलकृतिमानहमिति शाब्दबोधः। द्वितीये च श्रीगणेशोद्देश्यकमत्सम्बन्धिनमनं भवनानुकूलकृतिमदिति। तत्रेयं विप्रतिपत्तिः— नमनस्याचेतनत्वेन कृतिमत्त्वं दुर्घटमिति। तत्र रथो गच्छतीत्यादौ यथा वाहसम्बन्धी यत्नो रथे औपचारिकः, एवमस्मदर्थसम्बन्धी यत्नो नमनेऽप्यौपचारिकः। यथा वा[७१] तूलमुड्डयते इत्यत्र यत्नारोपासम्भवेऽपि कर्तृजन्यत्वसादृश्येन व्यापारमात्रे यत्नत्वारोप इति न काचिद् अनुपपत्तिः। प्रकृतेऽपि तथेति ध्येयम्। वस्तुतस्तु—

ज्ञानं चेच्छा यत्न एते क्रमेण प्रोक्ता हेतुत्वेन धीरैः प्रवृत्तौ।

जानातीच्छत्योः[७२] प्रयोगे कथं स्याद्यत्नो वाच्यः कोटिमन्यां गतो यः[७३]॥ इति व्यभिचारसम्भवादयं पक्षः कर्तृत्वकृत्योरौपचारिकत्वाद् गौरवग्रस्तोऽनार्षश्चेति चातुर्यमात्रमिति दिक्। हेतुप्राचुर्यं तु मत्कृते पण्डितमण्डने द्रष्टव्यम्।

ननु "मुनित्रयं नमस्कृत्य" [सिद्धान्तकौमुद्या मङ्गलश्लोकस्य प्रथमपादः], "नमस्करोति देवान्" इत्यादौ द्वितीयया चतुर्थीबाधदर्शनादत्रापि तथैव न्याय्यमिति चेन्न, तत्र हि नमःशब्दस्य नमनविषये लाक्षणिकतया चतुर्थ्यन्तविशेषणत्वेन चतुर्थ्यन्तस्यैव कर्मत्वसिद्धिस्तत्र 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी'ति वचनस्य सावकाशत्वम्। प्रकृते तु क्रियापदस्याश्रुतत्वेन नमःशब्दयोगे चतुर्थ्यां कृतायामाकाङ्क्षोदयात् क्रियापदमध्याह्रियते। ततः प्राक्प्रवृत्तायाश्चतुर्थ्या निर्बाधत्वमिति। नन्वध्याहारस्य कर्तव्यत्वे किं मानम् इति चेदुच्यते, 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' [अष्टाध्यायी १.४.१०५] इति सूत्रे स्थानिपदश्रवणादाकाङ्क्षावशादप्रयुक्तमप्याकाङ्क्षितं वाक्ये पूरणीयमिति[७४] गम्यते। तदेव सर्वत्राध्याहारलिङ्गमिति। ननु "नमन्ति फलभारेण रम्भा भूरितरश्रियः" इत्यादौ कर्मादर्शनात्[७५] नमस्करोति देवानित्यत्राप्यकर्मकत्वमेवोचितं, नमस्करणनमनयोः समानार्थत्वात्।[७६]

---

[७१] ङ- "वा" नास्ति
[७२] ङ- "जानातीच्छत्योः" अस्पष्टम्
[७३] ग-यम्, घ-अयम्
[७४] घ-प्रपूरणीयमिति
[७५] ग, घ, ङ—त्वकर्मकत्वदर्शनात्
[७६] ख-"इति चेत्"अधिकम्

स्यादेतत्, यदि नमनस्य सर्वथाकर्मकत्वमेव स्यात्। दृश्यते तु "शिवं नम वराक त्वं ज्ञानं मोक्षं यदीच्छसि" [स्कन्दपुराणम्- ५.३.११.५४] इत्यादौ सकर्मकत्वमपीति। अत्रेदं तत्त्वं— यदि प्रह्वीभावमात्रं नमतेरर्थस्तदा त्वकर्मकत्वम्। यदि तु ऋतौ भार्यां गच्छति, मुनयो विदुः, कविभिः स्मृतमित्यादिष्विवानन्तरभाविन्यर्थान्तरे लक्षणा तदा सकर्मत्वमेवेति। नमस्करणस्य प्रह्वीभावजन्यप्रसादने लक्षणायां सकर्मकत्वम्। प्रकृते तु नमःशब्दार्थस्य कर्मत्वात् करोतेरकर्मकत्वशङ्का नास्त्येव। प्रकारान्तरे च नमःशब्दार्थकर्तृत्वादस्तेरकर्मकत्वाच्चतुर्थ्यन्तत्वं निर्विवादमेव[७७]। "स्वयम्भुवे नमस्कृत्य" [भागवतपुराणम् ४.६.२] इत्यादौ तु चतुर्थ्यन्तत्वं समर्थितमेव प्राचीनैरिति श्रीगणेशाय नम इति स्पष्टं व्याख्यातम्[७८]।

आशाधरेण विदुषा श्रीगणेशकृपार्थिना।
व्याख्यातं श्रीगणेशाय नम इत्यन्वयादिभिः ॥१ ॥
राजकार्येषु निष्णायी बहुदायी सदर्थिनाम्।
भृगुकच्छपुरस्थायी लल्लुभायी बलेः प्रति ॥२ ॥
यस्मिन्न कोऽको[७९]ऽपि नको[८०] वदान्यकौतस्कुतो वा निजदेशजीवा।
आसीद्द्विपश्चिद्बहुपण्डितो वा स लल्लुभायी भवतान्महायी[८१] ॥३ ॥
सिद्धान्तरङ्गार्हमुखा प्रकृत्या चारुः परप्रत्ययशालिशब्दा।
एतत्सभा व्याकरणोपमेया यस्यामसाधुर्नहि कश्चिदस्ति ॥४ ॥
तस्यामुपन्यासकृते कृतेयं विवेचनाशाधरपण्डितेन।
या श्रीगणेशाय नमोऽर्थनिष्ठा सान्यत्र शक्तिं प्रकटीकरोतु ॥५ ॥[८२]

**॥इति श्रीगणेशाय नम इति मङ्गलवाक्यार्थविवेचना सम्पूर्णा॥**[८३]

* * *

[७७] ङ–निर्वाहमेव।
[७८] ङ–इत्यस्य स्पष्टंव्याख्यानम्
[७९] क–"नास्ति कं यस्यासावकः" टिप्पणी
[८०] क–"नो एव नको" टिप्पणी
[८१] ख–महाश्री
[८२] अन्तिमश्लोकचतुष्टयं कखमातृकयोरेवोपलभ्यते
[८३] ङ–इति श्री आशाधरकविकृतश्रीगणेशपदार्थः सम्पूर्णः समाप्तः। ग-घमातृकयोः पुष्पिका नास्ति। कमातृकायाम् अन्तिमपृष्ठे मातृकाया अधस्तात् अयं श्लोको लिखितो वर्तते— "मायारामं फुल्लपङ्केरूहास्यं क्षान्तिधीरं पद्मपत्रायताक्षम्।/विप्रैः

## Bibliography


1. *A Descriptive Catalogue of Sanskrit and Prakrit Manuscripts of B. J. Institute Museum : Part III*; Prof. Bharati Kirtikumar Shelat and Smt. Vibhuti Vikram Bhatt (Eds.) ; B. J. Institute of Learning and Research ; Ahmedabad ; 1987.
2. *An Alphabetical List of Manuscripts in The Oriental Institute, Vadodara : Vol. IV*; Usha Brahmachari and Sweta Prajapati (Eds.) ; Oriental Institute ; Vadodara ; 2008.
3. *An Alphabetical List of Manuscripts in The Oriental Institute, Vadodara : Vol. V ;* Sweta Prajapati and Sharmila Bagchi (Eds.) ; Oriental Institute ; Vadodara ; 2020.
4. *Āśādharabhaṭṭa : The Contribution of Āśādhara Bhaṭṭa' to Saṁskrit Poetics* (Hindi) ; Jagadisaprasada Misra ; Eastern Book Linkers ; Delhi ; 1987.
5. *History of Sanskrit Poetics* (2nd ed.) ; Sushil Kumar De ; Firma KLM Private Limited ; Calcutta ; 1960.
6. *Introduction to Indian Textual Criticism ;* S. M. Katre ; Deccan College Post-graduate and Research Institute ; Poona ; 1954.
7. Some Less-known Non-Jaina Sanskrit Writers from Gujrat. In *"Vasudhaiva kuṭumbakam" International Sanskrit Conference : Vol. I, part I*; U. P. Shah ; Ministry of Education and Social Welfare, Govt. of India ; 1975.
8. *अद्वैतविवेकः ;* आशाधरभट्टः ; श्रीमन्तभद्रः पलाशघोडइश्च (सम्पा.) ; डि.के. प्रिण्टवर्ल्ड ; देहली ; २०२५ ।
9. *आशाधरभट्टकृतस्य कोविदानन्दस्य समीक्षणम् ;* भवेन्द्रझा ; नागप्रकाशन ; देहली ; २००६ ।
10. *कुवलयानन्दकारिका;* आशाधरभट्टः ; वासुदेवशर्मा (सम्पा.) ; निर्णयसागरप्रेस् ; मुम्बै ; १९२७ ।
11. *कोविदानन्दः ;* सारस्वती सुषमा (षोडशवर्षे ३-४ अङ्कौ) ; आशाधरभट्टः ; कालिकाप्रसादशुक्लः (सम्पा.) ; सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ; वाराणसी ; १९६१ ।
12. *त्रिवेणिका;* आशाधरभट्टः ; कालिकाप्रसादशुक्लः (सम्पा.) ;


---

शिष्टैर्वन्दिताङ्घ्रियुगलं वारं वारं शिष्यकोऽहं ववन्दे ॥" इति । प्रायेण लेखकेन गुरुवन्दनं विहितमिति भाति । खमातृकायामुत्तरपुष्पिका— "श्रीरस्तु । श्रीकल्याणमस्तु । श्रीशुभं भवतु सुगन्धपुरनिवासिनि(ना ?)भट्टवंशीधरेण लिखितोऽयं ग्रन्थः" इति ।

भारतीयसाहित्यविद्यालयः ; वाराणसी ; १९५७ ।
13. *पूर्वपक्षप्रश्नोत्तरा;* आशाधरभट्टः ; श्रीमन्तभद्रः पलाशघोडइश्च (सम्पा.) ; डि.के. प्रिण्टवर्ल्ड ; देहली ; २०२५ ।
14. *बोधवर्धिनी;* आशाधरभट्टः ; श्रीमन्तभद्रः पलाशघोडइश्च (सम्पा.) ; डि.के. प्रिण्टवर्ल्ड ; देहली ; २०२५ ।
15. *रसतरङ्गिणी (भगवद्भट्टविरचितनूतनतरीव्याख्यासहिता);* भानुदत्तः ; नीना सी॰ भावनागरी (सम्पा.) ; राष्ट्रीयपाण्डुलिपिमिशन ; देहली ; २०१८ ।
16. *रसिकानन्दः ;* आशाधरभट्टः ; श्रीमन्तभद्रः (सम्पा.) ; केन्द्रीयसंस्कृतविश्वविद्यालयः ; देहली ; २०२४ ।
17. *विचारदीपः ;* भगवद्भट्टः ; नीना सी॰ भावनागरी (सम्पा.) ; भारतीयकलाप्रकाशन ; देहली ; २००६ ।
18. *शतृशानजादेशविचारः ;* आशाधरभट्टः ; श्रीमन्तभद्रः पलाशघोडइश्च (सम्पा.) ; डि.के. प्रिण्टवर्ल्ड ; देहली ; २०२५ ।
19. *सन्ध्यारत्नप्रदीपः ;* आशाधरभट्टः ; श्रीमन्तभद्रः पलाशघोडइश्च (सम्पा.) ; डि.के. प्रिण्टवर्ल्ड ; देहली ; २०२५ ।

✳ ✳ ✳

# आत्मन ईक्षणपूर्वकसृष्टिविचारः

**देवज्योति-कुण्डुः** *

## Abstract

[वेदान्तमते आत्मा एव नित्यं वस्तु, ततोऽन्यदखिलमनित्यम् । जगत् सर्वं ब्रह्मणा एव सृष्टम् । तस्मादेव जीवति । अन्ते च तस्मिन्नेव एतेषां लयो भविष्यति । अतो ब्रह्मणः सृष्टिकारणत्वं स्वीक्रियते । यस्य कस्यापि कार्यसिद्धेः प्राग् यथा वयं तद्विषये चिन्तयामः, तथैव परमात्मापि सृष्टेः प्राक् ईक्षणं कृतवान् । प्रसङ्गोऽयम् उपनिषत्सु उपलभ्यते । तत्र ऐतरेयोपनिषदि आत्मा एक एवासीदित्युक्तम् । तं विना अन्यत् किमपि वस्तु नासीत् । अहं लोकानां सृष्टिं करिष्यामीति स आत्मा ईक्षितवान् । अतः स तदनुसारेण सृष्टिमारब्धवान् । तत्र आत्मा अधुनापि एक एवेति आत्मन एकत्वविचारे प्रतिपाद्यते । एवं च तत्र लोकसृष्टिरप्याम्नाता । स आत्मा अम्भोलोक-मरीचिलोक-मरलोक-अब्लोकानां सृष्टिमकरोत् । शोधपत्रेऽस्मिन् आत्मा कथमीक्षणं कृतवान् इति प्रसङ्गः ऐतरेयोपनिषदुक्तदिशा विचारितः ।]

**कुञ्चिकाशब्दाः** — वेदान्तः, ऐतरेयोपनिषद्, शाङ्करभाष्यम्, आत्मा, ईक्षणम्, सृष्टिः, लोकाः ।

### ०. उपक्रमः

वेदसारभूतो भाग उपनिषद् । उपनिषत्सु ऐतरेयोपनिषदन्यतमा । अत्र ब्रह्मणः स्रष्टृत्वं कर्तृत्वं च सम्यक् वर्णितमस्ति । ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावविशिष्टम् । सर्वं खल्विदं ब्रह्म, किन्तु अज्ञानावरणकारणाद् वयं परब्रह्मस्वरूपं नैवानुभवितुं शक्नुमः । आदर्शगुरोः सकाशादेव ब्रह्मज्ञानं प्राप्यते । तत्र शिष्योऽपि संसारविरक्तो भूत्वा समित्पाणिः दीप्तशिराः जलराशिमिवोपहारपाणिः गुरुमेवाभिगच्छेदिति हि विधिः । पुनरपि गुरुः श्रोत्रियो ब्रह्मनिष्ठश्च स्यात् । ततो गुरुः शिष्यं परीक्ष्य अध्यारोपापवादन्यायेनोपदिशति । एवं ब्रह्मप्राप्त्युपायो वर्तते । शिष्यस्य पुनोऽधिकारत्वमपेक्षत् । किञ्च तर्कद्वारा ब्रह्मज्ञानं न प्राप्यते । ब्रह्मविद्याप्राप्तये अधिकारिणा कानिचन साधनानि आचरणीयानि भवन्ति ।

ऐतरेयोपनिषत् खण्डत्रयेण विभक्ता । तत्र प्रथमाध्यायस्य प्रथमखण्डे ब्रह्मणः सृष्टिः तत्क्रमश्च वर्णितः । पूर्वमेकमेव वस्तु

---

* शोधच्छात्रः, काशीस्थितस्य काशी-हिन्दू-विश्वविद्यालयस्य संस्कृत-विद्याधर्म-विज्ञान-सङ्काये, उत्तरप्रदेशेषु, Email : debjyotikundu26@gmail.com

आसीत्। तद्धि ब्रह्म। स आत्मा कदाचिद् ईक्षणं कृतवान् अहं लोकान् रचयिष्यामीति। तदीक्षणकारणात् स तदिच्छया एव लोकान् सृष्टवान्। ततश्च लोकपालसृष्टिमकरोत्। ततस्तदधिष्ठातृदेवताः, तदन्नं, तद्भोगस्थलमित्यादिक्रमेण सर्वं सृष्टम्। श्रीशङ्कराचार्यः तद्रचितभाष्येण उपनिषदः तत्त्वानि सम्यग् विविच्य श्रुतियुक्तिप्रमाणपुरःसरं व्याख्यातवान्। तदनुसारमेव आत्मन ईक्षणपूर्विका सृष्टिरत्रालोच्यते।

**१. आत्मन ईक्षणपूर्विका सृष्टिः**

आत्मा खलु नित्यशुद्धबुद्धमुक्तस्वभावविशिष्टः। स पूर्वमेक एव आसीत्। तदा स ईक्षणं कृतवान् यत् अहं लोकान् रचयिष्यामीति। तथाहि मन्त्रः—

> आत्मा वा इदमेक एवाग्र आसीत्।
> नान्यत्किञ्चन मिषत्। स ईक्षत लोकान्नु सृजा ॥ इति।

[ऐतरेयोपनिषद् १.१.१]

अर्थात् पूर्वमात्मा एक एवासीत्। तं विना अन्यं किमपि सक्रियं वस्तु नासीत्। स ईक्षणं कृतवान् यत् अहं लोकानां रचनां करिष्यामीति। अतः स तदनुसारेण सृष्टिमारब्धवान्।

**१.१. आत्मन एकत्वविचारः**

अत्र आत्मा एक एव अग्रे आसीद् इत्युक्तम्। अत्र व्याप्तिबोधक-आप्-धातोः, भक्षणार्थक-अद्-धातोः, अथवा सततगमनबोधक-अत्-धातोः आत्मा इति शब्दः निष्पन्नः। इदं यत् नामरूपकर्मभेदेन विविधरूपेण जगत् प्रतीयते, तत् सृष्टेः पूर्वं सर्वशक्तिरशनायादिसर्वसंसारधर्मवर्जितो नित्यशुद्धबुद्धमुक्तस्वभावोऽजरोऽजोऽमरोऽमृतोऽभयोऽद्वय आत्मा आसीत्।

प्रसङ्गेऽस्मिन् शङ्का भवति पूर्वपक्षिणाम्। पूर्वमेष आत्मा एक एवासीदित्युक्तम्। तर्हि इदानीं किं स एको नास्ति? अधुनापि एक एवास्तीति प्रतिपादयति सिद्धान्ती। तर्हि किमर्थमासीदिति भूतकाले उच्यते? तदोच्यते— यद्यपि अधुना आत्मा एक एवास्ति, तथापि तत्र कश्चिद् विशेषो विद्यते। उत्पत्तेः पूर्वमिदं जगत् नामरूपादिभेदेन व्यक्तं न भवति स्म। यतो हि आत्मैव आसीत्। किन्तु अधुना सृष्टेः परं जगत् नामरूपादिभेदेन व्यक्तं भवति। अतोऽनेकशब्दानां प्रतीतिविषयाः भवन्ति।

किञ्च एकस्य आत्मशब्दप्रतीतिविषयोऽपि भवति । अत अधुनापि स आत्मा एक एवेति अवगम्यते । अयमेवात्र विशेषः । भाष्यकारः श्रीशङ्कराचार्य उदाहरणप्रदर्शनेन विषयमिमं स्पष्टीकरोति । फेनजलदृष्टान्तोऽत्र प्रदत्तः[1] । यथा सलिलात् पृथक् फेनरूपव्याकरणात् प्राक् फेनमेकस्यैव सलिलशब्दस्य प्रतीतिविषय आसीत्, किन्तु यदा तत्फेनं सलिलाद् भिन्ननामरूपभेदेन व्यक्तं भवति, तदा सलिलफेनादिविविधशब्दानां प्रतीतिविषयो भवति । किञ्च जलमिति एकस्य शब्दस्यापि प्रतीतिविषयो भवति । इत्थमेव जगद्विषयेऽपि अवगन्तव्यम् । अत आत्मा एक एवासीत्, अधुनापि एक एवास्तीति गम्यते ।

## १.२. आत्मन ईक्षणम्

आत्मा तु एक एवासीत् । अतः पूर्वम् आत्मभिन्नं किमपि व्यापारयुक्तं निष्क्रियं वा वस्तु नासीत् । सांख्यमते यथा प्राक् प्रधानमासीत्, काणादमते च यथा परमाणवः आसन्, तथा अत्र औपनिषदसिद्धान्ते नाङ्गीक्रियते । अत्र पूर्वं केवलमात्मा एवासीद् इत्युच्यते । अत एव उपनिषत्सु बहुत्र एतदेवोच्यते—*आत्मा वा इदमेक एवाग्र आसीद्* इति ।

स सर्वज्ञस्वाभाव्याद् आत्मा एक एव सन् ईक्षत। अत्र शङ्का भवितुमर्हति । जगत उत्पत्तेः पूर्वं कार्यकरणाभावात् स आत्मा कथम् ईक्षणं कृतवान् इति । अयं न दोष इति सिद्धान्ती प्रतिपादयति । स आत्मा स्वभावत एव सर्वज्ञः । मन्त्रा अपि अस्मिन् विषये प्रमाणीभूताः । यथा—*अपाणिपादो जवनो ग्रहीता* [श्वेताश्वतरोपनिषद् ३.१९] इति । किन्तु स आत्मा केन अभिप्रायेण ईक्षणं कृतवान् इति शङ्का पुनर्भवितुमर्हति । स आत्मा लोकान् अम्भःप्रभृतीन् प्राणिकर्मफलोपभोगस्थानभूतान्नु सृजेऽहमिति ईक्षणं कृतवान् ।

## २. आत्मनः लोकसृष्टिः

आत्मा एक एव पूर्वमासीदित्युक्त्वा तस्य ईक्षणविषये प्रतिपादितम् । स आत्मा आदौ लोकान् असृजत । लोकसृष्टिकारिका श्रुतिस्तावत्—

स इमांल्लोकानसृजत । अम्भो मरीचीर्मरमापोऽदोऽम्भः

---

[1] यथा सलिलात्पृथक् फेननामरूपव्याकरणात्प्राक्सलिलैकशब्दप्रत्ययगोचरमेव फेनम्, यदा सलिलात्पृथङ् नामरूपभेदेन व्याकृतं भवति, तदा सलिलं फेनं चेति अनेकशब्दप्रत्ययभाक् सलिलमेवेति चैकशब्दप्रत्ययभाक्च फेनं भवति, तद्वत् । [ऐतरेयोपनिषदः शाङ्कभाष्यम् १.१.१]

परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः ।
पृथिवी मरो या अधस्तात्ता आपः ॥ इति ।

[ऐतरेयोपनिषद् १.१.२]

अर्थात् स आत्मा अम्भः, मरीचिः, मरम्, आपः— इत्येतेषां लोकानां सृष्टिं कृतवान् । द्युलोकात् परं यो लोकोऽस्ति, किञ्च स्वर्गो यस्य प्रतिष्ठा, सोऽम्भः, अन्तरिक्षं मरीचिलोकः, पृथिवी मरुलोकः, पृथिव्या अधो विद्यमानो लोक आपः । एवमत्र लोकाः तत्स्वरूपं च संक्षेपेण प्रदर्शितम् ।

## २.१. निरुपादानस्य आत्मनः सृष्टिकर्तृत्वम्

स आत्मा एतेषां लोकानां सृष्टिं कृतवान् । यथा बुद्धिमान् शिल्पकार एवंप्रकारकान् प्रासादादीन् सृजे इति पूर्वम् ईक्षणं करोति, तदनन्दरं च प्रासादादीन् सृजति, तथैव आत्मापि आदौ ईक्षणं कृतवान् पश्चात् च लोकान् सृष्टवान् । अत्र शङ्का भवति । शिल्पकारादयस्तु तत्प्रासादादीनामुपादानैः सह युक्ताः भवन्ति । अत एव प्रासादादिसृष्टिः सम्भवति । किन्तु उपादानरहितः स आत्मा कथं लोकान् सृजतीति ।

नायं दोष इति प्रतिपादयति सिद्धान्ती । श्रीशङ्कराचार्यः सलिलफेनदृष्टान्तद्वारा एव प्रतिपादयति– "सलिलफेनस्थानीये आत्मभूते नामरूपे अव्याकृते आत्मैकशब्दवाच्ये व्याकृतफेनस्थानीयस्य जगत उपादानभूते सम्भवतः । तस्माद् आत्मभूतनामरूपोपादानभूतः सन् सर्वज्ञो जगन्निर्मिमीत इत्यविरुद्धम्"[२] इति । अर्थात् फेनस्थानीय-अव्याकृतनामरूपे आत्मशब्दवाच्ये एव, ते व्याकृतफेनस्थानीयस्य जगत उपादानभूते । अतः सर्वज्ञ आत्मा आत्मभूतनामरूपोपादानस्वरूपः सन् जगत् रचयति । अत्र न कश्चिद् विरोधः । एवमत्र अविरोधप्रतिपादनं कृतम् । पुनरपि समाधानान्तरं प्रदीयते । यथा बुद्धियुक्तो मायावी उपादानाभावेनैव स्वयं स्वमेव अन्यरूपेण आकाशे गच्छन्तमिव निर्मिमीते, तथैव सर्वशक्तिमान् महामायावी सर्वज्ञो देवः स्वमेव जगद्रूपेण अन्यस्वरूपे निर्मिमीते । एतत् समाधानं युक्ततरमिति प्रतिपादयति भाष्यकारः । एवं सति कार्यकारणोभयासद्वाद्यादिपक्षाः न प्रसज्जन्ते सुनिराकृताश्च भवन्ति । एवमत्र निरुपादानस्य आत्मनः सृष्टिकर्तृत्वं निरूपितम् ।

---

[२] ऐतरेयोपनिषदः शाङ्करभाष्यम् १.१.२

## २.२. आत्मनः सृष्टलोकाः तत्स्वरूपञ्च

स आत्मा अम्भो मरीचीर्मरमाप इति लोकान् सृष्टवान् इत्युक्तम् । स आकाशादिक्रमेण अण्डमुत्पाद्य अम्भःप्रभृतीन् लोकानसृजत । ते अम्भःप्रभृतयो लोकाः कीदृशा इति श्रुतौ एवोच्यते । अदः अम्भःशब्दवाच्यो लोकः । एषः द्युलोकात् परं तिष्ठति । मेघानां जलानां च धारकः स भवतीति कारणात् तस्य अम्भ इति नाम । अस्याम्भलोकस्य द्युलोक आश्रयः प्रतिष्ठा वा । द्युलोकादधस्ताद् अन्तरिक्षलोको विद्यते । एष एव मरीचिलोकः । अस्य एकत्वेऽपि अनेकस्थानभेदकारणात् 'मरीचयः' इति बहुवचनरूपेण पदप्रयोगः श्रुतौ दृश्यते । अथवा रश्मिभिः सम्बन्धकारणात् मरीचिरिति नाम । अस्माद् मरीचिलोकात् परं मरलोकस्य वर्णना प्राप्यते । पृथिवीलोक एव मरलोक उच्यते । यतो हि तत्र प्राणिनो म्रियन्ते । शाङ्करभाष्येऽपि उच्यते— "पृथिवी मरो म्रियन्तेऽस्मिन् भूतानीति"[३] इति । यश्च लोकः पृथिव्या अधो विद्यते, ता आपः कथ्यन्ते । अप्-शब्द आप्-धातोः सिध्यति । अधोलोकविद्यमानप्राणिभिः प्राप्यते अयं लोक इति कारणात् प्राप्तिरूपार्थविशिष्ट-आप्-धातोरस्य लोकस्य नाम इत्यवगन्तव्यम् । यद्यपि सर्वेऽपि लोकाः पञ्चभूतात्मकाः, तथापि अपां बाहुल्याद् अन्नामभिरेवाम्भो मरीचीर्मरमाप इत्युच्यन्ते । अद्भ्यः पुनः पुरुषरूपलोकपालानां सृष्टिर्भवति । एवं क्रमेण सृष्टिप्रक्रिया चलति ।

## ३. उपसंहारः

भाष्यकारो भगवान् श्रीशङ्कराचार्यः श्रुतियुक्त्यादिविविधप्रमाणैः उपनिषद्भाष्ये अद्वैतवेदान्तमतं सम्यक् प्रतिष्ठापयति । ऐतरेयोपनिषदि ब्रह्मणः स्रष्टृत्वं कर्तृत्वं च सम्यक् वर्णितमस्ति । ब्रह्मण ईक्षणकारणादेवास्य जगत उत्पत्तिः । ऐतरेयोपिषदः प्रथमाध्यायस्य प्रथमखण्डे आदावेव ब्रह्मणः सृष्टिप्रतिपादिका श्रुतिर्विद्यते । तदनन्तरं तादृशेक्षणकारणात् सृष्टिक्रम आरभ्यते । भाष्यकारो विविधोदाहरणप्रदर्शनद्वारा विषयमेतं सम्यक् निरूपितवान् ।

तत्र आत्मा एक एवासीदित्युक्तम् । तं विना अन्यं किमपि सक्रियं वस्तु नासीत् । अहं लोकानां सृष्टिं करिष्यामीति स आत्मा ईक्षितवान् ।

[३] ऐतरेयोपनिषदः शाङ्करभाष्यम् १.१.२

अतः स तदनुसारेण सृष्टिमारब्धवान् । तत्र आत्मा अधुनापि एक एवेति आत्मन एकत्वविचारे प्रतिपाद्यते । किञ्च स किमीक्षितवान् इत्यपि तस्यां श्रुतौ एवोच्यते । इतःपरं तत्र लोकसृष्टिरप्याम्नाता । स आत्मा अम्भलोक-मरीचिलोक-मरलोक-अब्लोकानां सृष्टिमकरोत् । अत्र निरुपादान आत्मा कथं लोकान् सृजतीति शङ्का निवारिता । निरुपादानस्यात्मनः सृष्टिकर्तृत्वं भाष्ये सम्यक् प्रतिपादितम् । ततश्च लोकानां स्वरूपमुक्तम् । द्युलोकात्परं यो लोकस्तिष्ठति, द्युलोको यस्य प्रतिष्ठा, स अम्भोलोकः, अन्तरिक्षं मरीचिलोकः, पृथिवी मरलोकः, तदधो विद्यमान अब्लोकः । अपामधिकताकारणात् एते आप एवोच्यन्ते । एतेभ्योऽद्भ्यः पुनः पुरुषरूपलोकपालानां रचना सञ्जाता, ततस्तदधिष्ठातृदेवताः, तदन्नं, तद्भोगस्थलमित्यादिक्रमेण सृष्टिक्रमो वर्णितः । एवमत्र आत्मन ईक्षणपूर्वकसृष्टिविचारः ऐतरेयोपनिषदुक्तदिशा प्रतिपादित इति शम् ।

✶ ✶ ✶

## Bibliography


1. *ईशादि नौ उपनिषद् (शाङ्करभाष्यार्थ)*; गीताप्रेस ; गोरखपुर ; २०७४ संवत्सरः ।
2. *भारतीयदर्शनसार*; सर्वज्ञभूषण ; संस्कृतगङ्गा ; प्रयाग ; २०२१ ; द्वितीय संस्करण ।
3. *संस्कृतसाहित्येतिहासः* ; आचार्यलोकमणिदाहालः ; चौखम्बा कृष्णदास अकादेमी ; वाराणसी ; २०१६ ।
4. *संस्कृत वाङ्मय का बृहद् इतिहास*; आचार्य बलदेव उपाध्याय, प्रो. श्रीनिवास रथ (प्रधानसम्पादकौ) ; गङ्गाधर पण्डा (सम्पादकः) ; उत्तर प्रदेश संस्कृत संस्थान ; लखनऊ ; २००६ ।

<https ://advaitasharada.sringeri.net/> Advaitasāradā


✳ ✳ ✳

# तदभावाधिकरणविमर्शः— शङ्कररामानुजनिम्बार्कबलदेवमतसमीक्षणम्

**बुद्धदेवदासः *, डॉ. राकेशदाशः †**

## Abstract

[तदभावाधिकरणे शङ्कराचार्यादीनां मतानां संक्षेपेण विवेचनम् एतत् । शङ्कराचार्यः सुषुप्तौ जीवस्य ब्रह्मैकत्वं दृढीकुर्यात् । नाड्यादीनां द्वारात्मकस्वरूपम् उद्धृत्य परविषयज्ञानस्य असम्भाव्यत्वात् जीवस्य स्वभाविकसम्पत्तिमेव मोक्षलक्षणं मन्यते । सुषुप्तौ ब्रह्मणि एव सर्वस्वरूपं दृश्यते, द्वैतस्य कल्पना नास्ति । रामानुजाचार्यः भेदाभेदवादेन जीव-परब्रह्मणोः सम्बन्धं स्वीकार्यं वदति; जीवः परब्रह्मणा नित्यं सम्बन्धितः, परन्तु व्यक्तिस्वरूपेण अपि अवशिष्टः । तदभावाधिकरणे रामानुजाचार्यः जीवस्य आत्मनिष्ठां तथा भक्तिसाधनस्य महत्त्वं रक्षति । निम्बार्काचार्यः भेदाभेदस्य वैष्णवपरम्परया स्नेहयुक्तम् एकत्वं प्रतिपादयति । भक्तिसम्बन्धेन जीवस्य भेदम् अपि नाशयति, परब्रह्मसहयोगं प्रमुखं मन्यते । बलदेवाचार्यः अधिकं स्वभाष्यं भेदप्रधानपठने समर्पयति, तेन जीवस्य पृथग् अस्तित्वं तथा परब्रह्मतः भिन्नता अधिकं दृढीकृता भवति । एतेषां मतानां मध्ये तदभावाधिकरणस्य विवेचनं मुख्यतया जीवब्रह्मभेदाभेदविषये अस्ति । निष्कर्षः— तदभावस्य व्याख्या परम्परानुसारं भिन्ना, परन्तु सर्वे मोक्षलक्ष्यं जीवब्रह्मसम्बन्धे अन्वेषणं कुर्वन्ति ।]

**कुञ्चिकाशब्दाः**— स्वप्नः, सुषुप्तिः, जाग्रत्, प्रबोधः, ब्रह्मसूत्रम्, तदभावाधिकरणम्, शाङ्करभाष्यम्, बलदेवभाष्यम्, निम्बार्कभाष्यम्, रामानुजभाष्यम् ।

## ०. भूमिका

माण्डूक्योपनिषदि यथा एकस्यैव ओङ्काररूपस्य अक्षरब्रह्मणः अकारादिवर्णभेदान् मात्राभेदान् पादभेदान् वा प्रदर्श्य, यथा वा स्वप्नाद्यवस्थाभेदान् स्थानभेदान् अभिमानिजीवभेदान् चोक्त्वा तेषां समेषाम् ऐक्यमपि प्रोक्तं, तथैव अत्रापि जीवब्रह्मणोः ऐक्यं प्रतिपाद्यं मनसि आधाय क्रमशः अवस्थाभेदाः तत्र तत्र च अभिमानिजीवभेदाः प्रदर्श्यन्ते ।

---

* शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य संस्कृतदर्शन-विभागे, पश्चिमवङ्गेषु, Email : buddhadev.das.rkmvu@gmail.com

† सहायकाध्यापकः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य संस्कृत-दर्शनविभागे, पश्चिमवङ्गेषु ।

एकस्यैव ब्रह्मणो देहादियोगात् जीवभेदभावः भणितः । पूर्वस्मिन् अधिकरणे स्वप्नः व्याख्यातः, इदानीं सुषुप्तिः व्याख्यायते । किमर्थम् एवं जीवस्य अवस्थाः क्रमशः प्रतिपाद्यन्ते इति प्रश्नस्य उत्तरकथने भिन्नभिन्नभाष्यकाराणां मतानि ईषद् भिद्यन्ते । तथापि अनेन ईश्वरस्य ऐश्वर्यं वर्ण्यते इत्यत्र न कस्यापि मतपार्थक्यम् । ऐक्यस्य कथम्भावनायाम् एव मतपार्थक्यं न तु स्वप्नाद्यवस्थाभेदे ।

**१. तदभावो नाडीषु तच्छ्रुतेरात्मनि च**[१]

बलदेवाचार्यः अस्य अवतरणिकाभाष्ये स्पष्टम् उक्तवान् यत्, इदानीं सुषुप्तिस्थानं विचार्यते इति । सुषुप्तिविषयिण्यः बह्व्यः श्रुतयः प्राप्यन्ते यथा छान्दोग्योपनिषदि वर्तते— "आसु तदा नाडीषु सुप्तो भवति" इति । बृहदारण्यकोपनिषदि यथा "ताभिः प्रत्यवसृप्य पुरीतति शेते" इति, अपि च "य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते" इत्येवम् । अत्र आकाशपदं ब्रह्मपरम् अस्ति । एतादृश्यः अन्याः अपि श्रुतयो वर्तन्ते । एतासु श्रुतिषु सुषुप्त्याधारत्वेन नाड्यः पुरीतद् ब्रह्म च कथ्यन्ते । एतेषु श्रुताधारेषु कश्चन एकः एव विकल्पः विचारणीयः अथवा एतेषां समुच्चयः इति संशये सति पूर्वपक्षः उक्तः— विकल्पः एव विचारणीयः इति । पूर्वपक्षमते युक्तिः प्रदर्श्यते यत्, तुल्यार्थशब्दसमूहस्य परस्परापेक्षायाः अदर्शनाद्, तुल्यार्थास्तु विकल्पेरन् इति न्यायाच्च विकल्पः एव विचारणीयः । तदुत्तरं ब्रवीति समुच्चयः एव अत्र विचार्यः, यतोहि सूत्रे चकारेण नाडी ब्रह्म पुरीतच्च इति एतेषां समुच्चयः कथितः इति । तदभावः नाम तयोः जागरस्वप्नयोः अभावः सुषुप्तिः इत्यर्थः । सा सुषुप्तिः त्रिषु अपि नाडीपुरीतद्ब्रह्मसु समुच्चिता भवति इत्यभिप्रायः । कारणं हि तादृशी श्रुतिः । तानि सर्वाणि अपि सुषुप्तिस्थानानि । विकल्पपक्षे श्रुतिबाधसम्भवाद् विकल्पासम्भावना । सुषुप्तौ नाडीप्राणयोः समुच्चयः दृश्यते । तथाहि श्रुतिः "तासु तदा भवति यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति" इति । नाडीप्राणयोः समुच्चयविषये तुल्यार्थत्वस्य अभावात् प्रयुक्तन्यायानुसारं विकल्पः न सम्भवति, अपि च समुच्चयः एव । यथा सकलः लोकः द्वारेण एव प्रासादं प्रविश्य शय्यायां शेते, तथा द्वारभूतनाडीभिः पुरीतदन्तर्वर्तिनि ब्रह्मणि अवस्थानं भवति ।

---

[१] ब्रह्मसूत्रम् ३.२.७

एवंप्रकारेण नाडीप्रभृतीनां समुच्चयः प्रोक्तः । अतः ब्रह्म एव सुषुप्तिस्थानम् । पुरीतद् हृत्पद्मस्य आवरकमात्रम् ।

रामानुजाचार्यः अपि त्रयाणां नाडीपुरीतद्ब्रह्मणां विकल्पः समुच्चयो वा सुषुप्तिस्थानम् इति सन्देहे सति विकल्पः एव सुषुप्तिस्थानं भवितुं योग्यम् इति पूर्वपक्षम् उक्तवान् । यतो हि श्रुतिवाक्यानि भिन्नस्थानानि कथयन्ति । "यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति आसु तदा नाडीषु सुप्तो भवति" इत्यत्र नाड्यः सुषुप्तिस्थानत्वेन कथिताः । "अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते" इत्यत्र पुरीतत् सुषुप्तिस्थानत्वेन कथितः । अपि च "यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति" इत्यत्र ब्रह्म सुषुप्तिस्थानम् उक्तम् । तस्माद् एवं प्रतिपादितत्वात् संशयः भवति— किम् एतेषां त्रयाणाम् अपि समुच्चयेन सुषुप्तिस्थानत्वम् उत विकल्पेन इति । पूर्वपक्षे विकल्पेन एतेषां सुषुप्तिस्थानत्वम् उच्यते । यतो हि एतेषां परस्परनिरपेक्षत्वप्रतीतिः अस्ति, अपि च युगपद् एकस्मिन् समये अनेकस्थानवर्तित्वम् अनुपपन्नम् अस्ति । अतः एतेषु एकम् एव सुषुप्तिस्थानं भवेद् इति पूर्वपक्षमतम् । सिद्धान्तम् उपस्थापयितुं सूत्रं व्याख्यातम्— तदभावः स्वप्नाभावः सुषुप्तिः नाडीषु पुरीतति आत्मनि च भवति इति । कार्यभेदे सति न समुच्चयः, अपि तु कार्याभेदे समुच्चयः । प्रासादखट्वापर्यङ्कसदृशाः नाडीपुरीतदात्मानः भवन्ति । अतः यथा पर्यङ्कः साक्षात् शयनस्थानम् अस्ति चेदपि प्रासादः खट्वा च शयनस्थाने भवतः । तथैव ब्रह्मणः साक्षात् सुषुप्तिस्थानत्वे अपि नाडीनां पुरीततश्च सुषुप्तिस्थानत्वम् ।

निम्बार्काचार्यः भाषते यत्, ब्रह्म एव जीवस्य सुषुप्तिस्थानम् इति । तथा हि श्रुतयः उदाह्रियन्ते— "आसु तदा नाडीषु सृप्तो भवति", "ताभिः प्रत्यवसृप्य पुरीतति शेते", "य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते" इति । एताभिः श्रुतिभिः प्रमाणितं यत्, सुषुप्तिकाले प्रथमं हितानामिकासु बहुसङ्ख्यकासु नाडीषु जीवस्य प्रवेशः, ततः पुरीतन्नाड्याम् अवस्थितिः, अन्तिमे च ब्रह्मात्मके आकाशे शयनम् इति ।

शङ्कराचार्यः पूर्वोक्तानि श्रुतिवाक्यानि उदाहृत्य संशयं प्रदर्शितवान्— एतानि नाड्यादीनि निरपेक्षतया भिन्नानि सुषुप्तिस्थानानि उत सापेक्षतया

एकं सुषुप्तिस्थानम् इति। भिन्नानि इति पूर्वपक्षं प्रदर्शयितुं युक्तीः संगृह्णाति। समानार्थानां व्रीहियवादीनां परस्परापेक्षत्वं न क्वचिदपि दृश्यते। अर्थात् व्रीहीणां यवानां वा विकल्पेन यागे प्रयोजनम् अस्ति। यतो हि पुरोडाशनिर्माणरूपं समानमेव प्रयोजनं व्रीहिभिः यवैः वा सिद्ध्यति। तादृशम् एव अत्र त्रयाणाम् अपि नाड्यादीनां सुषुप्तिरेव प्रयोजनम्। अतः एतानि निरपेक्षतया भिन्नं भिन्नं सुषुप्तिस्थानं भवितुं युक्तम्। अपि च, यथा पुरीतच्छब्दे नाडीशब्दे च सप्तमीविभक्तेः प्रयोगाद् आधारत्वम् आश्रयत्वं वा ज्ञापितं, न तथा सच्छब्दे सप्तमीप्रयोगः अस्ति, सता सोम्य इत्यत्र तृतीयविभक्तिप्रयोगस्य दृष्टत्वाद् इति चेन्न। यतो हि प्राणशब्देन छान्दोग्योपनिषदि सद्वस्तु गृह्यते, तत्र च प्राणस्य आश्रयत्वम् उक्तम्। अतः पृथक्तया सप्तमीग्रहणस्य आवश्यकता नास्ति। तथापि सच्छब्दे सप्तमीप्रयोगः अस्त्येव "सति सम्पद्य न विदुः सति सम्पद्यामहे" इत्यत्र। तस्मात् त्रीणि स्थानानि अपि विकल्पेन आधारः भवितुं योग्यानि इति प्राप्तम्। एवम् अत्र पूर्वपक्षं वर्णयित्वा तन्निराकरणपूर्वकं सिद्धान्तं वर्णयति— नाड्यादीनि समुच्चयेन क्रमशः सुषुप्तिस्थानानि भवन्ति, न तु विकल्पेन इति। यतो हि श्रुतिः एतेषां समेषां क्रमशः सुषुप्तिस्थानत्वं प्रत्यपादयत्। न कुत्रापि विकल्पार्थगन्धलेशो वर्णितः। यश्च धान्ययवदृष्टान्तः प्रोक्तः सः विषमः। यस्माद्धि श्रुतिः तद्विषये वा इति शब्देन विकल्पार्थम् अज्ञापयत्। किन्तु नाड्यादीनां परस्परसापेक्षत्वात् निरपेक्षत्वाभावाद् वा, एकस्य अभावे अन्यस्य सुषुप्तिस्थानत्वं विकल्पेनापि कदाचिन्न युक्तम्। अपि च यदुक्तम् एकार्थत्वात् विकल्पेन सुषुप्तिस्थानं भवति इति, तदपि न सङ्गतम्। एकार्थत्वं कथं ज्ञातम्— प्रमाणतः सप्तमीविभक्तिप्रयोगाद् वा इति एकार्थत्वप्रतिपादने पक्षद्वयम्। प्रथमपक्षं निराकृतं तादृशप्रमाणाभात्। द्वितीयम् अपि निराक्रियते सप्तमीविभक्तेः तादृशार्थप्रतिपादकसामर्थ्याभावात्। पुरीतच्छब्दे नाडीशब्दे सच्छब्दे च सप्तमीभक्तेः सत्वाद् अपि तेषां न समार्थत्वं, नापि निरपेक्षतया विकल्पेन सुषुप्तिस्थानत्वं सम्भवति। यथा पर्यङ्कस्य धारणमेव प्रासादस्य प्रयोजनम् अस्ति, शयितस्य धारणञ्च पर्यङ्कस्य प्रयोजनम् अस्तीति भिन्नार्थत्वे अपि सप्तमीप्रयोगः सम्भवति— पर्यङ्के शेते, प्रासादे शेते चेति। अतः एवं वक्तुं न युक्तं यत्, एकार्थानाम् एकविभक्तित्वम् इति। तस्मात् समुच्चयेन पुरीतत् नाड्यश्च ब्रह्मगमनाय द्वाराणि भवन्ति, ब्रह्म च सुषुप्तिस्थानम्

अस्ति । नाड्यः सुषुप्त्यर्थं ब्रह्मगमनाय द्वाराणि, न तु भिन्नानि निरपेक्षाणि सुषुप्तिस्थानानि । अत्र प्रश्नः भवितुम् अर्हति यत्, यत्र नाडीनां निरपेक्षतया सुषुप्तिस्थानत्वम् आगमवाक्येन प्रोक्तं तत्र कथं सापेक्षत्वे सङ्गतिः इति । उच्यते— प्रकरणान्तरे सुषुप्तिस्थानत्वेन प्रसिद्धस्य ब्रह्मणः निषेधाभावात् नाड्यादिद्वाराणि अवलम्ब्य ब्रह्मणि एव सुषुप्तस्य अवस्थितिः उपपद्यते इति । तर्हि द्वारात्मकत्वं चेत् नाडीशब्दे कथं सप्तमीविभक्तियोगः इत्यपि शङ्का न कर्तव्या यतो हि तथापि प्रयोगः सम्भवति यथा गङ्गया सागरं गतः इत्यत्र गङ्गायां गतः एव सागरं गच्छति । अथवा भवितुम् अर्हति ब्रह्ममार्गस्य नाडीद्वारात्मकस्य स्तुत्यर्थं सुषुप्तिस्थानत्वेन कीर्तनम् इति । नाडीषु सुषुप्तिम् उक्त्वा "तं न कश्चन पाप्मा स्पृशति" इति पुनः नाड्यः प्रशंस्यन्ते । पाप्मस्पर्शाभावहेतुश्च प्रदर्श्यते "तेजसा हि तदा सम्पन्नो भवति" इति । अर्थात् तेजोऽभिभूतः सन् न बाह्यान् पदार्थान् पश्यति अथवा तेजो नाम ब्रह्म भवितुं युक्तं, तेन एकीभवति इत्यर्थः । तेजसः ब्रह्मत्ववाचिका श्रुतिः "ब्रह्मैव तेज एव" इति । अतः नाडीद्वारेण ब्रह्मणि सम्पन्नो भवति, तस्मान्न कश्चन पाप्मा तं स्पृशति इत्यर्थः । पाप्मस्पर्शाभावहेतुः भवति ब्रह्मसम्पत्तिः । तथाहि श्रुतिः "सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः" इति । एवं सति, प्रकरणान्तरप्रसिद्धस्य ब्रह्मणः सुषुप्तिस्थानत्वेन अभ्युपगमात् नाडीनां ब्रह्मानुगततया सुषुप्तिस्थानत्वेनैव समुच्चयः समधिगतः भवति । अपि च समानतया पुरीततः समुच्चयः समधिगन्तव्यः । "य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते", "पुरीतति शेते" चेति श्रुतिवाक्याभ्यां हृदयाकाशस्य सुषुप्तिस्थानत्वं प्रतिपाद्य पुनः पुरितततः सुषुप्तिस्थानत्वम् उक्तम् । पुरीतद् हृदयस्य आवरकम् अस्ति । पुरीतदन्तर्वर्तिनि हृदये शयानः "पुरीतति शेते" इति वक्तुं शक्यते यथा गृहस्य परिवेष्टने स्थितः गृहे स्थितः उच्यते । हृदयाकाशस्य च ब्रह्मत्वं प्रतिपादितं दहराधिकरणे । तथा च नाडीपुरीतत्समुच्चयः अपि श्रुत्या अवगम्यते "ताभिः प्रत्यवसृप्य पुरीतति शेते" इति । सत्प्राज्ञयोः ब्रह्मत्वं प्रसिद्धमेव, श्रुतौ ब्रह्मबोधकतया एतच्छब्दयोः दृष्टत्वात् । एवं नाड्यः पुरीतद् ब्रह्म चैतानि त्रीणि सुषुप्तिस्थानानि श्रुतिषु वर्णितानि । त्रिषु नाड्यः पुरीतच्च द्वाराणि, अपि च अविनाशि ब्रह्म एव सुषुप्तिस्थानम् । नाड्यः पुरीतच्च जीवस्य लिङ्गशरीरस्य उपाधेः वा आश्रयः भवति, यतो हि उपाधेः आश्रयत्वम् अतिरिच्य एतयोः जीवस्य आश्रयत्वम्

अनुपपन्नम् । उपाधिसम्बन्धव्यतिरेके सति एते जीवाश्रये भवितुं न शक्नुतः । यतो हि जीवः स्वरूपतः उपाधिरहितः सन् ब्रह्मैव भवति । तर्हि ब्रह्म कथं स्वप्नाश्रयः भवति इति चेत्, सुषुप्तौ आधाराधेयभिन्नताभिप्रायेण ब्रह्मणः आधारता नोक्ता, अपि च तादाम्याभिप्रायेण उक्ता । तथा हि श्रुतिः— "सता सोम्य तदा सम्पन्नो भवति, स्वमपीतो भवति" इति । सुप्तः जीवः स्वरूपं प्राप्नोति इत्यर्थः । कदापि जीवस्य ब्रह्मसम्पत्तिः नास्ति इति नैव वक्तुं शक्यते, यतो हि जीवस्य स्वरूपम् अविनाशि विद्यते । तर्हि कथं जीवः सुषुप्तौ स्वरूपं प्राप्नोति इति प्रोक्तम् इति चेत्, स्वप्नजागरावस्थयोः जीवस्य पररूपप्राप्तिरिव भवति, तां पररूपप्राप्तिम् अपेक्ष्य सुषुप्तौ स्वरूपापत्तिः इति विवक्षा । यथा प्रोक्तं स्वमपीतो भवति इति । तस्मात् तत्र सुषुप्तौ भेदकोपाध्यभावात् तत्र कदाचित् सत्सम्पत्तिः कदाचिन्न इति अयुक्तम् । अर्थात् कदाचित् स्वरूपेण ब्रह्मणि सम्पत्तिः कदाचित् नाडीपुरीतत्सु इति न सम्भवति । सर्वदा सुषुप्तौ एकीभवनम् उच्यते । ब्रह्म विहाय नाडीनां पुरीततश्च सुषुप्तिस्थानत्वेन अङ्गीकारे सुषुप्तिः भिद्येत । यतो हि यदा सता सम्पन्नः भवति तदा एकीभवनात् करणाभावाच्च न किञ्चित् पश्यति इति एतदर्थबोधिका श्रुतिः विद्यते । किन्तु नाडीषु पुरीतति च सुषुप्तिकाले करणाभावः अथवा एकीभवनं न श्रूयते । तस्मात् सुषुप्तिः अपि भिन्नरूपा स्यात् । पुरीतति नाडीषु च एकीभवनाभावात् तत्र विज्ञानाभावः न स्यात् । यतो हि "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति" इति श्रुतिः वदति । अथवा "यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येत्" इति श्रुतेः । तस्मात् सुषुप्तौ विज्ञानाभावः न स्यात् । जीवः नाडीषु पुरीतति च भवति, विषयाश्च बहिः भवन्ति इति एकीभवनाभावे अपि अविज्ञानं प्रति अतिदूरत्वादिकारणानि भविष्यन्ति, अनेन प्रकारेण च विषयविज्ञानाभावात् समाना सुषुप्तिः स्यात् इति चेत्, सत्यं तथा स्यात् यदि जीवः स्वभावतः परिच्छिन्नः स्वीकृतः स्यात् । जीवस्य स्थूलसूक्ष्मशरीराभ्याम् अन्यः परिच्छेदः नास्ति । तस्मात् एताभ्याम् अतिरिक्तः अतिदूरत्वादिः अविज्ञानहेतुः कल्पनानर्हः । यदि अतिदूरत्वादिः अविज्ञानहेतुः स्वीकृतः स्यात् तथापि स्थूललिङ्गशरीरयोः उपशमनादेव सता एकीभूता व्यक्तिः किञ्चिदपि न जानातीति युक्तम् । यतो हि तदा समीपस्थम् अपि किञ्चिन्न जानाति । अस्तु यदि सर्वोपाध्युपशमः अभ्युपगन्तव्यः तर्हि समुच्चयः कथं सम्भवति । उच्यते, समुच्चयः समेषां समप्रधानतया न प्रतिपादितः, अपि

च प्रधानाप्रधानतया प्रोक्तः इति । तेन प्रकारेण पुरीतत् नाड्यश्च सुषुप्तिद्वाराणि भूत्वा अप्रधानतया सुषुप्तिस्थानानि उच्यन्ते । किन्तु प्रधानं सुषुप्तिस्थानं ब्रह्म एव । तस्यैव सुषुप्तिस्थानत्वम् इति ज्ञानस्य फलम् अस्ति । पुरीतत् नाड्यश्च सुषुप्तिस्थानत्वेन ज्ञेयाः इत्यत्र न कापि फलश्रुतिः प्राप्ता । अतः ब्रह्मैव सुषुप्तिस्थानम् इति ज्ञानं जीवस्य मुक्त्युपकारकं भवतीत्येतस्मादपि ब्रह्मणः सुषुप्तिस्थानत्वं युक्तम् ।

## १.१. आचार्यमतसमीक्षणम्

सर्वमतसमीक्षणेन अवगतं यत् समेषां मते समानमेव सुषुप्तिस्थानं ब्रह्मेति, पुरीतत् नाड्यश्च द्वाराणि, तथापि नाड्यः पुरीतच्च द्वाररूपाण्यपि अप्रधानतया समुच्चितानि सुषुप्तिस्थानत्वं भजन्ते इति । किन्तु विचार्यम् अस्ति यत् कथम् एकीभवनश्रुतिः समेषां पक्षे सिद्धान्तसाधिका । यतो हि यथा अद्वैते न तथा अन्येषु एकीभवनं जीवब्रह्मणोः अभ्युपगतं भवति । अतः सप्रसङ्गं विचार्यते मया अयं प्रसङ्गः । बलदेवाचार्याणां भाष्ये ऐकान्तिकतया अद्वैतं न स्वीकृतम् । तेषां मते जीवः कदापि न ब्रह्म भवितुम् अर्हति । यद्यपि जीवेश्वरयोः स्वामिभृत्यवत् भेदः न स्वीक्रियते तथापि अग्निविष्फुलिङ्गवत् सम्बन्धः स्वीक्रियते । किन्तु अभेदः नास्ति । अग्निविष्फुलिङ्गयोः भेदवत् जीवेश्वरभेदः । अतः भेदे सति एकीभवनं न युक्तम् । यदि अवयवानाम् अपि एकीभवनं सम्भवति यथा जनानामेकत्रीभवनम् इति उच्यते तदा एकविज्ञानेन सर्वविज्ञानं तु नोपपन्नं स्याद् इत्यपि अवगन्तव्यम् । निम्बार्काचार्यमतम् अपि समानदोषदुष्टम् । एवमेव रामानुजाचार्यमतमपि । एते आचार्याः ब्रह्मणः सविशेषत्वं वदन्ति । सर्वगुणवत्त्वं, सर्वशक्तिमत्त्वं, सर्वनियन्तृत्वं, सर्वकारणत्वम् इत्येवं ब्रह्मणः विशेषणानि । जीवस्य तु अल्पगुणवत्त्वम्, अल्पशक्तिमत्त्वम्, अल्पनियन्तृत्वम्, अल्पकारणत्वम् इत्यादीनि विशेषणानि । सत्यरूपेण एतानि विशेषणानि स्वीकुर्वद्भिः कदापि जीवेश्वरयोः स्वरूपतः एकीभवनं सम्यक् प्रतिपादितं न स्यात् । यतो हि अवयवाः जीवाः अवयवी चेश्वरः भवति चेदपि कदापि अवयवः स्वरूपतः अवयवी भवितुं नार्हति, न च अवयवी अवयवः भवितुं युक्तः । तथापि, प्रकृतस्थले तु सुषुप्तिः उपपन्ना, एकीभवनम् इत्यादिविषयान् परं पश्यामः इति चेन्न । सुषुप्तिरपि अनुपपन्नैव । एकीभवनं विना कथं श्रुत्यनुगुणा सुषुप्तिः स्यात् । श्रुतिस्तु सुषुप्तिविषये एव वदति— "सति सम्पद्य न विदुः

सति सम्पद्यामहे” इति । अपि च यत्र भेदः तत्र इतरज्ञानं, तर्हि यदि सुषुप्तौ एकीभवनं न स्यात् तर्हि अवयवानां जीवानां तद्भिन्नावयविनः ईश्वरस्य ज्ञानं स्यात् । तथा श्रुतिरपि— “यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति” इति । अतः सर्वथैव द्वैतमतं नान्वेति ।

## २. अतः प्रबोधोऽस्मात् [२]

पूर्वसूत्रव्याख्याने बलदेवाचार्यः उक्तवान् यत्, ब्रह्म साक्षात् सुषुप्तिस्थानम् इति । तदेव द्रढयन् अस्मिन् सूत्रभाष्ये प्रत्यपादयद् यत्, अत एव अस्माद् ब्रह्मणः एव सुषुप्त्यनन्तरं जागरणं भवति इति । श्रुतिरपि उदाहृता “सत आगम्य न विदुः सत आगच्छामहे” इति । अर्थात् प्रबुद्धो जीवो न जानाति यत् स ब्रह्मणः एव आगच्छति । एवं श्रुतिप्रतिपादनेन पुनः ब्रह्मणः सुषुप्तिस्थानत्वम् उपपन्नं भवति । यदि विकल्पेन कदाचिद् ब्रह्मणः कदाचित् नाडीभ्यः कदाचित् पुरीततः प्रबोधः सम्भवेत् तदा श्रुतिरपि तादृशम् उक्तवती स्यात् । परन्तु श्रुतिः केवलं ब्रह्मणः प्रबोधं न्यरूपयत् । तेन एकस्य ब्रह्मणः एव सुषुप्तिस्थानत्वम् उपपन्नम् ।

निम्बार्काचार्यमतं बलदेवाचार्यमतेन सह सादृश्यं भजते । अर्थाद्, यतो हि अस्माद् ब्रह्मणः एव प्रबोधः अपि श्रूयते, तस्मात् पुनः ब्रह्मणः सुषुप्तिस्थानत्वं प्राप्तम् इति निम्बार्काचार्यस्य संक्षेपभाष्यम् ।

रामानुजाचार्यमतं यथापूर्वम् अविशिष्टम् अस्ति । यतो हि ब्रह्म साक्षात्सुषुप्तिस्थानं तस्मात् तत एव प्रबोधः उपपद्यते । तथाहि सत आगम्येत्यादिश्रुतिरपि प्रतिपादयति । एवं रामानुजाचार्यस्य अविशिष्टं भाष्यम् ।

अत्र शङ्कराचार्यभाष्यम् अपि अविस्तृतम् अस्ति । यतो हि पूर्वसूत्रे सम्यग् विचारेण उपपन्नं ब्रह्मणः सुषुप्तिस्थानत्वम् । तस्मात् पुनः अत्र अधिको विचारो नावश्यकः । यतश्च श्रुत्या केवलं सतः एव प्रबोधः प्रोक्तो न नाडीभ्यो न च पुरीततः, तस्माद् आत्मा एव सुषुप्तिस्थानम् इति सिद्धान्तः । अतः संशयाभावान्न विचाराधिक्यम् ।

## २.१. आचार्यमतसमीक्षणम्

अत्र सूत्रभाष्येषु समानं मतं सर्वेषाम् आचार्याणां समापन्नम् । अतः

[२] ब्रह्मसूत्रम् ३.२.८

समीक्षणीयं विशिष्य किमपि नास्ति । सत आगम्य इत्यादिश्रुत्या सतः नाम ब्रह्मणः एव प्रबोधः प्रोक्तः । तस्माद् ब्रह्मैव सुषुप्तिस्थानम् इति सर्वैः स्वीकृतम् ।

### ३. अधिकरणोपसंहारः

अत्र अधिकरणे प्रथमो निष्कर्षस्तावत् सुषुप्तिस्थानं साक्षाद् ब्रह्मैव भवति इति प्राप्तम् । नाड्यः पुरीतच्च द्वाराणि भवन्ति । यतो हि ब्रह्मणि सम्पद्यमानस्य एव अन्यविषयकज्ञानाभावः सम्भवति, न नाडीपुरीतत्सु सम्पद्यमानस्य । एवं श्रुतिरपि प्रतिपादयति । श्रुतिः केवलं ब्रह्मणि एव जीवसम्पत्तिं प्रावदत् । "सता सोम्य तदा सम्पन्नो भवति, स्वमपीतो भवति" इति श्रुतिः । एतादृशी श्रुतिर्न नाड्यादिषु सम्पत्तिं प्रावदत् । अतो यस्माद् जीवः स्वभिन्नविषयकम् अज्ञानम् अनुभवति, तस्मात् स्वरूपसम्पत्तिरेव वक्तव्या । सा च सम्पत्तिः ब्रह्मणि एव सम्भवति । नाड्यादिषु सम्पद्यमानेषु सत्सु एकीभवनं न सम्पद्यते । न चैकीभवनं विना एकविज्ञानश्रुतिः सार्थक्यं भजेत । सदसद्वस्तुनोः एकीभवनं कदापि नार्हति । तथा च तमःप्रकाशवद् इत्यादिदृष्टान्तपूर्वकम् अध्यासभाष्ये प्रत्यपादयत् । श्रुतिश्च भवति— "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति" इति । अतः प्रधानं सुषुप्तिस्थानं ब्रह्मैव इति निष्कर्षः ।

द्वितीयो निष्कर्षः प्राप्यते यत् प्रबोधोऽपि अस्माद् ब्रह्मणः एव भवति, नान्यतः । तादृशी श्रुतिरपि विद्यते "सत आगम्य न विदुः सत आगच्छामहे" इति । अर्थात् सतः प्रबोधः इति प्राप्तम् ।

अतःपरं कर्मानुस्मृत्यधिकरणे यः सुप्तो भवति स एव उत्तिष्ठतीति विचार्यते । प्रकृताधिकरणेन कर्मानुस्मृत्यधिकरणस्य सङ्गतिः वर्तते । एतेषां चतुर्णाम् आचार्याणां भाष्यम् अवलोक्य अस्मिन् मतसाम्यं परिलक्षितम् । समेषां मते यः सुप्तः स एव उत्तिष्ठतीति सिद्धान्तः । स च सिद्धान्तः सूत्रगतकर्मादिशब्दानुरोधेन सम्यक् प्रतिपादितः । शङ्कराचार्यं विहाय अन्येषां त्रयाणाम् आचार्याणां पक्षे अयं विषयः सुलभश्चेदपि शङ्कराचार्यस्य अद्वैतभाष्यं किञ्चिद् विलक्षणतां भजते । यत्र हि द्वैतम् अस्ति, अवयवावयविभावोऽस्ति, अंशांशिभावोऽस्ति, विशिष्टता वास्ति तत्रैव एकीभूतस्य पृथग्भवनं सहजम् । यः सुप्तः स एव प्रबुध्यते इति सिद्धान्तः द्वैताद्वैतपक्षे ब्रह्मजीवयोः भेदाङ्गीकारात् तयोः पृथक्करणं सुलभम् । अतः सुषुप्तौ ब्रह्म सम्पद्य जीवः पुनः उत्तिष्ठति

अर्थात् पृथग्भवति इत्यत्र नासौविध्यम् । विशिष्टाद्वैते च किम् अपि विशेषणं भवति येन जीवेश्वरयोः विशिष्टत्वम् । तेन गुणादिविशेषणेनैव भेदे सति पुनः उत्थानं सम्भवति । अवयवावयविपक्षे चावयवोपचयापचयादिभावैः एकीभवनं पृथग्भवनं च नासम्भवम् । किन्तु शङ्कराचार्यस्य अद्वैतमते निरवयवब्रह्मसम्पत्त्युत्तरकाले पुनः प्रबोधः अनुपन्नः स्यात्, यथा हि जलबिन्दुदृष्टान्तः । एतस्योत्तरम् अवितथं प्रोक्तम् आचार्यशङ्करैः । यद्यपि जलाशये प्रक्षिप्तस्य तस्यैव उद्धरणं न सम्भवति अस्मादृशैः मानवैः तथापि हंसेन जलमिश्रितदुग्धाद् दुग्धं पृथक्कृतं दृष्टं लोके । एवम् एव अविद्यादिकारणात् सुषुप्तौ ब्रह्मसम्पत्तितः सुप्तस्यैव प्रबोधः सम्भवति ।

यो वै सुप्तो भवति स एव प्रबुध्यते इति प्रतिपादनात् सः जीवः जाग्रदाद्यवस्थात्रयसम्बन्धरहितः नित्यः शुद्धस्वरूपश्चेति निर्णीयते । यतो हि सः सुषुप्तिं गत्वा प्रत्यागच्छति, न तु सुषुप्त्या तस्य कोऽपि परमार्थतो विकारो जायते । क्षणिकसम्बन्धस्तु भवति । तेन तस्य क्षणिकमेव सुषुप्तत्वम् । क्षणिकत्वं नाम परिच्छिन्नकालत्वम् । अनेन नित्यत्वस्य शुद्धस्वरूपत्वस्य निर्णीतत्वात् तस्य जीवस्य तत्त्वमसि इत्यत्र महावाक्यप्रतिपाद्यब्रह्मैक्ययोग्यता अपि प्राप्यते । तथा हि विद्यारण्यस्वामिवचनं— "श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम्" इति । देहान्द्रियातीतत्वे जीवात्मनो नित्यत्वं शुद्धस्वरूपत्वम् । तथा च ब्रह्मणः शरीरराहित्यं श्रावयति काठकश्रुतिः— "अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति ।" इति । अतः पादगतमुख्यप्रतिपाद्येन अधिकरणप्रतिपाद्यः सङ्गतः । अत्राधिकरणार्थविचारणे प्रायेण समानार्थसमर्थनं दृष्टम् आचार्याणाम् ।

* * *

## Bibliography


1. *वेदान्तदर्शनम्*; स्वामिविश्वरूपानन्दः ; उद्बोधन-कार्यालयः ; कोलकाता ; २०२३ ।
2. *वेदान्तसूत्रम्*; महर्षिव्यासः ; श्रीश्रीमद्भक्तिवेदान्त-नारायण-गोस्वामि-महाराजः ; गौडीयवेदान्तप्रकाशनम् ; कोलकाता ; २०१६ ।
3. *वेदान्तदर्शन*; महन्त-श्रीस्वामि-सन्तदासजी-व्रजविदेही ; भारतीय-कला-प्रकाशनम् ; कोलकाता ; २०११ ।
4. *श्रीभाष्यम्*; रामानुजाचार्यः ; ललितकृष्णगोस्वामी ; चौखम्बा-संस्कृत-प्रतिष्ठानम् ; वाराणसी ; २००० ।

5. *वेदान्तदर्शनम्*; श्रीयुत-गोपालकृष्ण-भक्तः ; पुराणकार्यालयः ; कलिकाता ; १९९४ ।
6. *ब्रह्मसूत्रगोविन्दभाष्यम्*; बलदेवाचार्यः कृष्णदासः ; रमनलाल-बंसल-पुष्पराज-प्रेस ; मथुरा ; २०११ ।
7. *ब्रह्मसूत्रनिम्बार्कभाष्यम्*; बलदेवाचार्यः ; डॉ. मदनमोहन-अग्रवालः ; चौखम्बा-संस्कृत-प्रतिष्ठानम् ; दिल्ली ; २००० ।
8. *श्रीमद्भगवद्गीता*; स्वामिवासुदेवानन्दः ; उद्बोधन-कार्यालयः ; कोलकाता ; २०२२ ।
9. *उपनिषद्ग्रन्थावली*; स्वामिगम्भीरानन्दः ; उद्बोधन-कार्यालयः ; कोलकाता ; २०२३ ।
10. *वेदान्तपरिभाषा*; लोकनाथ-चक्रवर्ती ; संस्कृत-कलेज-विश्वविद्यालयः ; कोलकाता ; २०१९ ।

* * *

# ईक्षत्यधिकरणस्य पूर्वपीठिका

**ब्रह्मचारी अच्युतचैतन्यः (मनोमयः)***

## Abstract

[श्रीमच्छङ्करभगवत्पादविरचितस्य शारीरकमीमांसाभाष्यस्य प्रथमाध्यायस्य प्रथमपादे चेतनकारणविषयकं पञ्चमम् अधिकरणम् ईक्षत्यधिकरणमिति नाम्ना विलसति। अधिकरणस्य अस्य व्याख्यानात् प्राक् भाष्यकारैः काचित् पूर्वपीठिका प्रस्तुता । तं विषयं स्वीकृत्य अत्र किञ्चित् आलोच्यते । तत्र चेतनकारणवादे के के पूर्वपक्षाः सम्भवन्ति इति निरूप्य प्रधानमल्लस्य सांख्यस्य अचेतनप्रधानकारणवादः प्रस्तुतः । अनन्तरं कापिलैः यैः दोषैः चेतनब्रह्मकारणवादः दूषिताः ते दोषाः प्रतिपादिताः । प्रस्तावितं दोषजातं प्रकृते उपपद्यते न वा इत्यपि परीक्षितम् । ततः अधिकरणलक्षणं प्रस्तुत्य ईक्षत्यधिकरणस्य अधिकरणलक्षणघटकानि पञ्च अङ्गानि प्रतिपादितानि । एवम् अस्मिन् शोधप्रबन्धे ईक्षत्यधिकरणस्य पूर्वपीठिका निरूपिता ।]

**कुञ्चिकाशब्दाः** — ईक्षत्यधिकरणम्, प्रकृतिः, विकृतिः, पुरुषः, ब्रह्म, अधिष्ठानम् ।

## ईक्षत्यधिकरणे सम्भावितानां पूर्वपक्षाणां विमर्शः

अत्र पूर्वपक्षिणः साङ्ख्यादयः, तन्मध्ये साङ्ख्यमतं प्राधान्येन वर्तते । सिद्धान्तिनः तु वेदान्तिनः । चेतनकारणवादम् अस्वीकुर्वाणाः पूर्वपक्षिणः आदौ आक्षिपन्तः आहुः समन्वितसर्ववेदान्तसिद्धान्तानुसारेण ब्रह्मणः यत् सर्वज्ञत्वं, सर्वशक्तित्वं, जगदुत्पत्तिस्थितिनाशकारणत्वं च प्रतिपाद्यते तन्न समीचीनं, कारणं श्रुतिप्रमाणान्तरेण प्रधानादीनां जगदुत्पत्तिस्थितिनाशकारणत्वं प्रतिपाद्यते, तत्रैव वेदान्तवाक्यानां समन्वयसम्भवात् । अनुमानेनैव तन्मतं साधयन्तः ते अवदन् 'जगत् कार्यं जडप्रकृतिकं कार्यत्वात्, घटादिवत्' इति । अत्र व्याप्तिः भवति 'यत्र यत्र कार्यत्वं तत्र तत्र जडप्रकृतिकत्वम्' । जडप्रकृतिकत्वं तु प्रधाने वर्तते । अतः प्रधानं जगत्कारणम् इति । ततः सिद्धान्तिनः जिज्ञासितवन्तः यत् लोके घटोत्पत्तिस्थले चेतनस्यापि कारणरूपेण दर्शनात् चेतनकारणत्वं दृश्यते खलु । पूर्वपक्षिणः तदा आहुः सत्यम्, अस्माकं तदेव इष्टम्, अत्र व्याप्तिग्रहः

---

* ब्रह्मचारिप्रशिक्षणकेन्द्रम्, बेलुरमठः

भवति 'यज्जडं तत् चेतनसंयुक्तं यथा रथादि' ।[१] तर्हि चेतनसंयुक्तम् अचेतनं प्रधानं जगत्कारणम् इति सिद्धम् । नैयायिकादीनां मते ईश्वरः निमित्तकारणं परमाणुश्च समवायिकारणम् इति ।

**साङ्ख्यपक्षप्रस्तावः**

इतोऽनन्तरं भाष्यकाराः साङ्ख्यमतं विस्तार्य समलङ्कृत्य प्रतिपादितवन्तः । अचेतनस्य प्रधानस्य कथं सर्वज्ञत्वं, सर्वशक्तित्वं, जगदुत्पत्तिस्थितिनाशकारणत्वं सङ्गच्छते इति प्रश्ने सति प्रधानकारणवादिनः आहुः प्रधानं मूलप्रकृतिः, ततः एव सर्वाः विकृतयः उत्पद्यन्ते ।[२] ताभ्यः एव जगदुत्पत्तिः । अतः मूलप्रकृतेः एव पारम्पर्येण जगदुत्पन्नं भवति । 'जन्माद्यस्य यतः' इत्यस्मिन् सूत्रे जगतः उत्पत्तिस्थितिनाशकारणत्वेन ब्रह्मणः सर्वशक्तित्वं व्याख्यातं भवति । तदेव सर्वशक्तित्वं प्रकृतेः प्रधानस्य वा जगदुत्पत्तिस्थितिनाशकारणत्वेन तस्मिन् सङ्गच्छते इति । अतः प्रधानस्य सर्वशक्तित्वं प्रतिपादितं भवति । साङ्ख्यमते प्रधानस्य सर्वज्ञत्वं तस्य सत्त्वगुणाधिष्ठानत्वेन प्रतिपादितं भवति । श्रीमद्भगवद्गीतायां भगवता उक्तं 'सत्त्वात्सञ्जायते ज्ञानम्' इति । तेन सत्त्वधर्मेण योगिनः सर्वज्ञाः इति प्रसिद्धं लोके किमु वक्तव्यं तस्य सत्त्वगुणस्य अधिष्ठानविषये । पुनः सत्त्वगुणतारतम्येन पुरुषस्य सर्वज्ञत्वं किञ्चिज्ज्ञत्वं वा कल्पयितुं शक्यते । परन्तु साम्यावस्थायां त्रिगुणात्मके प्रधाने सत्त्वगुणस्य उपलभ्यमानत्वात् सर्वज्ञत्वं न विघटितम् । अतः प्रधानं सर्वज्ञम् इति प्राप्यते ।

**साङ्ख्यैः सिद्धान्ते दोषाध्यारोपः**

स्वपक्षं सम्यक् प्रतिपाद्य साङ्ख्याः वेदान्तमते दोषं प्रदर्शयन्तः आहुः ब्रह्मणः यत् सर्वज्ञत्वं प्रतिपाद्यते तत् सर्वज्ञानशक्तिमत्त्वेनैव प्रतिपादयितुं शक्यते । कारणं ब्रह्मणः सर्वेषां ज्ञानं न वर्तते, तेषां ज्ञानं प्राप्यैव ब्रह्म सर्वज्ञं भवितुम् अर्हति । यदि ज्ञानं नित्यं भवति तर्हि जानाति इत्यस्यां ज्ञानक्रियायां ब्रह्मणः स्वातन्त्र्यं हीयेत । तेन ब्रह्म अस्वतन्त्रं भवेत् । ज्ञानम् अनित्यम्

---

१ यद्यत्सुखदुःखमोहात्मकं तत्सर्वं परेणाऽधिष्ठीयमानं दृष्टं, यथा रथदिर्यन्त्रादिभिः । [साङ्ख्यतत्त्वकौमुदी, श्लोकः १७]

२ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ [साङ्ख्यतत्त्वकौमुदी, श्लोकः ३]

इत्येव गृहीत्वा सर्वं जानत् ब्रह्म सर्वज्ञं भवति इति ज्ञानक्रियामत्त्वेनैव तस्य सर्वज्ञत्वं व्याख्यातं भवति । परन्तु इतोऽपि अस्ति क्लेशः वेदान्तिनां नये यथा प्रागुत्पत्तेः ब्रह्म आकारशून्यम् अतः शरीरेन्द्रियाभावात् नास्ति तस्य ज्ञानोत्पत्तेः साधनम् । परन्तु साङ्ख्यानां तु प्रधानम् अनेकात्मकं[३], तस्य परिणामसंभवात् मृदादिवत् तस्य ज्ञानोत्पत्तिः भवितुम् अर्हति । असंहतस्य एकात्मकस्य ब्रह्मणः तथा परिणामासंभवात् नास्ति तस्य ज्ञानोत्पत्तिः ।

## अध्यारोपितदोषस्य औचित्यचिन्ता

अत्र आक्षेपस्थानम् एवम् अस्ति यत् ब्रह्मसूत्रे जिज्ञासाधिकरणे यत् ब्रह्म जिज्ञासितं तस्य लक्षणम् अनन्तरं त्रिषु अधिकरणेषु जगत्कारणत्वादिभिः प्रतिपादितं भवति, कथं तानि लक्षणानि साङ्ख्याः प्रधाने सङ्गमयन्ति इति चेत् उच्यते यत् ब्रह्म चेतनमिति क्वापि न प्रतिपादितम् । जिज्ञासाधिकरणस्य विषयवाक्यं भवति— "आत्मा वा अरे द्रष्टव्यः" [बृहदारण्यकोपनिषत् २.४.५] इत्यादि । अत्र नास्ति आत्मनः स्वरूपव्याख्यानम् । अनन्तरं जन्माद्यधिकरणे तु विषयवाक्यं भवति— "यतो वा इमानि भूतानि जायन्ते" [तैत्तिरीयोपनिषत् ३.१] इति । अत्र ब्रह्मणः चेतनस्वरूपत्वं न प्रतिपादितम् । पुनः शास्त्रयोनित्वाधिकरणे विषयवाक्ये ब्रह्म महत् भूतम् इति अङ्गीकृतम् । उक्तं च— "अस्य महतो भूतस्य निश्वसितमेतत् यद् ऋग्वेदः" [बृहदारण्यकोपनिषत् २.४.१०] इत्यादि । अतः स्पष्टतया जगतः चेतनकारणात् उत्पत्तिः न प्रतिपादिता । उपनिषत्सु अपि साधारणतया ब्रह्मणः चेतनत्वं न बोधितम् । तैत्तिरीये 'सत्यं ज्ञानम् अनन्तं ब्रह्म' इति प्रतिपादितं परन्तु स्पष्टतया शब्दतः तस्य चेतनत्वं नोक्तम् । अतः साङ्ख्याः ब्रह्मणः यानि लक्षणानि तानि प्रधाने सङ्गमयन्ति ।

एवं पूर्वपीठिका बोध्या ईक्षत्यधिकरणस्य । अस्याम् अधिगतायां हि ईक्षत्यधिकरणे साङ्ख्यादिमतं सम्यक् अलङ्कृत्य भाष्यकारैः क्रियमाणः शिरश्छेदः स्पष्टम् अवगम्येत अध्येतृभिः ।

## अधिकरणपञ्चाङ्गानि

इदानीम् ईक्षत्यधिकरणस्य अधिकरणलक्षणसंगतिः संक्षेपेण

---

३ त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ [साङ्ख्यतत्त्वकौमुदी, श्लोकः ११]

प्रतिपाद्यते । अधिकरणलक्षणं भवति—

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥ इति ।

१. विषयवाक्यम्—

"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इति उपक्रम्य "तदैक्षत बहु स्याम् प्रजायेयेति तत्तेजोऽसृजत" इति यावत् ।

२. विशयवाक्यम्—

विषयवाक्ये साक्षात् संशयः न वर्तते। पूर्वाधिकरणादीनाम् आलोचितविषयानुसारेण संशयः उत्पद्यते । तत्र संशयः जगज्जन्मादिकारणं साङ्ख्यशास्त्रोक्तं प्रधानम् उत ब्रह्म ।

३. पूर्वपक्षः—

त्रिगुणात्मकं प्रधानम् एव जगत्कारणम् ।

४. सिद्धान्तपक्षः—

श्रुत्यादिप्रमाणानुसारेण ब्रह्मणः चेतनस्य जगत्कारणत्वं प्रतिपाद्यते ।

५. सङ्गतिः—

जन्माद्यधिकरणादिषु यत् ब्रह्म सर्वेषां कारणं तत् चेतनं सत् एव सर्वकारणं भवति इति शम् ।

✶ ✶ ✶

## Bibliography


1. *ब्रह्मसूत्रशाङ्करभाष्यम्*; आचार्यजगदीशशास्त्री (सम्पादकः) ; वाराणसी : मोतीलाल बनारसीदस ।
2. *वेदान्तदर्शनम्*; स्वामी विश्वरूपानन्दः ; कलकाता : उद्बोधनकार्यालयः ।
3. *साङ्ख्यतत्त्वकौमुदी*; पं.ज्वालाप्रसादगौड़ः ; वाराणसी : चौखम्बा सुरभारती प्रकाशन ।


✳ ✳ ✳

# आधुनिकसंस्कृतसाहित्ये लोकधर्मिच्छन्दसाम् समीक्षात्मकमध्ययनम्

**डॉ. भास्करगङ्गोपाध्यायः ***

## Abstract

[अर्वाचीनसंस्कृतकाव्ये यत् वैप्लविकपरिवर्तनमागतं तत्र छन्दसि एव कृतनवप्रयोगः उल्लेखनीयोऽस्ति । दैशिकच्छन्दसां वैदेशिकच्छन्दसां प्रयोगो वा भवतु, कविः तत्र छन्दश्शास्त्रपरम्परातः पादचतुष्टयमग्रे स्थित्वा स्वात्मनः लोकधर्मित्वं साधयितुं यत्नं चकार । एतेषु छन्दस्सु सोहर, सिया, आलोलिका, गजल, लावनी, ठुमरी, कजरी, कब्वाली इत्यादीनि लोकगीतानि सम्मिलितानि सन्ति । परन्तु केषाञ्चन विदुषां मते गजले लोकधर्मिप्रयोगः न दृश्यते, नेदं स्थानीयगीतमतः वैदेशिकच्छन्दः । गजलच्छन्दः फारसीगजलकारैः संस्कृते प्रणीतम् । एतादृशि बहुभावभूमि-छन्दःशैली-समन्विते गजले कव्वालिया, नातः, प्रेम, नीत्युपदेशात्मकगीतानि युगीनविद्रूपाणामुपरि प्रहारः, क्रात् आह्वानम् इत्यादयः अपि सन्ति । उर्दू-फारसीभाषयोः गजलशैल्या आधारितं गीतं रागात्मकतानुसारेण हृदये अलौकिकमानन्दं संचारयति । अस्मिन् प्रबन्धे गजल, कजरी, लोरी, कव्वाली इत्यादिलोकधर्मिच्छन्दसां विषये आलोचनं विहितम् । बहवः आधुनिककवयः अपि एतादृशानि छन्दांसि उपयुज्य काव्यानि व्यरचयन् । ते विषयाः अत्र यथामति आलोच्यन्ते ।]

**कुञ्चिकाशब्दाः** — लोकधर्मिच्छन्दः, अभिराजयशोभूषणम्, वेणुजातम्, वीणाजातम्, सोहर, सिया, आलोलिका, गजल, लावनी, दोहा, सोरठा इत्यादयः ।

## १. भूमिका

अर्वाचीनसंस्कृतकाव्ये यत् वैप्लविकपरिवर्तनमागतं तत्र छन्दसि एव कृतनवप्रयोगः उल्लेखनीयोऽस्ति । दैशिकच्छन्दसां वैदेशिकच्छन्दसां प्रयोगो वा भवतु, कविः तत्र छन्दःशास्त्रपरम्परातः पादचतुष्टयमग्रे स्थित्वा स्वात्मनः लोकधर्मित्वं साधयितुं यत्नं चकार । अतः नवप्रयोगेऽस्मिन् भारतभूमिसम्बद्धं नवप्रयुक्तं छन्दः अस्ति तदेव लोकधर्मिच्छन्दः इत्युच्यते ।

“अभिराजयशोभूषणम्” इत्यत्र डा० मिश्रमहोदयः गीतभेदं निरूपयन् लिलेख यत् कर्णनीहारस्य कृते यत् गीतम् अमृततुल्यं भवति तदेव धात्रा मात्रा च सम्बद्धं सत् नादात्मकम् अक्षरात्मकमिति द्विधा विभक्तमस्ति । वेणुजातं

---

* प्रवक्ता, गयास्थितस्य २ मगध-उच्च-विद्यालयस्य, विहारेषु ।

वीणाजातं च प्रस्फुटितमेव धातुजगीतमित्युच्यते । गीतरूपेण विद्यमानं मातुजगीतं तु मुखादेव क्रियते । एतदेव गीतं यदा शास्त्रसम्मतरागेण गीयते तदा गीतकाव्यमिदं रागकाव्यमित्यभिधीयते । तथैव यद्गीतं स्वतन्त्ररीत्या सम्प्राप्तकण्ठध्वनिना सुखपूर्वकं तथा जनपद-ग्राम-कुल-जात्यनुसारं गीयते तदेव लोकगीतमित्युच्यते । एतदेव संगीतशास्त्ररहितं बन्धनमुक्तं आनन्दप्रदायकमस्ति ।

तच्च सद्योरसानन्ददायकं गतबन्धनम् ।
शास्त्रनियमनिर्मुक्तं लोकगीतं समुच्यते ॥

[अभिराजयशोभूषणम् २५४.७]

अत्र रागकाव्यार्थं शास्त्रसम्मतं गीतं भवेदिति तथैव लोकगीतार्थं प्रयुक्तो रागः लोकसम्मतो भवेदिति ।

### १.२. लोकधर्मिच्छन्दः

परन्तु लोकधर्मिच्छन्दसः प्रयोगस्य उद्देश्यं परम्परागतस्य छन्दःशास्त्रस्य उल्लंघनम् अथवा तस्य उपेक्षणं नासीत्, अपितु सर्वजनैः सह संस्कृतस्य संयुक्तीकरणम् । यदा संस्कृतच्छन्दस्सु तत्कालिकसमाजस्य संस्कृतेः च सौरभं जिघ्रति, तदा श्रोता तत्सर्वं योजयति । तत्र स्थानीयच्छन्दसः लयकारणत्वात् अज्ञातानां भाषाणाम् अपि समीकरणार्हता वर्तते । एतेषु छन्दस्सु सोहर, सिया, आलोलिका, गजल, लावनी, ठुमरी, कजरी, कब्वाली इत्यादीनि लोकगीतानि सम्मिलितानि सन्ति । यतोहि गीतमिदं जनपद-ग्राम-कुल-स्वजातीयपरम्परानुसारं कण्ठध्वनिवैशिष्ट्यानुसारं गीयते अतः लोकगीतिरित्युच्यते । जनपदानुसारेण रसिकलोकगीतं ब्रजक्षेत्रे, बाउल् बंगप्रदेशे, पण्डवानी छत्तीसगढप्रदेशे, रागिणी हरियाणाप्रदेशे, सोहर-स्कन्धहारीयचैत्रक-नकटा-पचरा-वटुका-फागादीनि तु उत्तरप्रदेशे, डाँडिया गुजरातप्रदेशे, अभंगः महाराष्ट्रे गीयन्ते । आधुनिकसंकृतकाव्ये अस्य एका सुदीर्घा परम्परास्ति परन्तु केषाञ्चन विदुषां मते गजले लोकधर्मिप्रयोगः न दृश्यते, नेदं स्थानीयगीतमतः वैदेशिकच्छन्दः । परम्परागतसंस्कृते यत् छन्दःशास्त्रं ततः पृथग्रूपेण गजलगीतस्य वर्तते । मुगलशासनवेलायाम् इदं छन्दः सर्वादौ फारसीभाषायां तदनु उर्दूभाषायामवतरितम् ।

### १.३. गजलः

सर्वप्रथमं भट्टमथुरानाथशास्त्रिमहोदयः व्रजभाषायाः दोहा-

सोरठा-कवित्तसैवया-घनाक्षर्याणां प्रयोगं संस्कृतभाषायां कृतवान्। तदतिरिक्तं गजलच्छन्दः फारसीगजलकारैः संस्कृते प्रणीतम्। भट्टवर्याणां गजललेखनरीतिमवलोक्य तेषां शास्त्रीयदृष्टिः विधिवत्सैद्धान्तिकप्रक्रिया चापि अनुस्यूता। स एतादृशानां विधानां व्यापकफलके संस्कृतकवितानां स्थापनार्थं क्लेशरहितं प्रयत्नं चकार। अनेन तु संस्कृतभाषा युगानुरूपं सरलतया उपस्थापयितुं शक्यते। तेन विरचिते महति मुक्तकसंकलने "साहित्यवैभवम्" इत्यत्र "उर्दूच्छन्दांसि" इति शीर्षकाध्याये आहत्य नवदशसंख्यकानां बधिराणां नामानि लक्षणपुरस्सरं स्वनिर्मितगजलानामुदाहरणत्वेन विहितानि। एतादृशि बहुभावभूमि-छन्दःशैली-समन्विते गजले कव्वालिया, नातः, प्रेम, नीत्युपदेशात्मकगीतानि, युगीनविद्रूपाणामपुरि प्रहारः, क्रात् आह्वानम् इत्यादयः अपि सन्ति। उर्दूशैल्याः एकः बहुरागात्मको गजलो द्रष्टव्यः—

रतुवुगनिऽद्य मानसे कोऽयम्
अवमनुते मुधैव लोकोऽयम्
विरजकृशं विलोक्य मामाह
न परिचिनोमि वर्तते कोऽयम्?
अयि भिषजो! मुधा निदानं वः
दुरवगमो ममाऽस्ति रोगोऽयम्॥ [गीतिवीथी ५६.३०]

अस्याः शताब्द्याः अन्तिमयोः द्वितीय-तृतीयदशकयोः पं० जगन्नाथपाठक-अभिराजराजेन्द्रमिश्रमहाभागौ नूतनतया पाठकानां परिचयं चक्रतुः। पं० जगन्नाथस्य गजलेषु मनोवेदना तथा सूक्ष्मभावस्य व्यञ्जनास्ति। उर्दू-फारसीभाषयोः गजलशैल्या आधारितं गीतं रागात्मकतानुसारेण हृदये अलौकिकमानन्दं संचारयति। "कापिशायिनी" इत्यत्र कविना वैयक्तिकप्रेम्णः सम्पूर्णा मधुशाला एकस्मिन् चषके संस्थाप्य पीता। चषकोऽयं प्रियायाः मधुरहास्यमेव यत्तु अखिलमधुरापेक्षया अधिकमस्ति।

परन्तु अभिराजराजेन्द्रमिश्रमहोदयस्तु आयामिव्यक्तित्वरूपेण धनवान् आसीत्। तस्य काव्ये यत्र सोहर-कजरी-क्षेत्रीयगीतानां सुगन्धः अस्ति, तत्रैव मधुपर्णी-मत्तवारणी-शालभञ्जिकानां गजलगीत्याम् अखिलविश्वस्य चेतना संरक्षितास्ति। मिश्रमहाभागस्य गजलेषु वेदना-अन्तर्द्वन्द्व-विरहतापाः न सन्ति, अपितु वैयक्तिकानुभूतीनां उदात्तचित्रणं वर्तते। अभिराजमहोदयेन गजलगीतं नूतनतया अस्माकं सम्मुखे

उपस्थापितम् । तत्र तु यथा संस्कृतभाषायाः निष्ठा विद्यते तथैव उर्दू-फारसीपरम्परा अपि । यद्यपि उर्दूगजलेषु शब्दमात्रोपरि ध्यानं दीयते परन्तु संस्कृतगजलरचना तु तीक्ष्णशरोपरि चलनवदस्ति यत् संतुलनं रक्षति । परन्तु अभिराजराजेन्द्रमिश्रमहाभागेन अनयोः (रदीक-काफए) आकर्षकसंयोजनेन निर्मितं वर्णमयं गजलगीतं काव्यक्षितौ विकीर्णमस्ति । एतत्तु मत्तवारिण्याः भूमिकायां स्वेन अङ्गीकृतम् ।

## १.४. कजरी

ठेठमिर्जापुरीकजरीं संस्कृतक्षेत्रे आनीतवान् अभिराजः, अत्र अभिराजस्य अलौकिकी कारयित्री प्रतिभा वर्तते । तस्य सृजनशीलतायाः विशिष्टः गुणः स्वरचनायाः बीजं च तस्यैव क्षेत्रस्य भूमावेव भवति, अतः भावरूपफलेषु स एव वर्णस्तथा गन्धः दृश्यते । इदमेव तस्य सारस्वतसाधनायाः फलमस्ति यत् सम्प्रति संस्कृते अस्माभिः लोकगीतानां माधुर्यम् आस्वादयितुं शक्यते । मञ्चेषु सर्वाधिकरूपेण प्रशंसामाप्नोति या कजरी, तस्यां कोकिलायां चौपालसंस्कृतिः, ढोलकस्य ताडनम् तथा करताडनस्य लयबद्धता अकस्मात् कर्णगोचरीभवति—

रौति कोकिला मदालसा रसालतरौ
गोपिता तमालतरौ रे
क्षणं पल्लवे निपीय
स्तौति सम्मुखं वसन्तकं ससालतरौ
गोपिता तमालतरौ रे । इति ।

## १.५. चैत्रकः

उत्तरप्रदेशस्य ग्रामीणप्रदेशेषु प्रतिचैत्रमासं पतिविरहदुःखिताः पत्न्यः स्वचिन्तां लक्षीकृत्य गीतं गायन्ति, तत् चैता चैतकं वा इत्युच्यते । अभिराजः क्षेत्रीयतां मनसि निधाय एवंविधानां लोकगीतानां बहुसरलतया निबन्धनं चकार—

"विधुमभिसरति कुमुदिनी रे मातः किमु करवाणि
प्रोषितपतिका विरहिणी रे मातः किमु करवाणि...
प्रोषितपतिका विरहिणी रे मातः किमु करवाणि ॥" इति ।

[वाग्वधूटी ६१, ६२]

## १.६. लोरी

शिशोः शिरसि मातुः स्नेहस्पर्शः यदा शब्दैः युक्तो भवति तदा तत् लोरी इति उच्यते । एतादृशं गीतं प्रत्येकभाषासु, प्रत्येकसमाजेषु स्वस्वशब्दबन्धैः गीतं भवति । लोरीगायनकाले बालसुलभचेष्टाः, क्रीडाः, चन्द्रमाः, तारकाः, दुग्धं, मिष्टान्नम् इत्यादीनि काल्पनिकवस्तूनि अत्र समाहितानि भवन्ति । मातुः स्नेहभरितः रसबिन्दुः शिशुं रससिक्तं करोति । एतादृशानि गीतानि कुत्रचित्स्थलेषु लयेरिका, तथा कुत्रचिद्वा लोरीगानम् इत्याख्यया भूषितानि भवन्ति । संस्कृतसाहित्ये यद्यपि लोरीगीतानि अधिकतया न दृश्यन्ते तथापि एतेषामस्तित्वम् अवश्यं विद्यते । अभिराजकृते अस्मिन् लोरीपद्ये बालसुलभता स्फुटं परिदृश्यते—

> "अणित-मणितनामन्यौ मयका खलु
> द्विवराटिके प्राप्ते
> ते च पुनर्मङ्गललाभार्थं
> गङ्गाधारायां प्रवाहिते...
> विलसतु मे लयेरिकागानम् ॥" इति । [मधुपर्णी, पृ-१३२]

## १.७. कव्वाली (काव्याली)

अर्वाचीनसंस्कृतच्छन्दस्सु कव्वाली गजल इव स्वीकृतमस्ति । यद्यपि कव्वाली उर्दू, फारसी इत्यादिभूमेः उत्पन्ना परिवर्धिता च तथापि संस्कृतसाहित्यिकैः अत्यन्तम् आदरेण स्वात्मीयभावेन इदं स्वकलेवरेषु संस्थापितमस्ति । नवप्रयोगसार्थकतां स्वकृतित्वेन साधयितुकामेन अभिराजेन "मृद्वीका" "काव्याली" इत्याख्यया विभूषयता कव्वालीच्छन्दः संस्कृतभाषायां प्रयुक्तम् । तेन गीतिबन्धं कृत्वा स स्वार्वाचीनतायाः तथा स्वप्रयोगधर्मतायाः परिचयं चकार—

> "प्रीतिरास्वद्यते प्राणैः गीतिरास्वद्यते कर्णैः
> शक्तिरास्वद्यते देहैः भक्तिरास्वद्यते स्नेहैः
> घनान्धकारे बलिदिपिकेव बलाहके चञ्चलचञ्चलेव ।
> मघौ प्रफुल्ला नवमालिकेव प्रतियते प्रीतिरियं पुराणी ॥" इति ।
> [मृद्विका, पृ-७४]

अभिराजेन प्रयासे कृतेऽपि संस्कृतगीतिकाव्येषु "काव्याली" इत्यस्य

अधिकः प्रयोगः न दृश्यते। एतदपेक्षया संस्कृतसहृदां कृते गजल एव अधिकप्रियतमः अस्ति ।

### १.८. लावनी

भट्टमथुरानाथशास्त्रिणा गीतिविधासु अनेके नवप्रयोगाः अन्तर्भाविताः । तेषु लावनी कश्चन क्षेत्रीयो विभागो वर्तते। भागवते रासलीलाव्याजेन पराजितस्य कामदेवस्य कथा वर्तते । भट्टमहोदयेनात्र प्रसङ्गे “रासलीलायां मदनविजयः” इति शीर्षकं प्रदाय “लावनी” प्रस्तुता—

“जयति जगदानन्दनकारी / माधवो मनसिजमदहारी
गोपिका जनजिवनधारी / सकलनिजभक्तीभीतिहारी ॥” इति ।

[गीतिवीथी, पृ-१०/१]

### १.९. गालिगीतिः

ब्रजक्षेत्रे गालिगीतस्य गानं क्रियते। एतादृशेषु गालिगीतेषु प्रेम्णः आत्मीयतायाः चित्रं परिस्फुटं दृश्यते। एतादृशानि गीतानि विवाहादिषु अवसरेषु पारस्परिकसम्बन्धानां प्रगाढतां दर्शयितुं गीयन्ते। गालिगीतेषु व्यङ्ग्यं हास्यं च सन्तुलिताकारेण विद्यमानं भवति । अत्र अवज्ञापेक्षया प्रेम्णः प्रबलता अधिका भवति इति हेतोः गालिप्रदाता गालिग्रहीता उभौ अपि रससिक्तौ भवतः । भट्टमहोदयैः कृष्णस्य विषये एव अस्य प्रयोगः कृतः । यतः व्रजशिरोमणेः कृष्णस्य राधायां प्रीतिर्वर्तते, अतः व्रजाङ्गनाभिः कृतः उपहासः आवश्यकत्वात् स्वाभाविकत्वात् युक्त एव—

“जयति नवरासविहारी / अहो भक्तजनदुरितनिवारी
असुरनिकरपरिपीड्यमान-वसुधाभरहारी रे
सुरभितनववनमालाधारी / ललितलुलितमृदुकन्तलभारी
स्मरशरपरवशह्लदयनवव्रनार्यभिसारी रे ॥” इति ।

[गीतिवीथी, पृ-१२, १३]

हरिदत्तशर्ममहोदयेनापि गालिगीतस्य महोहरप्रयोगाः कृताः सन्ति ।

### १.१०. स्वागतगीतम्

अतिथिदेवो भव इति भावना प्रत्येकेषां भारतीयानां मनसि बद्धमूलतया राजते । स्वागतगीतानि एतादृशविनम्रतायाः प्रकाशनानि वर्तन्ते । अद्यत्वेऽपि कस्यामपि सभायाम् आगतानामतिथीनां कृते स्वागतभाषणं स्वागतगीतं वा

प्रस्तूयते । एतादृशस्वागतगीतेषु अतिथीनां चरितम्, तस्य पदानि, प्रतिष्ठा इत्यादिकं वर्ण्यते । अतिथीनां वाचिकस्तुत्यर्थं स्वागतगीतं स्वागतभाषणं वा प्रस्तूयते । तथैव अनेन अतिथेरागमनेन आयोजकानां गौरवस्य सूचना तथा कार्यक्रमस्य गौरवं तदागमनफलकमिति सूचना अपि गीतिषु क्रियते । भट्टमहोदयस्य स्वागतगीतस्य एकमुदाहरणं यथा—

"स्वागतं भवतामुदारगुणावदातसचेतसाम्
स्वागतं सुरभारतिसेवा समाहित चेतसाम्
दर्शनेन भवादृशामिदमद्य नन्दति मानसम्
स्वागतं पुरतः स्वयं वत संदधाति सुमेधसाम्
भास्वतः किरणैरितः प्रविषह्य नीतेयं निशा
संप्रकाशमवाप्य सम्प्रति लीयते तिमिरं दिशाम् ॥" इति ।

[गीतिवीथी, ९१/१-३]

## १.११. ठुमरी, दादरा प्रभृतयः

भट्टमहोदयस्य संगीते विशिष्टं ज्ञानमासीत् । तस्य रचनासु ठुमरी, दादरा इत्यादीनि बहूनि संगीतसम्बद्धानि रागादीनि प्राप्यन्ते । देशमल्लार[१] रागेण गीतानि संरच्य स्वात्मनः न केवलं संस्कृतज्ञत्वमपि तु संगीतज्ञत्वमपि प्रत्यपादीत् । ठुमरी-मध्ये भाषा ब्रजभाषया प्रभाविता आसीत् । अत्र कविना व्रजसंस्कृतिः स्वरचनासु प्रतिविम्बिता ।

ठुमरी—

"कुञ्जे कुञ्जे मां विहारी सखिरुन्धे मनोहारी
शपथशतैरपि मुञ्चति नायम्
यमुनातटमनु मुञ्चति सायम्
कपटवचनविश्वासवशादयमनुयते नुतिकारी
कुञ्जे कुञ्जे... ॥" इति । [तदेव]

ठुमरीं विहाय दादरायामपि सर्जनशीलता कवेः प्रभाविता—

"मम दैन्यं न जानासि नाथ किमु मुहुरावेदये
पराधीन्यं न जानासि नाथ किमु मुहुरावेदये ॥" इति । [तदेव]

१ गीतिवीथी, पृष्ठा-०८

## १.१२ घनाक्षरी

हिन्दीभाषायां बहुलव्यवहृतं घनाक्षरी इति छन्दः अभिराजराजेन्द्रमिश्रेण संस्कृत-भाषायाम् अत्यन्तभव्यतया सन्निवेशितम् । छन्दः इदं गतिना यतिना च सह निपुणरूपेण अस्फोटयत् । एतच्छन्दोबद्धपद्यानां पाठकाले कस्यामपि पङ्क्तौ विश्रृंखलता गतिभङ्गदोषः नानुभूयते, अपि तु तस्य मूलबन्ध एव विज्ञायते—

"हृदये समुपैति पदं वर्धते शरीरे यत्
नयनाभ्यां नितरां चकास्ति चारुचरणम्
अधरे बिम्बप्रतिमे स्मितकैस्तनुते सुषमां
पदयोर्विदधाति मन्दमन्दं गजगमनम्" [मृद्वीका, पृ-७६]

## १.१३.सवैया

नवच्छन्दविधासु व्रजभाषायाः प्रभावः अधिकांशतः दृश्यते । अधिकांशैः कविभिः व्रजभाषायाः छन्दः तद्वन्मधुरतया एव उपन्यस्तम् । संस्कृतभाषायां व्रजभाषायाः छन्दः यदा समापतति तदा तस्य आस्वादः अन्यां मात्रां लभते । सवैया-द्वारा शरदः वर्णनं विन्ध्येश्वरी-प्रसाद-मिश्रेण अत्यद्भुततया रचितम् । तद्धि—

यमुनावटमञ्जुलकुञ्जघने घनसाररसावलिते विपिने
विपिने नवनीरजगन्धयुते युतपंकजकोशमिलिन्द जने
जनमानसमानिनी मोदमुदे मुदिता धरपानपुटे कमने
कमने ननु रासरसे सुविभाति शरत् सखि नैशसरत्पवने ॥" इति ।
[मृद्वीका, पृ-७६]

## १.१४. कुंडलियाँ

कुंडलिया हिन्दीभाषायां लोकप्रियतां गतास्ति । "गिरिधर की कुंडलियाँ" इत्याख्ये काव्ये नैतिकमूल्यानां विविधाः विम्बाः दृश्यन्ते । डॉ वासुदेव-कृष्ण-चतुर्वेदि-महोदयैः व्रजभाषाम् आत्मसात्कृत्वा स्वकाव्ये प्रायशः प्रयोगः कृतः । आयासार्जितबुद्धिना भट्टमथुरानाथशास्त्रिणा स्वकालानुरोधेन राजसीव्यवस्थायाम् आबद्धत्वात् व्ररजकवितालेखनस्य प्रारम्भः कृतः । परं गच्छता कालेन तत् स्वान्तःसुखाय परिवर्तितं जातम् । भारतवर्षस्य विकाशः तथा विश्वबन्धुत्वभावना तेन कुण्डलियाँ इति छन्दसा प्रस्तुतम्—

"आर्यवसुमती सर्वतः प्रथम विकासमवाप
ततः सकललोकालये संविद्बीजमुवाप विदती
जगति सभ्यतां दधौ विश्वमैत्रीमवदधती
मानवताद्युतिजागराय जगदेक धृतिमती
द्वीपे द्वीपे दीप्तिमददियमार्य वसुमति ॥" इति ।

[संस्कृत के युग पुरुष, मञ्जुनाथ, पृ-८८]

डॉ वीरभद्रमिश्रस्य व्यञ्जनापरक-कुण्डलिषु कापि सरलगेयता दृश्यते । यथा—

"दिल्लीनगरी सत्यतो मायानगरी मित्र
तस्य तस्य चित्रा गतिः यो यो गच्छति तत्र
यो यो गच्छति तत्र महातुन्दं स स लभते
पुरा निनिन्द यदेव हन्त हन्त तत सर्वं कुरुते
'वीरः' कथयति— तत्र समेषामेका झिल्ली
एको रागः "कथं पदप्तिः" धन्या दिल्ली ॥" इति ।

[विंशशताब्दी, पृ-५१]

## १.१५. चतुष्पदी (चौपाई)

संस्कृतमाधुनिके तथा जीवितभाषावर्गे स्थापयितुं संस्कृतलेखकैः तस्य सर्वतः विकाशाय संकल्पः कृतः । यच्छन्दः लोकधर्मित्वात् लोकप्रियमासीत् । संस्कृतभाषा तमात्मसात्कृत्य काव्यसृजनं सूचयामास । न तु केवलं दक्षिणभारतीयभाषासु प्रयुक्तानि नर्कुटकस्तथाश्वधार्यादीनि छन्दांसि संस्कृतेऽपि प्रयुक्तानि वर्तन्ते, अपि तु क्षेत्रियछन्दोऽपि स्वकाव्यस्य विषयत्वेनाङ्गीक्रियते । परिणामतः संस्कृतभाषा प्रत्येकं क्षेत्राणि स्वप्रकाशैः प्रकाशयति । चौपाई इत्ययं चतुष्पदी इति नाम्ना तेन स्वकाव्येषु प्रकीर्तितः—

"महितमहाकवि मौलिविनिहता
जयति कालिदासाऽतुलकविता
दिव्यशक्ति-शंसिनि सुविलासे
माद्यति रसिकमनो यदुपासे ॥" इति ।

[संस्कृत के युग पुरुष, मञ्जुनाथ, पृ-९६]

## १.१६. स्कन्धहारीयम्

वरयात्रादिषु शिविकावाहकैः स्वश्रमापनोदयाय सर्वे समवेताः सन्तः

यानि गीतानि गीयन्ते स्म तानि "स्कन्धहारीयम्" इति अभिधीयते। शब्दस्याप्यर्थानुशीलनं कुर्मश्चेदपि प्रकृतशब्दस्य ईदृश एव अर्थः समायाति। उत्तरप्रदेशेष्वपि एतादृशानि गीतानि गीयन्ते स्म। लोकभाषायाम् इदंप्रकारकं गीतं "कँहरवा" इत्युच्यते—

"नभासि विभाति चमत्कृतचन्द्रो भाति चन्द्रमसि छाया
सरसि विभाति सरागकमलिनी कमलिन्यामलिजाया
भाति भवने वधूती षोडशी सदङ्गना
भाति गगने मुदी सतारका निरञ्जना ॥" इति।

[वाग्वधूटी, पृष्ठा-२८]

## १.१७. सोहरः

अभिराजराजेन्द्रमिश्रः वास्तविकतया लोकधर्मिविशिष्टेषु श्रेष्ठकविर्वर्तते। स्वकीयप्रदेशात् लोकगीतानि संकलय्य संस्कृतसाहित्ये तेषां प्रचारं कृतवान्। "सोहर्" गीतस्य एतादृशः विभागोऽस्ति, यः मङ्गलमयेषु अवसरेषु साभिनिवेशं गीयते। अभिराजेन वाग्वधूट्यामस्य उल्लेखः कृतः। अभिराजयशोभूषणम् इत्यत्र तं परिभाषयन् भणति—

"पुत्रजन्मविवाहादिमंङ्गलावसरे पुनः
गीयते ननु नारीभिर्गीतं सूतगृह्यभिधम् ॥" इति।

[वाग्वधूटी, पृ-२६७]

## १.१८. श्रावणगीतम्

बहुभव्यतया भारतीयसंस्कृतौ सर्वेषाम् ऋतूणां स्वागतं क्रियते। श्रावणर्तौ आगते यत्र वर्षायाः शीतलता ग्रीष्मसन्तप्ताङ्गमानन्दितं करोति, तथा च तस्यां वर्षर्तौ एव विरहिण्यः नायिकाः स्वप्रियान् आह्वयन्ति। श्रावणे मासि दोलायामुपविशन्ती नायिका हरितदत्तशर्मणैवं प्रस्तुता—

"शृणु मे मातः! / श्रावणमासोऽयातातः
नाद्य प्रयानायातः / स्फुरति गगनतलेदामिनी
शप्तं तेन गमनकाले सखि! / नविरागमनं नूनम्
प्रिय! पश्य विरहे वर्धिष्यत उभयोः प्रेम प्रसूनम्
विस्मृतिगर्त निता ते, ते ते शपथाः पीता रे
दग्धाअ विरहदहने कामिनी ॥" इति। [गीतकन्दलिका, पृ-१४]

## १.१९. रसिया

आचार्येण बाबुराम-अवस्थीमहोदयेन रसिया रसिका इत्यनेन नाम्ना अभिधीयते। अत्र गीतमपि व्रजप्रदेशे उत्सवकाले गीयते। अनेन लोकगीतस्यैकविधा इत्युच्यते—

"मङ्गलदिनमदमद्य शिशुर्गेहे खेलति रे
ए हो शीघ्रं चलतु सखि नन्दभवनमभिनन्दति रे
नीरं नयति नवनीतं हरति दधि याचति रे
ए हो वसुक्षिपति जनचित हरति विधुमिच्छति रे ॥" इति ।

[विंशशताब्दी..., पृ-३००]

## १.२०. बटुकगीतम्

लोकभाषायां बटुकगीतं बरूया इत्युच्यते। यदि सूक्ष्मरूपेण दृश्यते तर्हि दृश्यते यत् चरवाहैः गीतमिदं गानम्। पशुचारणकाले मनोरञ्जनार्थं गीतमिदम् अगीयत। आचार्येण बाबुराम-अवस्थीमहोदयेन कविना सह गोः वार्तालापविषये इदं प्रस्तूयते—

"कवि— अरे अरे श्याम सुरभिके किमिति परिखिद्यसि रे?
षड्रसभोजनपूर्तिः कथं नु भविष्यति रे ॥" इति ।

[विंशशताब्दी..., पृ-३०२]

## १.२१. बाउलकाव्यम्

वङ्गदेशे भक्तिकाव्यरूपेण बाउलकाव्यं लिख्यते। अत्र ईश्वरं प्रति स्वस्य भक्तिः, समर्पणं श्रद्धा च व्यक्तीक्रियते। हर्षदेवमाधवस्य बाउलकाव्यस्योदाहरणमेकं तावत्—

"अथ किम्! मम समीपे नौकाऽऽसीत्...
किन्तु / मनः मसृणतटासक्तमासीत्
मनसो मनुष्य! तव शब्दोऽपि श्रुतः ॥" इति ।

[मृगया, पृ-४४]

यद्यपि एवं कविताः बहवः कवयः अलिखन् परन्तु ताः कविताः विशेषरूपेण बाउलकाव्यं इति नाम्ना व्यवह्रियन्ते ।

## उपसंहारः

एवं संस्कृतसाहित्ये लोकधर्मिणा छन्दसा नवीनमेकं युगमारभ्यते यत्र

छन्दसां मसृणता तथा नवीनता च परिशील्यते । एतावता नवीनभावबोधेन साकं स्वच्छन्दमनःस्थितेः चित्रणप्रवृत्तिः विस्तृता जाता । अपि च अनेन नवगीतविधानाम् आविर्भावोऽभवत् । अगोटिपरीक्षितशर्ममहोदयेन ललितगीतालहरी लिखिता, एवं राधावल्लभत्रिपाठिमहोदयेन धरित्रीदर्शनलहरी, निदाघलहरी, प्रावडलहरी, जनतालहर्यादीनि काव्यानि लिखित्वा लहरीलीलायितम् इति पूर्णखण्डं विलिखितम् । स ढपोलशंखाष्टकं तथा च शुभ्रशंखाष्टकम् इति अष्टकमपि लिखितवान् । एतदतिरिक्तं रुद्रदेवत्रिपाठिमहोदयेनापि गायत्रीलहरी, बदरीशलहरी, भैरवलहर्यादिलहरीकाव्यानि रच्यन्ते । संस्कृतभाषायां नाविकानां गीतं, डिस्को-गीतम् इत्यादि लिखित्वा नूतनैका परम्परा समारब्धा । संगीतिकायाः प्रकाराणां साम्यमपि वर्तते । अत्र अभिनयेन साकं गेयतापि भवति । अतः एषा दृश्यश्रव्योभयदृष्ट्या सफलमिति वक्तुं शक्यते । अत्र छन्दःप्रयोगकाले अस्याः सरलतायाः, कोमलकान्तपदावल्याः च स्मरणं कर्तव्यम् ।

✶ ✶ ✶

## Bibliography


1. *औचित्यविचारचर्चा*; क्षेमेन्द्रः ; व्रजमोहन-झा (सम्पादकः) ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; १९९२ ; चतुर्थसंस्करणम्
2. *काव्यप्रकाशः* ; मम्मटः ; भट्टवामनाचार्यझलकीकरः (सम्पादकः व्याख्याकारश्च) ; निर्णय सागर प्रेस ; मुम्बाई ; १९०१ ; द्वितीयाङ्कनावृत्तिः
3. *काव्यमीमांसा*; राजशेखरः ; सि. डि. दालालः तथा आर. ए. शास्त्री (सम्पादकौ) ; के. एस. रामस्वामी शास्त्री शिरोमणिः (प्रकाशकः) ; ओरियेण्टाल इन्सटिटिउट ; बडोदा ; १९३४ ; तृतीयसंस्करणम्
4. *काव्यादर्शः (मालिन्यप्रोज्छनीटीकासहितः)*; दण्डी ; चिन्मयी-चट्टोपाध्यायः (सम्पादिका) ; पश्चिमवङ्ग राज्य पुस्तक पर्षत् ; कलिकाता ; १९९५
5. *काव्यालङ्कारः* ; भामहः ; रमणकुमारशर्मा (सम्पादकः) ; विद्यानिधि प्रकाशन ; दिल्ली ; २००८
6. *छन्दोमञ्जरी*; गुरुनाथविद्यानिधिभट्टाचार्यः (सम्पादकः) ; संस्कृतपुस्तकभाण्डारः ; कलिकाता ; १३९० वङ्गाब्दः
7. *मातृगीतिकाञ्जलिः (गीतिकाव्यम्)*; हरेकृष्ण-मेहेरः ; परिमल-पाब्लिकेशन्स ; दिल्ली ; २०१२
8. *सनातनस्य काव्यवैभवम्*; ए.पि. सच्चिदानन्दः (सम्पादकः) ; राष्ट्रियसंस्कृतसंस्थानम् ; नवदेहली ; २०१३ ; प्रथमसंस्करणम्

9. *कल्पवल्ली (समकालिक-संस्कृत-काव्यसङ्कलना)*; अभिराज-राजेन्द्रमिश्रः (सम्पादकः) ; साहित्य अकादमी ; नवदेहली ; २०१३
10. *संस्कृतसाहित्ये पश्चिमवङ्गस्यावदानम्*; नारायणदाशः ; कथाभारती ; कलिकाता ; २०१७
11. *भारतवर्षे आधुनिकसंस्कृतसाहित्यम्-विहङ्गमदृष्ट्या परिशीलनम्*; शुभ्रजित् सेनः ; संस्कृपुस्तकभाण्डारः ; कलिकाता ; २०१९
12. *अर्वाचीनसंस्कृतसाहित्यपरिचयः* ; रमाकान्तशुक्लः ; देववाणीपरिषद् ; नवदेहली ; १९९१
13. *अत्याधुनिकं संस्कृतसाहित्यम्*; नारायणदाशः ; बि एन्. पाब्लिकेशन् ; कोलकाता ; २०२१
14. *अर्वाचीन-संस्कृत-महाकाव्य-विमर्शः* ; रमाकान्तशुक्लः ; देववाणीपरिषद् ; नईदिल्ली ; १९७९
15. *भारतीय काव्यशास्त्र का आचार्य परम्परा*; राधावल्लभत्रिपाठी ; विश्वविद्यालय प्रकाशन ; वाराणसी ; २००७
16. *संस्कृत का अर्वाचीन समीक्षात्मक काव्यशास्त्र*; अभिराजराजेन्द्रमिश्रः ; विश्वविद्यालय प्रकाशन ; वाराणसी ; २०१०
17. *आधुनिक संस्कृत काव्यशास्त्र*; आनन्दकुमारवरश्रीवास्तवः ; इस्टार्न बुक लिङ्कस् ; दिल्ली ; २०१२
18. *संस्कृतसाहित्य : बीसवीं शताब्दी*; राधावल्लभत्रिपाठी ; राष्ट्रियसंस्कृतसंस्थान ; दिल्ली ; १९९९
19. *संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्*; वनमालीविश्वालः राकेशदाशश्च (लेखकौ) ; नारायणदाश : (सम्पादकः) ; मान्यताप्रकाशन ; दिल्ली ; २०१२
20. *आधुनिक संस्कृत काव्य की परिकमा*; मञ्जुलताशर्मा ; राष्ट्रियसंस्कृतसंस्थानम् ; नवदेहली ; २०११ ; प्रथमसंस्करणम्
21. *अर्वाचीन संस्कृत साहित्य (दशा और दिशा)*; मञ्जुलता शर्मा ; परिमल पब्लिकेशन्स ; दिल्ली ; २००४


* * *

# नारायणदाशकृतस्य लज्जा इति कथासङ्ग्रहस्य समीक्षात्मकमध्ययनम्

विकाशसिंहः *, डॉ.वन्दनाशर्मा†

## Abstract

[अर्वाचीनसंस्कृतकथाकारेषु अतिस्पृहणीयं नाम नारायणदाशमहोदयस्य। तस्य तृतीयः कथासंग्रहः अस्ति लज्जा इति। तत्र वैदिक-पौराणिक-लौकिक-नारीसमस्याधारिताः पञ्चदशलघुकथाः वर्तन्ते। पुराणयुगे वा आधुनिकयुगे वा नारी कदाचित् नारायणी कदाचित् कात्यायनी भवति। कदाचित्सर्वंसहा सा भयेन लज्जया वा सर्वं सहते, कदाचित् प्रतिवदति कठोरभावेन। मातृत्वकामनया अधीरभावेन यक्षप्रियेव प्रतीक्षते यक्षकुमारस्य प्रत्यागमनं यावत्, पूर्वप्रणयं स्मृत्वा प्राणदयितस्य पुनरागमनं यावत्। कदाचित् सा पारिवारिकसुखसन्धानाय गत्वा अमृतत्वं प्राप्नोति। कदाचित् बौद्धिकसुखमन्विष्य प्रत्यागच्छति कालिदासस्य मेघदूतस्य समान्तरालेन तसलिमायाः लज्जां यावत्। अतः अन्तःस्थितायाः एकस्याः कथाया आधारेण कथासङ्ग्रहस्य नाम लज्जेति। कथाकारस्यास्य विलक्षणा रचनाशैली, यया कथासङ्ग्रहोऽयं संस्कृतकथासाहित्यपरिसरे श्रद्धया गृहीतो वर्तते। कथास्वेतासु विशेषेण नारीचरित्रस्य विमर्शः कथाकारेण सफलतया कृतो दृश्यते।]

**उपक्रमः**

लज्जा इति कथासङ्ग्रहोऽयं प्रसिद्धस्य कथाकारस्य नारायणदाशस्य तृतीयकथासङ्ग्रहः विद्यते। अयं कथासङ्ग्रहः २००९—तमे ख्रीष्टाब्दे कोलकातातः प्रकाशिकया श्रीमत्या सवितादाशमहोदयया प्रकाशितः। २०१२—तमे ख्रीष्टाब्दे महाष्टम्यां शुभावसरे सङ्ग्रहस्यास्य द्वितीयसंस्करणं प्रकाशितम्। कस्यापि संस्कृतकथासङ्ग्रहस्य द्वितीयं प्रकाशनेन तस्य महत्त्वं प्रतिपाद्यते। अतः अस्योपरि किञ्चित् विशेषाध्ययनं कृतमस्ति।

**नामकरणम्**

सङ्ग्रहेऽस्मिन् पञ्चदश कथाः सङ्गृहीताः सन्ति। कथानामासां मूलानि विद्यन्ते वेदपुराणेतिहाससाहित्यसमाजादिषु। कथाग्रन्थस्य नामकरणं श्रीदुर्गासप्तशतीप्रभावेण प्रभावितमिति वर्णितं कथाकारेण। तत्र— *श्रद्धा*

---

* शोधच्छात्रः, कोटास्थितस्य कोटाविश्वविद्यालयस्य संस्कृतविभागे, राजस्थानेषु।

† अध्यापिका, कोटास्थितस्य कोटाविश्वविद्यालयस्य संस्कृतविभागे, राजस्थानेषु।

*सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम् ।* [श्रीदुर्गासप्तशती ४.५] इत्यादिचतुर्षु स्थानेषु लज्जाशब्दः उच्चारितः, मानवस्य कुलजनोचितसौन्दर्यरूपेण । सैव लज्जा अत्र नारीचरित्रेषु अन्वेष्यति । अग्रे कथाकारः स्वयमेव वदति— एताः कथा मुख्यतया पुराणयुगस्य नारीसमस्यां विशदीकुर्वन्ति । काकतालीयन्यायेन मातृष्वसा, इम्राना वदाम्यहम्, लज्जा, अन्तिमसोपानमिति चतस्रः कथा आधुनिकयुगस्य प्रातिनिध्यं कुर्वत्योऽपि नारीसमस्याधारिता इत्यत्र सङ्कलिताः सन्ति । पुराणयुगे वा आधुनिकयुगे वा नारी कदाचित् नारायणी कदाचित् कात्यायनी भवति । सर्वमपि मानापमानं, मौनं दहनं, व्यथाकथां, मन्त्रणां, यन्त्रणां वा समाज उपायनीकरोति तस्याः कृते । कदाचित्सर्वंसहा सा भयेन लज्जया स्वपरिवारस्य मङ्गलकामनया वा सर्वं सहते, कदाचित् निष्ठुरं सत्यं स्वीकरोति कदाचित् प्रतिवदति कठोरभावेन । मातृत्वकामनया अधीरभावेन यक्षप्रियेव प्रतीक्षते यक्षकुमारस्य प्रत्यागमनं यावत्, पूर्वप्रणयं स्मृत्वा प्राणदयितस्य पुनरागमनं यावत् । कदाचित् सा पारिवारिकसुखसन्धानाय गत्वा अमृतत्वं प्राप्नोति । कदाचित् बोद्धिकसुखमन्विष्य प्रत्यागच्छति कालिदासस्य मेघदूतस्य समान्तरालेन तसलिमायाः लज्जां यावत् । अतः अन्तःस्थितायाः एकस्याः कथाया आधारेण कथासङ्ग्रहस्य नाम लज्जेति ।

कथाकारः श्रीदाशः अनन्यसामान्यचरित्रचित्रणेन, भाषासौष्ठवेन, रसयोजनेन, सुललितपदबन्धेन, अनवद्यवर्णनकौशलेन च सुचिरं सहृदयान् विनोदयति । कथाकारस्यास्य विलक्षणा रचनाशैली, यया कथासङ्ग्रहोऽयं संस्कृतकथासाहित्यपरिसरे श्रद्धया गृहीतो वर्तते । साधूक्तं नान्दीवाचिना आचार्येण मिश्रेण अभिराजराजेन्द्रेण— *यथा चतुरवैकटिको मलिनमलिनमपि विद्रूपहीरकं शाणयन्त्रमारोह्य प्रभाभासुरं विदधाति तन्मूलरूपञ्च सचमत्कारं विलोपयति, सर्वथा तथैव युवा कथानिकाकारोऽप्ययं स्वप्रतिभाबलेन सामान्यान्यपि वृत्तानीमान्यनन्यसाधारणानि विदधाति चरित्रचित्रणादिकथातत्त्वमहिम्ना । कथाकारस्य मौलिकी प्रतिभा अभिनन्दनीयैव प्रतिभाति । साम्प्रतिकसंस्कृतकथाकारेषु नारायणदाशो महीयते ।* इत्यादिभिर्वाग्भिः ।

## कथावस्तु

"लज्जा" इत्याख्ये कथासङ्ग्रहे एताः कथाः लसन्ति— आर्याम्बा,

सफला नारी, लोपामुद्रा, मातृष्वसा, ऋषिपत्नी, माधवी, इम्राना वदाम्यहम्, परिचयः, अत्रिकन्या, अमृतफलम्, अनार्य्यः, वाग्दत्ता, लज्जा, कविकन्या, अन्तिमसोपानम् चेति। कथास्वेतासु विशेषेण नारीचरित्रस्य विमर्शः कथाकारेण सफलतया कृतो दृश्यते।

"आर्याम्बा"—कथायां शङ्कराचार्यस्य जनन्याः आर्याम्बायाः करुणजीवनं वर्णितं कथाकृता। कथायामस्यां मातुः पुत्रात् या आशाः अपेक्षाः भवन्ति ताश्चारुतया वर्णिताः। यथा— 'स प्रत्यागमिष्यति। जनन्याः शून्यं क्रोडं पूरयितुं स नूनं प्रत्यागमिष्यति। कालडीग्रामोपकण्ठे प्रवहन्त्याः पूर्णातटिन्यास्तटे विहगवधूटीं स्तब्धीकृत्य प्रत्यागमिष्यति प्राणप्रियः पुत्रः। अद्वितीयः पुत्रोऽन्धस्य लगुड इव विश्वक्सेन इव वा।'[१] रोगशय्यायां शयाना जननी आर्याम्बा चिन्तयति इत्थम्। पुत्रस्य आशु प्रत्यागमनं विचिन्त्य तस्या जराजीर्णे रोगाकीर्णे मुखे उद्भासते प्रसन्नता।

यदा आर्याम्बा तस्याः कपिलवस्तुराजप्रासादे स्थिताया गोपाया विषयं चिन्तयति, तदा तदीयाः प्राणाः क्रन्दन्ति। जीवनस्य मधुमये लग्ने पुत्रो गृहत्यागी सन्न्यासी जातः। जनन्याः सकला आशाः समस्ताः कामनाश्च वृथा अभवन्।

किञ्च पुत्रस्य कर्तव्यमपि सुष्ठु चित्रितं कथाकारेण। लोकविरुद्धमपि शङ्करेण स्वकर्तव्यं न विस्मृतम्। मातुरूहापोहस्य, अवलम्बनहीनाशङ्कायाः, असहायतायाश्च मार्मिकं वर्णनं वाचकान् शोकसागरे निमज्जयति। लोककल्याणाय पुत्राभीष्टसिद्धये च मातुः आत्मत्यागः, इत्येतत्सर्वमपि भारतीयसनातनपरम्परायाः स्वरूपं समुद्घाटयति। यथा— शङ्करस्य मनसि स्फुरिता स्नेहमयी आशीर्मयी च जननी। प्रव्रजनसमये तस्या विकलं रुदितमिदानीं यावत् स्मृतिपथे दुःखदां स्थितिं जनयति। तेन प्रतिश्रुतमासीन्नूनमेकदा प्रत्यागमनम्। जननी धरणीव सर्वंसहा। प्रसववेदनां सोढ्वा नवजातकाय प्रदर्शयति तरुणारुणस्य सुमधुरमालोकम्। शारदीयतटिनीव सा स्वच्छनीरा। चन्द्रिकेव अमृतमयी। जगतः समक्षं सा आर्याम्बा। तस्य समीपे तु केवला अम्बा। स्वर्गच्युता कापि आशीर्मयी निर्झरिणी। सरोवरस्य कापि गन्धमयी कमलिनी। उत वीणायाः कापि छन्दोमयी रागिणी। अविरतभावेन चिन्तयति शङ्करः— 'मया किं वा

१ लज्जा, पृ.१७

प्रदत्तं जनन्याः कृते? हृदयशोणितं दत्त्वा या जीर्णा जाता, वृद्धावस्थायां किं तस्याः सेवा करणीया नासीत्? पर्णकुटीरतले मम रोगशीर्णा जननी शय्यालग्ना, पुत्रोऽहं तस्या देशाद्देशन्तरमटन् प्रचारयामि सनातनधर्मम्। सत्यसन्धानात्परमपि अहं न प्रतिगत इदानीं यावत्। अपि मया पुत्रस्य कर्त्तव्यं सम्यक् निभालितम्?' स्थितप्रज्ञस्य गोपनतन्त्रीतले आघातो जातः। परन्तु सन्न्यासिनो मनस्तं बोधयति— तस्य भावप्रवणता नोचिता इति। स स्थितप्रज्ञः। गृहत्यागी। जितेन्द्रियः। ममत्वबन्धनं तस्य समीपे स्पृहणीयं नास्ति। स्वमनोभावं दमयितुं स मृदुकण्ठेन वारं वारमुच्चारितवान्— 'का तव कान्ता, कस्ते पुत्रः, संसारोऽयमतीव विचित्रः।'[२]

कथाकारः आदिशक्त्या सह तदंशभूतायाः मातृशक्त्याः तुलनां करोति शङ्कराचार्यस्य सौन्दर्यलहर्याः श्लोकोद्धरणपुरःसरम्। यथा—

किन्तु पक्षिशावकस्य चीत्कारस्तम् उपहसति— "हे भ्रान्तसन्न्यासिन्! ब्रह्म सत्यम्। किन्तु जननी तु मिथ्या नास्ति। मातृशक्तिः, सापि सत्या। शक्तिं विना कस्यापि कार्यस्य न सम्भवः। शिवश्शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्..। न वा ब्रह्मणः स्थितिः, न वा उपलब्धिः।" स्वीयज्ञाननेत्रं समुद्घाट्य चिन्तितवान् शङ्करः— "कियत् कठोरं सत्यम्। शक्तिस्वरूपिणी जननी। अत्र मिथ्या नास्ति, प्रवञ्चना नास्ति, न वा मायायाः मोहस्य वा आवरणम्। कस्यचन सत्यस्य स्पष्टसङ्केतः। ब्रह्म इव शक्तिरपि सत्या। तनुः प्राणैरिव, कुसुमं सुरभिणा इव, एकस्य महिम्ना अपरं महिमान्वितम्। ब्रह्म हि शक्तिः। शक्तिरेव ब्रह्म।" कोमलवायुमण्डलस्य माधुर्यं तस्य भावुकतां समवर्धयत्—

तव स्तन्यं मन्ये तुहिनगिरिकन्ये हृदयतः
पयःपारावारः परिवहति सारस्वत इव।
दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव यत्
कवीनां प्रौढानामजनि कमनीयः कवयिता॥[३]

पार्वती तथा आर्याम्बा। तयोः पार्थक्यं नास्ति एव। आर्याम्बा एव जगज्जनन्याः प्रतिमूर्त्तिः। शङ्करोऽद्य प्रतिनिवर्तते। दीर्घकालं यावद्देशाद्देशान्तरं परिभ्रम्यापि, ज्ञानिनो मर्यादां सम्प्राप्यापि, सन्न्यासिनो गौरवं

---

२ लज्जा, पृ.१९-२०

३ तत्रैव, पृ.२१

लब्ध्वापि, ब्रह्मज्ञानिनो दीप्तशिखां दृष्ट्वापि सोऽनुभवति— “अपरं किमपि अपूर्णं वर्तते” इति । सफलजीवनयात्रायाः पूर्णविरामं दातुं स प्रत्यागच्छति स्वीयं वासभवनम् । ज्ञानस्य शुष्कसैकतवक्षसि स्नेहस्निग्धस्रोतस्विनीं प्रवाहयितुं स प्रत्यागच्छति जनन्याः कोमलक्रोडम् । वर्षं यावद्यदर्थं निर्जनतपस्या, कठोरसाधना च तद् वर्तते स्वीयजननीसमीपे । तस्य ज्ञानोदयो जातः । स्नेहमत्तस्स धावति दक्षिणापथम् । दूर्वादलोपरि स्थितस्य शिशिरस्य भग्नांशस्तस्य मनसि सृजति दुःखिन्या जनन्या नयननीरस्य भ्रमम् । संसारत्यागी शङ्करोऽद्य गच्छति यत्सत्यं, यदमृतमयं, तस्य सन्धानाय । पुत्र उत्कण्ठितचित्ततया धावति जनन्याः शून्यक्रोडं पूरयितुम् ।

राज्ञ्याः सुदेष्णायाः अङ्गराजेन सह विफलदाम्पत्यजीवनस्य करुणाक्रोशनं प्रतिध्वनितं भवति “सफला नारी”कथायाम् । कथायामस्यां प्रथमभागे सुदेष्णायाः मातृत्वप्राप्तये व्याकुलता वर्णिता । तदनु कथाकारः वीर्यहीनस्य अङ्गराजस्योच्छृङ्खलं यौवनजीवनम्, मातृत्वहीनायाः नार्य्याः मानसिकीं यातनां, तदर्थं समाजत्यागस्य कल्पनां च वर्णयति । एतादृशः स्वैराचारः समाजे अशोभनीयः स्यात् । राजमहिष्याः सुदेष्णायाः समीपे स्यात्कुलशीलस्य बाधाबन्धनम् । किन्तु नारीजीवनस्य सार्थकतासमीपे, मातृत्वप्राप्तिपार्श्वे तस्य किमपि मूल्यं नास्ति । सुदेष्णायाः पुनः मातृत्वप्राप्त्या नारीमनोकामनानां साफल्येन कथा समाप्ता जाता ।

अगस्त्यमुनिः लोपामुद्रा इत्यनयोः सफलदाम्पत्यस्यालेख्यं रचयति “लोपामुद्रा”कथा । पितृकूलस्योद्धाराय पुत्रकामना, ऋषेः वैराग्यात् लोपामुद्रा मातृत्वाद्वञ्चिता । मातृत्वाद् वञ्चितायाः ऋषिपत्न्याः मनःस्थितीनां सफलं वर्णनं कृतं कथाकारेण । यथा— आश्रमकानने प्रथमवारो झङ्कृतः कुहूकारः । एकं भुवनं शून्यं कृत्वा अपरं भुवनं पूरितवती भुवनमोहिनी पद्मगन्धा लोपामुद्रा । किन्तु प्रतिदिनं विवर्द्धते तस्या अप्रशमिता मनोवेदना । अहोरात्रं हाहाकारं कुर्वन्ति तस्याः कोमलनारीप्राणाः । दूरदिग्वलयं पश्यन्ती केवलं दीर्घं श्वसति सा । तस्मिन् दीर्घश्वासे वर्तते अशेषकारुण्यम्... । अशान्तवेदना निष्फलाभिमानं वा । मुग्धायाः कमलनेत्राभ्यामकारणं वहति मदिरासौरभम् । किन्तु दीर्घजीवनस्य कर्णमूले तस्या न जातमलिगुञ्जनम् । एकवारमपि लोपामुद्रायाः प्राणतलं पुलकितं कृत्वा गण्डदेशे न प्रताडितः प्रियतमस्य प्रणयस्निग्ध उष्णनिःश्वासः । एकवारमपि तस्याः पवनकम्पितालकाः

संयमयितुं न त्वरान्विता जीवनबान्धवस्य कराङ्गुलयः । एकवारमपि तस्याः पुष्पस्तबकविमण्डितां कबरीं न घ्रातवान् प्राणदयितः । कदाचित् कुबेरस्य कठोराभिशापेन यक्षकुमारो वधूसमीपात् दूरं गतः । कदा गमिष्यति विरहिण्या यक्षवध्वा विरहयामिनी? कदा तस्या वेणीबन्धनं कृत्वा मल्लीमञ्जरीभिः सज्जयितुं प्रत्यागमिष्यति यक्षकुमारः । कदा..कदा..कदा??[४]

भारतीयादर्शजीवनस्य, भारतीयग्राम्यसंस्कृतेः, स्वदेशप्रीतेश्च सफलं रूपदानं “मातृष्वसा” कथायां श्रीदाशेन कृतम् । विदेशे सुखेन वसतः सुनीलस्य कुटुम्बानुरागः, स्वदेशविषये सम्मानः, ग्राम्यपरिवेशे सहजाकर्षणं, निश्छलवात्सल्ये निर्भयाश्रयः इत्येतत्सर्वमपि कथाकारस्यान्तरङ्गमुद्घाटयति । “मातृष्वसा” इति कथायां प्रवासिभारतीयस्यैकस्य माध्यमेन ग्राम्यसंस्कृतेः, जन्मभूमिप्रीतेः, भारतीयादर्शनजीवनस्य सफलरूपायणं चित्रितम् । तत्र विदेशे सानन्दमुपवसतः सुनीलस्य कुटुम्बानुरागः भारतीयादर्शजीवनं परिप्रकाशयति । सुनीलस्य पितरौ दिवङ्गतौ । तथापि स पितरौ स्मरति । तत्र स्मरणे पुत्रस्य कृते पित्रोः अनाविलस्नेहः संवीक्ष्यते । यथा— सहस्रकन्याभ्य एका मिलेद्या विवाहात्परं पितृगृहं विस्मरेत् । तथैव एकः कश्चन पुत्रो मिलेद्यो विवाहात्परं पितृपरिवारं स्वकीयं चिन्तयेत् । किन्तु सुनीलस्तथा नासीत् । यदा पितरौ दिवङ्गतौ, तदा एव जन्मभूमिं प्रति तस्य मोहो दूरीभूतः । अतो द्वितीयवार-सुयोगप्राप्तिमात्रेण स प्रस्थित आमेरिकां प्रति । हावार्डनगरे गृहं निर्मीय उषितवान् । अस्मिन् नभश्चुम्बिप्रासादे, वातानुकूलितप्रकोष्ठे, सर्वविधसुखसौकर्येष्वपि स दुःखमनुभूतवान्— अहो! मात्रा सकृत् सर्वमेतद्दृष्टमभविष्यत्! अस्यां साजसज्जायामपि कुतश्चिदपि मात्रा तुलसीवृक्षः सङ्गृहीतः प्रोथितश्च अभविष्यत् । देवगृहे मालां जपन्ती, सुनीलस्य भोजने विलम्बो भवतीति अन्नपूर्णा तर्जयन्ती अभविष्यत् माता । पिता च गृहाङ्गने इतस्ततो भूत्वा मुखे ताम्बूलं चर्वयित्वा आवश्यके अनावश्यके वा मसृणोपनेत्रतलात् नानाविधोपदेशान् अदास्यत् । किन्तु क्व तथा भाग्यम्! पुत्रीभूतस्य तस्य भूमिका कियच्छीघ्रमेव समाप्ता![५]

मातृष्वसुः गृहव्याजेन ग्राम्यसंस्कृतिः उद्घाट्यते । तद् यथा—मुण्डं यथेच्छवमवनस्य कुटीरं प्राविशत् सुनीलः । देवमन्दिरमिव सर्वत्र परिष्कारः

---

४ लज्जा, पृ.३१

५ तत्रैव, पृ.३४

परिच्छन्नश्च। गोमयेन उपलिप्य सज्जीकृतमस्ति गृहम्। गृहं परितः पुष्पलताः पुष्पभारनताः सन्ति। चालस्योपरि उपसर्पति शिम्बलता। परमदारिद्र्यमध्ये एकः प्रशान्त-स्निग्ध-मधुरः परिवेशः उपकल्पितोऽस्ति।.. पुनश्च ग्राम्यबालकाः जनाश्च तस्य यानं परितो ग्रामस्य नग्ना अर्धनग्ना बालाः दण्डायमानाः सन्ति। त्रिचतुराणां वयस्कजनानां मुखमपि दृश्यते। सर्वेभ्य आक्रोशन्ती सा गृहं प्रत्यागता, ... ।[६]

तां विदेशं नेतुं यदा सुनीलः इच्छति, तदा ग्राम्यमहिला सा कथमपि ग्रामं त्यक्तुं नेच्छति। तस्याः प्रतिपदं ग्रामप्रीतिः गुञ्जितास्ति। यथा— तस्या मुखे अखेलत् करुणहासः। तस्य पृष्ठमामृश्य साऽवादीत्— 'मम धन रे, अहं तु अत्र सुखेन तिष्ठामि। पुनः मरणकाले कथं गमिष्यामि अमेरिकाम्। कथं पुनः त्वं, तव पत्नी, पुत्रकन्ये च असौकर्यमन्वभविष्यत्। कुटीरमपि गृहमिदं मे स्वर्गः, यत्र मम विवाहाग्निः प्रज्वलितः, यत्र अहं वधूभावेन आगता, तत्र एव मे अन्तिमचिता प्रज्वलिष्यति। सौकर्यं चेदवश्यं मे चितानले अर्पयिष्यति मुखाग्निम्, नोचेत् शवाधारे पुष्पगुच्छमेकमस्थापयिष्यत्। तदेव अलम्।'[७]

अन्ततो यदा सा सम्मता भवति, कथानायकस्य आनन्दः दर्शनीयः भवति— तस्य हस्तस्योपरि स्वकीयं कम्पितं हस्तं स्थापितवती क्रन्दन्ती मातृष्वसा सीता। बाल्यकाले तं भीषयन्ती, दण्डप्रदानेन विभापयन्ती, विविधमसौकर्यं सृजन्ती, तस्य परमशत्रुरूपा एषा क्रन्दनसमये एवमसहाया करुणाप्लुता च भवतीति स न जानाति स्म। तस्या लोतकपारावारस्य मर्मस्थले सुनीलस्य बाल्यकालस्य पौगण्डस्य च इतिकथा लिखिताऽऽसीत्। लोतकस्नाता सा भूमिः कस्या अपि तीर्थभूमेरपेक्षया गरीयसी आसीत्। तां भूमिं सकृत् प्रणम्य उभौ ततः प्रस्थितौ। सुनीलोऽनुभवति स्म यानं भविष्यत्स्थाने अतीतं प्रति प्रस्थितमस्ति, यत्र तस्य बालकालस्य बल्गुहासा विलसन्ति अक्षतरूपेण।[८] एवमत्र अतीतसंस्मरणेन बाल्यकालस्य पुनः वर्णनेन इयं कथा रुचिपूर्णा जाता।

"ऋषिपत्नी"—कथायां वर्णितमस्ति जरत्कारुमुनेः घोरं तपोनिष्ठं जीवनम्। नागराजभगिन्या जरत्कारुरिति स्वसमाननामधेयया समं विवाहः,

---

[६] लज्जा, पृ.३८

[७] तत्रैव, पृ.४०

[८] तत्रैव, पृ.४०

पूर्वकृतपणेन ऋषेः गृहत्यागः, आपन्नसत्त्वायाः ऋषिपत्न्याः जरत्कारोः हठेन दुराग्रहगार्हस्थ्यजीवनमित्यादीनां सुनिपुणं वर्णनं वाचकानाह्लादयति। अत्र कथायां पुरुषप्रधानसमाजस्य मानसिकता नारीमानसिकीं खेदयतीति आपन्नसत्त्वायाः ऋषिपत्न्याः जरत्कारोः दुराग्रहगार्हस्थ्यजीवनस्य वर्णनायां प्रकाश्यते। जरत्कारुमुनेः तपोनिष्ठजीवने दुःखेन स्थितानां पितृपुरुषाणां पिण्डोच्छेदकारणात् दारापरिग्रहः कर्त्तव्यः। एवं नागराजभगिन्याः जरत्कारुरिति स्वनामधेयया समं विवाहोऽभूत्। पत्न्या कदापि तस्य कार्ये बाधा न देया इति वैवाहिकपणः आसीत्। एकदा अस्ताचलावलम्बिनि सवितरि त्रिसन्ध्यापरायणस्य ऋषिवरस्य निद्रायाः अभग्नत्वात् सा सहधर्मिणीरूपेण धर्माचरणे साहाय्यं करिष्यतीति तमृषिवरमुत्थापयति स्म। जागरणं प्राप्य ऋषिवरः स सन्ध्यावन्दनादिकं समाप्य पूर्वकृतपणेन अनुनयं विनयं प्रत्याख्याय आपन्नसत्त्वां पत्नीं विहाय गृहत्यागमकरोत्। तद्दिनात् नीरवप्रतीक्षायाम् ऋषिपत्नी वर्त्तमाना स्वभाग्यं विनिन्दयन्ती सती पुत्रदर्शनाय अवश्यमागमिष्यतीति विश्वसिति। तस्याः भावना कारुण्यम् आतनोतीति लेखकेन प्रकाश्यते।

"माधवी"त्यस्यां कथायां पुरुषशासितसमाजे नारी कथं भोग्यसामग्रीरूपेणोपयुज्यते भुज्यते वा इत्यस्य मार्मिकं चित्रणं कथाकारेण चित्रितम्। पित्रा ययातिना दानीयवस्तुरूपेण राजकन्यायाः माधव्याः दानं कृतम् ऋषये गालवाय। गुरुदक्षिणायै पितुः, कन्यायाः माधव्याः पणेन नृपत्रयेण, ऋषिणा विश्वामित्रेण च सह विवाहो जातो वर्षात्मककालाय एकैकेन कामुकेन धवेन समम्। चतुर्णां पुत्राणां जननी सत्यपि सा पुत्रेभ्यः स्तनदानात् वञ्चिता आसीत्। चतुर्णां पतीनां पत्नी सा, केनापि सादरं न गृहीता। गुरुदक्षिणादानानन्तरं स्वार्थपरक ऋषिरपि माधवीं तज्जनकाय प्रत्यपर्यति, ततः पिता पुनस्तस्याः स्वयंवरमायोजयति, क्षुब्धा माधवी सन्न्यासं स्वीकृत्य वनं व्रजति। अनन्तरं तयैव स्वर्गच्युताय पित्रे तदीयपुण्यफलं प्रदत्तम्। श्रीदाशेन असामान्यनैपुण्येन माधव्या सह पाठकानां तादात्म्यसम्बन्धः स्थापितः।

कथासङ्ग्रहस्यास्य संवेदनशीला कथा "इम्राना वदाम्यहम्।" अत्र महम्मदीयसमाजस्य कुत्सित-विकृत-सभ्यसमाजधिक्कृत-प्रथानामुल्लेखो विहितः साहसिकतया निर्भीकतया च श्रीदाशेन। श्वशुरेण धर्षिता इम्राना

महता खेदेन आत्मनानुभूतवृत्तजातमात्मकथनशैल्या वदति कथयाऽनया । इम्रानामुखेन लेखकस्तथाकथितधर्मीयव्यवस्थाया उपरि कशाघातमकरोत् । महम्मदीयधर्मे नारीणाम् इच्छा तिष्ठतु न तिष्ठतु वेति न विचारणीया, किन्तु धर्षिता नारी कस्यापि पुरुषस्य पार्श्वे नियमसम्मतरूपेण स्थातुं न शक्नोति । श्वशुरेण धर्षिता, धर्मानुसारं स्वामिपरित्यक्ता इम्राना महता खेदेन आत्मना अनुभूताः महम्मदीयसमाजस्य कुत्सित-विकृत-सभ्यसमाजधिक्कृतप्रथाः स्वकथनशैल्या वदति । तद् यथा—

“धर्मनाम्ना युद्धं प्रचलति देशदेशयोर्मध्ये प्रवहति रक्तमन्दाकिनी । कदा मनुष्यः अल्लामाकर्षति वितर्कवलये कदा वा ईश्वरं संस्थापयति विचारालयस्य काष्ठस्तम्भानां मध्ये । धर्मान्धः कामान्धो धनान्धश्च मनुष्यः सकलमपि दुष्कर्म विधाय तदुपरि प्रददति धर्मस्य मुद्राम् । यत्र धर्मनाम्ना प्रचलति महासमरः, तत्र स्थित्वा कथमहं कथयितुं पारयामि धर्मस्य तुलायाः कस्मिन् पार्श्वे स्थित्वा अहम्, असती न भविष्यामि ।”[९]

एवमेव इम्रानामुखेनापि साधारणानां धर्षितानां परित्यक्तानां नारीणामन्तर्वेदना अपि कथाकारेण उपस्थाप्यते। तद् यथा— अहो दुःखस्य लज्जाया इमां वार्तामधुना संसारस्य समक्षं, स्थापयितुमहं बाध्यास्मि । तस्यां भयङ्कर्यां रजन्यां यः पिशाचरूपेण परिवर्तित आसीत्, पुनः मां बलात्कृतवान्, स तु मम पत्युः पिता, मम पूज्यः श्वशुरश्रीः । मनुष्य एतावान् हिंस्र इति तु मम विश्वासो न भवति स्म । अहं तु मनुष्येष्वेव विश्वासं त्यक्तवती । अधुना अहमनुभवामि, प्रतिपुरुषं नेत्रयोर्देदीप्यते काचिदनिर्वाणा कामना । नारीस्तनजघनमांसभोजनस्य काचिदतृप्ता वासना । बीभत्सभावेन परस्त्रीभिः सह पुना रमणस्य कुटिला रिरंसा । तदा मम विकलचीत्कारः प्रतिध्वनितः केवलं प्रस्तरीभूतान्धकारस्य वक्षसि ।... नहि, कस्यापि कापि नास्मि । अहं केवलमेका रक्तमांसधारिणी शरीरिणी । पुरुषस्य कामनाग्नौ वारं वारं निपतन्ती धूम्रायमाना पतङ्गरूपिणी काचित् । या कस्मिन्नपि समये कस्यापि पुरुषस्य क्षुधानिवारणार्थं समुपस्थिता स्यात् । एतदर्थं नास्ति कापि बाधा । नास्ति वा किमपि बन्धनम् । नास्ति वा नीतिनियमानां गर्जनं तर्जनं वा ।[१०]

---
[९] लज्जा, पृ.५१-५२
[१०] तत्रैव, पृ.४८

"परिचयः" इति कथायां वैदिकयुगीयक्रीतदासप्रथा उल्लिख्यते । यथा— हैमन्तिके करुणप्रभाते दूर्वादलवक्षसि प्रस्फुटितस्य शिशिरविन्दोः पुनः कोऽस्ति परिचयः? केषाञ्चन मुहूर्तानां तरलं यौवनम्, केषाञ्चन मुहूर्तानां प्रभातवाताहतं वेदनायुतं कम्पनम् । ततः परं खररश्मेस्तीव्रदंशनेन तस्य जीवनस्य यवनिकापातः, अयमेव तस्य जीवनेतिहासः । इममतिरिच्य अस्मिन् विशाले संसारे तस्य को वास्ति परिचयः? तपस्विन्या दुःखिन्या दास्याः पुत्रः सत्यकामः । तस्य तथाविधः कश्चन परिचयः कुतः सम्भवेत्? अद्य पुत्रः एव पृच्छति पितृपरिचयम् । सा तथा भाग्यहतका जननी अस्ति या स्वयं न जानाति कोऽस्ति सत्यकामस्य जनकः । किमुत्तरं दास्यति सा? तथापि सा साहसेन सत्यम् उक्तवती— पुत्र, बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे । साहमेतन्न वेद यद्गोत्रस्त्वमसि । अतः कस्ते पिता, कस्य त्वं पुत्रो निर्भ्रान्ततया कथयितुं न शक्यते । त्वं जबाला-तनयः सत्यकामोऽसि । अयमेव तव परिचयः ।

अन्तिमे अपावृत्तमेव सत्यं जबालया । नयनयोरश्रुधारा सिञ्चति स्म धरणीतलम् । सत्यमेव तस्या अनुतापाश्रुभिर्विगतजीवनस्य सकलं पापं, सकलः कलङ्कश्च विमार्जितः । कथमिव सत्ये निष्ठा श्रद्धा च आर्यरमण्याः । एतादृशं घृण्यमपि सत्यं पुत्रस्य समीपे प्रकाशयितुं न कुण्ठिता । सत्यकथनेन ब्राह्मणस्य परिचयः भवतीति गौतममुखेन कथाकारः समाजं दिग्दर्शयति । तद् यथा— न हि वत्स, त्वं केवलं जबालातनयो जाबालो नासि । त्वमेव प्रकृतब्राह्मणः, यस्य अन्वेषणा मया प्रारब्धाऽऽसीत् । नोचेत्, एवंविधं कटु-कठोर-सत्यमकुण्ठितचित्तेन निर्लिप्तभावेन सर्वसमक्षं कः प्रकाशयेत्? यथार्थतोऽन्वर्थनामा सत्यकाम इति । अद्यारभ्य त्वं ब्रह्मज्ञानिनो गौतमस्य शिष्यः । अधुना गच्छ, वत्स! यज्ञसमिधमाहर ।[११]

एवं सत्यकामस्य निश्चलतया मुग्धो गौतममहर्षिः तं सत्यकामं ब्रह्मज्ञानाधिकारिणं मत्वा शिष्यत्वेन गृहीतवान् । सत्यप्रियोऽयं सत्यकामः स्वपरिचयं मातृपरिचयेन अन्वितं कृत्वा जाबालभावेन स नवीनब्रह्मणवटोः परिचयं प्राप्य तत्र अधीतवान् ।

"अत्रिकन्या"—कथायां महर्षेरत्रेः परमा विदुषी, विद्याविनयसम्पन्ना, गृहकर्मनिपुणा कन्या "अपाला" कथानायिकारूपेण कथाकारेण गृहीता ।

[११] लज्जा, पृ.६३

अपालायाः कठोरसाधनायाः कथाऽत्र वर्णिता। सर्वगुणसम्पन्ना सा श्वेतकुष्ठेनाक्रान्ताऽऽसीद् इत्यतः शारीरिकं सौन्दर्यमेव सर्वोपरीति मन्वानेन प्रियतमेन ऋषिणा कृशाश्वेन सा परित्यक्ता। स्वमनोव्यथां वर्णयति— काचित् पत्नी किं रुग्णं पतिं प्रत्याख्यातुं शक्नोति? श्लथसन्धिजर्जरितस्य परिणामपेशलस्य यदा कदा क्षयशीलस्य शरीरस्य प्रेमैव मानवस्य काम्यम्? ‘अङ्गं गलितं पलितं मुण्डं, दशनविहीनं जातं तुण्डम्’ कीदृशं बीभत्सं रूपं प्राप्नोति मानवः? व्याधिमन्दिरं शरीरं गृहीत्वा जातो मानवः किमाजीवनं स्वस्थः सुन्दरो वा स्थास्यति? तस्य प्रेमभावना सामयिकबाह्यसौन्दर्ये एव सीमिता? प्रश्नक्लान्ताऽत्रिकन्याऽपाला जलकुम्भं स्थापयित्वा एकस्मिन् प्रस्तरखण्डे उपाविशत्। श्वशुरालयात् प्रत्यागमनात्परं कदापि अपाला सूर्यास्तात् पूर्वं पर्णकुटीराद् बहिर्नागच्छति । तस्याः समग्रशरीरे धवलकुष्ठस्य लक्षणानि क्रमशः मलिनीभवन्ति । परन्तु यदा प्राणप्रियः पतिः जुगुप्सते, तदा दिवालोके पुनः अपरस्य जुगुप्सापात्रं भवितुं सा नेच्छति ।

अद्य कस्याश्चित् शुद्धप्राणायाः कन्याया भक्तिपूतमुच्छिष्टमपि ततोऽधिकं मन्यमानो वरं प्रार्थयितुं निरादिशत् देवराज इन्द्रः। स्वर्गीयां सोमलतां, देवराजमिन्द्रं च प्रत्यक्षीकृत्य अत्रिकन्याया दिव्यभावः सहसा प्रस्फुरितः। कापि पार्थिवकामनां पूरयितुं तस्याः प्रार्थना अवशिष्टा नास्ति। अद्य कृशाश्वस्यातुरनिवेदनं निष्ठुरं प्रत्याख्याप्य सा समस्तसंसारहेतुं जितवती। सा उपदिष्टवती— कृशाश्वोऽपि कठोरतपश्चरणेनात्मसौन्दर्यमनुभवतु । अद्य सा जीवन्मुक्ता । उपशान्तस्तस्या व्याधिः पतिपरित्यक्तायाश्च यन्त्रणाबोधः। चन्द्रोदयात्पूर्वं शुभ्रचन्द्रिकायाः कठिनीभूतप्रतिमाया इव तपस्सिद्धाया अत्रिकन्यायाः शुद्धा सुश्रीः वनभूमिमालोकयति स्म ।

“अमृतफलम्” इति कथायां किंवदन्तीवृत्तमनुसृत्य राज्ञः भर्तृहरेः कवित्वस्य परिचयं लब्ध्वा कथं तेन शतकत्रयं विरचितम् इति कथाकारेण मनोभावनगद्यशैल्या उपस्थाप्यते। गुरुणा प्रदत्तम् अमृतफलमेकमपूर्वफलम्। तस्य फलस्य भक्षणेन यौवनं चिरस्थायि भविष्यति ।

राजा फलस्य रहस्यं अनभिज्ञाय शेषजीवनं तस्य नूनं सुखमयं भविष्यति इति दृढं विश्वस्य फलभक्षणविधिं सम्यक् विज्ञाप्य स्वपत्न्यै राज्ञ्यै पिङ्गलायै तत्फलं समर्पितवान्। परन्तु तत्फलं महाराज्ञी पिङ्गला प्रधानसेनापतये

धीरवर्मणे प्रदत्तवती। यतो हि सा एकदा नद्यां भासमाना धीरवर्मणा रक्षिता। तदारभ्य सा तस्मिन् स्निह्यति। तत्फलमपि नितरां प्रीतिमान् धीरवर्मा गणिकायै मधुमत्यै उपायनीकृतवान्। गणिका मधुमती अपि तत्फलमानीय भर्त्तृहरिमहाराजाय उपायनीकृतवती। यतो हि तस्य फलस्य भक्षणेन अमितशक्त्या चिरयौवनेन अपारसौन्दर्येण राजा चिरं प्रजाकुलं पालयिष्यति। राजा सम्यक् निरीक्ष तदेवेदं फलं यत् राज्ञ्यै प्रदत्तमिति विज्ञाय कुतः लब्धं तया इति पृष्टवान्। गणिकामुखात् सेनापतिना प्राप्तमिति श्रुत्वा स्वप्रियतमायाम् अविश्वस्य भृशं दु:खितः सन् तदेव फलं नीत्वा स गुरवे प्रत्यर्पणञ्च कृतवान्। संसारविषये तस्य पूर्वानुमानं भ्रष्टं जातम्। यथा— मम साधना विफला जाता गुरुदेव। अहं न ज्ञातवान्— कीदृशोऽयं संसारः। मन्ये, जन्मजन्मान्तरसंस्कारवानप्यत्र विफलो भवेत्। किं पुनः मम एकजन्मनः अनया क्षुद्रसाधनया? तथाप्ययं मे अनुभवः—

क्वचिद्वीणावाद्यं क्वचिदपि च हाहेति रुदितम्
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः।
क्वचिन्नारी रम्या क्वचिदपि जराजर्जरवपुः
न जाने संसारः किममृतमयः किं विषमयः॥

तदानीं गुरोः उपदेशेन धर्मार्थकामाः सममेव सेव्याः इति समुपस्थाप्यते। तद्यथा— गार्हस्थ्यं विश्वासेन प्रचलति महाराज, न तु अविश्वासेन। भवान् अविश्वासस्य बीजं पोषितवान्। कदापि स्त्रीणां चरित्रे सन्देहो न करणीयः। ब्रह्म सत्यमस्ति एव। इदं तु जीवनस्य परमं तथा चरमं सत्यमस्ति। किन्तु मधुमयजीवनस्य स्वप्नमयसंसारस्य सत्यत्वमपि अविश्वास्यं नास्ति। जीवनं दुःखमयमिति कृत्वा ततः पश्चाद्धावनमनुचितम्। उक्तं खलु— धर्मार्थकामाः सममेव सेव्याः।[१२] अत एवात्र कथायां प्रियतमायाः पत्न्या: विश्वासघातत्वात् राज्ञः भर्त्तृहरेः संसारविषये वैराग्यमुत्पाद्य भ्रात्रे राज्यार्पणं विधाय सन्न्यासग्रहणं कृत्वा स्वजीवनस्य कट्वनुभवानां शतकत्रयेण समाहृत्यादिवर्णनं सुचारुतया उपन्यस्यते।

प्रेममार्गे कदापि आर्यानार्यादिजातिगतद्वेषो बाधां जनयितुं न शक्नोतीति "अनार्य"—कथया श्रीदाशेन निरूपितम्। अनार्यः पुलोमा अजगरसर्पग्रासतः आर्यच्छद्मकस्य कन्यां रक्षितवान्। परन्तु कार्तज्ञ्यमपि न प्रदर्श्य च्छद्मकेन

[१२] लज्जा, पृ.७३

द्वारादेव स प्रतिप्रेषितः। गच्छता कालेन प्रेमिकयुगलस्य गृहत्यागः, सहैव वनवासः। पुलोम्नोऽनुपस्थितौ छद्मकजनैः प्रसभेन कन्यायाः भृगुमुनिना सह विधिपूर्वकमुद्वाहसम्पादनं कारितम्। प्रेमिकां गृहे अदृष्ट्वा पुलोमा अधीरः भवति— मनः दृढीकृत्य प्रियायाः सन्धाने प्रस्थितः पुलोमा। तमेव प्रतीक्षमाणा आर्ययुवानो निर्ममास्त्राघातैः तस्य क्षतं शरीरं न्यपातयन् आर्यपल्ल्याः प्रस्तरमये प्रान्ते। परस्मिन् प्रातः शीतलवायुना चेतनां प्राप्तः पुलोमा। ततोऽपि शीतलायते तस्य शरीरं, जीवनं, भविष्यच्च। तद्दिनात् पीडितशरीरेण अन्विष्यति प्रियां पृथिव्याः कोणानुकोणेषु। अतिक्रान्तो महाकालः। सर्वथा जीवनमिह विफलम्। प्रियाहीनोऽसफलः। श्रीमुखदर्शनमपि अफलम्। अग्रे मार्गोऽसरलः। हताशस्य पथिकस्य दीर्घायते मार्गः। अदूरे दृश्यते भृगुमुनेराश्रमः। क्षुधार्त्तोऽनार्य्यः कुटीराद् बहिरेव प्रार्थयत् क्षुधातृषानिवारणार्थम्। प्रेमिकां गृहे नावलोक्य अनार्यपुलोमा अधीरः सन् अन्विष्य भृगुमुनेः कुटीरं प्राप्तवान्।

तत्र एकाकिनीं प्रेमिकां प्राप्य बलात् तां गृहीत्वा प्राधावत्। प्रेमिकायाः रक्षणार्थं चेष्टमानः पुलोमा गर्भिणीं भृगुपत्नीं बलादाकर्षितवान्, अनुतापजर्ज्जरितः सः, सा प्राणैर्वियुक्ता भवति, भृगुमुनेः पुत्रोत्पत्तिः भवतीत्येतत्सर्वं मनोज्ञशैल्या वर्ण्यते।

"वाग्दत्ता" इति कथायाम् ऋषिकुमारः रुरुः, अपरा च आचार्यस्थूलकेशस्य पालिता कन्या प्रमद्वरा, इत्यनयोः शाश्वतप्रेमगाथा वर्णिता। उभयपक्षयोः सहमत्या उभयोर्विवाहः स्थिरीकृतः भवति। सत्यवाग्दानमपि सम्पन्नं जायते। केनापि व्याजेन रुरुकुमारः भाविपत्न्या सह साक्षात्करणाय स्थूलकेशस्य आश्रमं वारं वारमागच्छत्। तस्यागमने कस्यापि आपत्तिः नासीत्। तदैवाकस्मात् कृष्णसर्पस्य दंशनेन प्रमद्वरा मृता जाता। दुःखदं दुर्घटनं समक्षमवलोक्य रुरुकुमारः प्रियतमायाः निश्चलशरीरं क्रोडे धृत्वा विलपति। मृतशरीरं कुटीरे संस्थाप्य ततः अन्धकारं भयानकवनमविगणय्य प्रस्थितवान्। प्रमद्वरायाः मृत्युरभवत् इति तस्य विश्वासः न भवति। शाश्वतप्रेम्णा नायकस्य हृदये नायिकाजीवनलाभाय कथमात्मविश्वासः उत्पद्यते, कथाकारेणात्र सफलरूपायणं क्रियते।

"लज्जा" इति कथायां विशेषतः धनात् विद्या गरीयसी इति सूक्तेः सार्थकता प्रतिपाद्यते। अत्र कथावस्तु काल्पनिकं भवति।

यत्र त्रिकोणात्मकप्रेमप्रसङ्गः वर्णितः। अत्र नायिका यज्ञा पतिरूपेण कमपि धनवन्तं न अपि तु कमपि विद्वांसं वृणोति। कथानायिका यज्ञा निम्नमध्य-वित्तपरिवारसन्तानं मानसम् एकमुच्चकोटिकं बुद्धिजीविनं लेखकं मन्यमाना विवाहं कृतवती। मानसः स्वकीया योग्यता का इति वारं वारं विचारयति। साम्प्रतिके युगे का वा सुन्दरी, सुशिक्षिता कन्या पतिदेवस्य अर्थोपार्जनक्षमतामुपेक्ष्य बौद्धिक-मानसिकतायां स्निहित्वा विवहति? कोऽयं वा लेखकः? समसामयिकसंस्कृत-साहित्ये मे कतिचन लेखाः प्रकाशिताः सन्ति सत्यम्, किन्तु लेखक इत्युक्ते पाठकस्य समीपे या द्वितीयप्रजापतेः छविः समुद्भासते, तादृशी नवनवोन्मेषशालिनी प्रतिभा तु मम पार्श्वे नास्त्येव। मादृशी यज्ञापि संस्कृते अध्ययनरता आसीत्। तेन सह साहित्ये आसीत्तस्याः प्रबलानुरागः। मयि कार्यालये गते सा मदीयपुस्तकालये निमज्जति स्म। सद्यसमुपार्जितज्ञानेन सा मम साहित्यसर्जने सहायिका आसीत्। प्रिया-पुस्तकेषु च मम कालः क्षिप्रो भवति स्म।

परन्तु चन्द्रकान्तमहापात्रं यन्त्रीति ज्ञात्वाऽपि विवाहप्रस्तावं न स्वीकृतवती। मानसः धनागारे सेवामारब्धवान्। चन्द्रकान्तमहापात्राय ऋणप्रदाने सहायता कृतेति स दशसहस्र-मूल्यात्मकं दूरदर्शनमेकं विनामूल्यम् उपायनीकृतवान्। अनन्तरं चन्द्रकान्तमहापात्रः प्रायः बहुधनमर्जयति, शिल्पशाला तस्य सम्यक् प्रचलति इति ज्ञात्वाऽपि कथानायिकया यज्ञया तत्र शिल्पशालां गत्वा धनमोहमुक्तया सत्या गुणग्राहितायाः परिचयः प्रादीयत। तदुक्तं यथा— 'धनार्जनेन किम्? ये लज्जां न अपठन्?'[१३] एवमत्र कथानायिकया यज्ञया अन्ततो गत्वा धनमोहमुक्तया सत्या गुणग्राहितायाः परिचयः प्रदत्तः।

किंवदन्त्यनुसारं प्रसिद्धस्य कवेर्मयूरस्य जीवनस्य कियद्भग्नांश एव "कविकन्या" इति कथायां प्रतिफलितः। कदाचिद्रात्रौ कन्यागृहद्वारे स्थितः मयूरः ज्ञातवान् यत् मानिनीं पत्नीम् अनुकूलयितुं जामाता बाणभट्टः प्रयासरतः भवति। कन्याजामात्रोः कलहे कन्यायाः अशान्तकण्ठस्वरः वर्धतेतराम् इति श्रुत्वा कविमयूरः उत्क्षिप्तोऽभवत्। तदानीं स शृणोति यत् बाणभट्टः प्रियायाः व्यवहारेण दुःखं प्रकाशयति। गवाक्षसमीपे स्थितः पितामयूरः कन्यायाः औद्धत्यम् अशालीनं व्यवहारं तथा च जामातुः बाणभट्टस्य नम्रतां

---

१३ लज्जा, पृ.८९

दुःखञ्चावलोक्य क्षुब्धः सन् जामातुः उच्चारितस्य श्लोकस्य चतुर्थपादस्य पूरणमकरोत् ।

अनेन अपमानिता कन्या पितरं मयूरं घृणया "त्वं कुष्ठरोगग्रस्तो भव" इति अभिशप्तवती । कविकन्या, कविपत्नी भूत्वाऽपि सा पितरं नावगच्छति तर्हि अन्येषां का कथा? वारं वारं कविमनसि साधारणीकृतं रूपसौन्दर्यम् उद्भासते । अनन्तरं कविः मयूरः सूर्यशतकं विलिख्य रोगमुक्तोऽभवत् ।

जातिभेदकारणतः विच्छिन्नस्य प्रेमिकमिथुनस्य सहसा हावडारेलस्थानके मेलनं भवति । परन्तु तेषां विरहस्य वर्णनम् एकोक्तिमाध्यमेन साधयति कथाकारः । वस्तुत एकदा तेषां नित्यदर्शनं भवति स्म पञ्चवर्षेभ्यः पूर्वम् । महाविद्यालयीयजलपानगृहस्य एकस्मिन् कोणे तावेवमेव उपविशतः स्म । निस्सङ्गं तस्या जीवितम् । अनुजयोः विवाहात्परं पितामही दिवङ्गता । पितुः सर्वस्वभूता राज्ञी । सार्थकं जीवनं जीवितुं बहु किमप्यावश्यकम् । इदं तु सार्धैकसहस्रवेतनधारिणः संसारस्य जैविकस्थितिमात्रम्, जीवनं नास्ति । किन्तु कुमारः कथं न विवाहितः? कस्याः प्रतीक्षायां सोऽद्यापि कुमारः? कस्याः स्वप्नपुर्य्याः राजकुमार्य्याः कुमारीत्वमपहर्तुं तस्य चिरकुमारव्रतम्?

परस्परं वार्तालापेन द्वयोर्मनोमालिन्यं दूरीभवति । द्वयोः परिवारयोः विरोधकर्तारोऽपि न सन्ति सम्प्रति । अतः पूर्वप्रणयं स्मृत्वा द्वौ पुनरेकीभवतः । पुनर्मेलनं भवति द्वयोरिति "अन्तिमसोपानम्"—कथायां लेखकेन श्रीदाशेन काल्पनिकवृत्तमिदमकृत्रिमतया सुविन्यस्तम् । नाटकीयशैल्या कथामुपसंहरति कथाकारः उभयोः एकयानेन चिटिकाकर्तनमाध्यमेन ।

## कथावस्तुविश्लेषणम्

एवमेव कथाकारेण श्रीदाशेन स्वीयकथासङ्ग्रहेषु सामाजिकसमस्यानां कुटुम्बसम्बन्धानां भावनात्मकद्वन्द्वानाञ्च सुगभीरबोधस्य परिचयः प्रदत्तः, किञ्च निरुक्तविषयाणामभिव्यक्तावपि तदीयं श्लाघ्यं सामर्थ्यं प्रदर्शितम् । एताः कथाः मुख्यतया वैदिकयुगस्य पुराणयुगस्य च नारीसमस्याः विशदीकुर्वन्ति । मातृष्वसा, इम्राना वदाम्यहम्, लज्जा, अन्तिमसोपानम् इति कथाः यद्यपि आधुनिकयुगस्य प्रतिनिधित्वं कुर्वन्ति, तथाप्येताः कथाः नारीसमस्याधारिताः भवन्ति । समाजेषु नारी कदाचित् नारायणी कदाचिद् वा कात्यायनी भवति इति समाजः सर्वमपि मानापमानं, मौनं, दहनं, मन्त्रणां, यन्त्रणां वा तस्याः कृते उपायनीकरोति । कदाचित्सा सर्वंसहा भयेन

लज्जया स्वपरिवारशुभकामनया वा सर्वं सहते, कदाचिद् वा निष्ठुरसत्यं सहते, कदाचिच्च कठोरभावेन प्रतिवदति । कदाचित्सा मातृत्वकामनया अधीरभावेन प्रतीक्षते । कदाचिद् वा सा पारिवारिकसुखसन्धानेन अमृतत्वं प्राप्नोति । कथास्वेतासु एवमेवाधारितेषु सफलीकृतेषु नारीचरित्रविमर्शनेषु कथाकारः सफलः जातः । कथावस्तूनां भावसम्प्रेषणविधौ निसर्गस्य सार्थकं रूपायणं सहायकमस्ति । घटनावैविध्यस्थले कथानां भावनात्मकस्तथा विचारात्मको विस्तारो वर्तते । कथावीक्षा मनोविश्लेषणात्मिकेत्यतोऽन्तर्मुखी हृदयस्पर्शिनी चास्ति । सर्वा अपि कथाः घटनाविस्ताराणामपेक्षया भावगाम्भीर्येण मार्मिकदृष्ट्या च वाचकान् समधिकतया प्रभावयन्ति । प्राकृतिकदृश्यानां नैसर्गिकं वर्णनं लेखकस्य अपरा कला । मातृष्वसाकथायां ग्रामस्य प्राकृतिकं वर्णनं रुचिकरमस्ति । यथा— प्रातःकालस्य धीरशीतलसमीरणो नितरां मनो हरति । अयं मृदुः समीरणः, पक्षिणां मधुरं कूजनं, मधुसिक्ता कुज्झटिका, सर्वं किमपि आत्मीयं परिचितचरञ्चासीत् । ममतामय्याः मातुरिव पृथिवीमातुरपि एकं मधुमधुरमाकर्षणं वर्त्तते । तस्याः कोमलवायुलहरीषु मातुः स्नेहसिक्तवस्त्राञ्चलस्य कोमलस्पर्शोऽनुभूयते । हरितदूर्वादलेषु शिशिरबिन्दवो मुक्ताखण्डानीव परिस्फुरन्ति । मार्गपार्श्वे यानं स्थगयित्वा कोमलघासेषु पादं स्थापितवान् सः । शीतलशिशिरस्पर्शेन मस्तिष्के काचिदनन्या स्नायविकोत्तेजना अनुभूता । अतीतस्य रङ्गमञ्चे पुनः जीवनस्य मधुरनान्दीपाठोऽनुस्यूतः । एतादृशेषु शीतप्रदोषेषु एकदा स शिशिरसिक्त-घासेषु पादौ आर्द्रीकृत्य पठितुं गच्छति स्म । तस्मिन् आर्द्रे परिवेशेऽपि स कन्दुकं क्रीडन् गच्छति स्म । पुनः सार्द्धनववादने गृहं प्रत्यागत्य सकलदुष्टाचरणैः कोलाहलैश्च गृहं प्रकम्पयन्, सेवकैः सह नियमिततया कलहं कुर्वन्, त्वरया किमपि भक्षयन्, नृत्यन्, गायन् स विद्यालयं गच्छति स्म । इदानीमनुभवति सुनीलः तस्य वयःक्रमः पञ्चदशवर्षे एव स्थगितः । कैशोरचापल्येन स प्रणालिकाकूले उपविश्य चलचञ्चलजलधाराया जलं पादाभ्यां कलकलं कुर्वन् स्वर्णशीर्षधान्यक्षेत्राणां परिपूर्णं श्रियमुपभुक्तवान् ।[१४]

श्रीदाशस्य कथासु घटनानां दैर्घ्येण परिमापस्य प्रयासो नावलोक्यते अपि तु अन्तरङ्गाध्ययनस्य मनोज्ञवीक्षणं दृष्टिपथमायाति । बहुशः

[१४] लज्जा, पृ. ३५-३६

सर्वेषामपि पात्राणां जीवनरूपिभावसागरस्यातीव गहनस्थले निमज्जन् अपरानुभवरूपिरत्नानां प्रकाशाय कथाकारोऽग्रेसरो दृश्यते । कथानां चयनं, विस्तृतघटनाक्रमस्य संक्षेपेणोपस्थापनं, कुशलं संयोजनञ्च कथाकारस्य महनीयसाहित्यकृतेः परिचायकमस्ति । श्रीदाशस्य कथाः वैयक्तिक-पारिवारिक-सामाजिक-समस्यानां तत्समाधानपरकतत्त्वानाञ्च गवेषणमात्रं न करोति, अपि तु तत्सम्बद्धभाव-युक्तिनिर्भरसमताविधायकतत्त्वानां व्याख्यानमपि करोति ।

अस्य कथासु यान्त्रिकता नास्ति, अपि तु प्राणमयसृजनता परिलक्ष्यते । अत्र कथासु सहृदयानां चित्ते प्रवर्तमानं परिवर्तनं परिलक्ष्यते । कथाकारे वास्तविकजीवनं जगच्च, तदीयसमस्तसम्बन्धैः सह सङ्गृह्य अवबोधस्याभिव्यक्तेश्च यथार्थवादिनी दृष्टिरस्ति । यथा वाग्दत्ताकथायाम्— 'अहं यदि कदापि स्वार्थशून्यभावेन किमपि दानं कृतवान्, तर्हि मम प्रियतमा प्रमद्वरा जीवनं प्राप्नुयात् । अहं यदि कदापि शुद्धमनसा एकाग्रचित्तेन वा तपः कृतवान्, तर्हि भूमौ लुठती प्राणहीना कृशाङ्गी प्रमदा जीवनं प्राप्नुयात् । अहं यदि अचलया भक्त्या गुरोः सेवां कृतवान्, तर्हि मम जीवितसर्वस्वभूता प्रमदा मरणमतिक्रम्य प्रत्यागच्छतु । अहं भृगुवंशजः प्रमतिकुमारो रुरुः, यदि इदानीं यावत् आत्मसंयमेन अखण्डं ब्रह्मचर्यं पालितवान्, तर्हि मम वाग्दत्तायाः प्रमद्वराया मृते शरीरे जीवनस्य सञ्चारो भवतु ।'[१५]

सर्वासु कथासु पात्राणां सङ्घर्षसामर्थ्यं जिजीविषा च प्रतिपदं प्रतीयते । मानसिकद्वन्द्वात्मकदशानां रूपायणे कथाकारस्य कुशलता सर्वत्र स्पष्टा । मनोविश्लेषणात्मककथासु कथाकारस्य सूक्ष्मेक्षिका वर्तते । यथा— "अद्यत्वे सम्पर्कस्तु श्रुताश्रुतयोः । पञ्चवर्षेष्वपि तयोरेकवारमपि मेलनं न जातम् । अवश्यं तस्याऽऽवश्यकताऽपि नासीत् । पञ्चवर्षपूर्वीया सा वर्षण-सान्ध्य-स्मृतिरद्य जीवितसर्वस्वा । नहि, नहि, संसारस्य सारनिर्यासभूता । विस्मर्तुं चेष्टे । किन्तु विषण्णाऽपि स्मृतिः विस्मर्तुं न शक्यते । ... वस्तुत एकदा तेषां नित्यदर्शनं भवति स्म पञ्चवर्षेभ्यः पूर्वम् । महाविद्यालयीयजलपानगृहस्य एकस्मिन् कोणे तावेवमेव उपविशतः स्म । सामान्यजलपानेन सह सरति स्म अन्तरीक्षस्यानन्तस्समयः । वातायनस्य बहुदूरे रक्ततरो भवति स्म कृष्णचूडायाः वर्णः । गभीरतरो भवति स्म आकाशस्य नीलनीलिमा ।

[१५] तत्रैव, पृ.८१-८२

रक्तिमनीलिम्नोरन्तराले द्रुततरो भवति वक्षोद्वयस्य नियमितस्स्पन्दः । सत्यायते क्षुद्रोऽपि कश्चन स्वप्नः । किन्तु वास्तविकतया तथा किमपि न जातम् । सर्वे स्वप्नाः कथं न सत्यायन्ते? सहासं राज्ञी आक्षिपत्— हठात् कथं चिन्तामग्नो जातः? मम प्रश्नस्योत्तरमपि नास्ति? भवान् तथैव वर्तते, सर्वदा अन्यमनस्कः!"[१६]

**रसः**

अत्र विविधकथासु विविधरसाः उच्छलिताः सन्ति । यथा आर्याम्बा, सफलानारी, परिचयः, मातृष्वसा इत्यादिकथासु वात्सल्यरसस्य ओतःप्रोतः, तथैव लोपामुद्रा, अत्रिकन्या, अनार्य्यः, वाग्दत्ता, लज्जा, अन्तिमसोपानम् चेति कथासु प्रेम्णः प्रगाढता अनुभूयते । कुत्र प्रेमप्राप्त्यर्थं नारीमनसः हाहाकारः प्रणयसाधनायाः चारुचित्रणं लभ्यते । अमृतफलम् इत्यादिकथासु अविश्वासेन प्रेम्णः वैफल्यं निरूपितम् । एतासु शृङ्गारः रसः महीयते । इम्राना वदाम्यहम् इत्यादिसामाजिककथासु प्रेमप्रणयतले वास्तववादिनी चिन्ताधारा दृश्यते ।

**पात्रयोजना**

कथाकारः सर्वत्र कथानुरूपं पात्राणि कल्पयति । मातृत्ववर्णनाय आर्याम्बा, सफलानारी, परिचयः, मातृष्वसा कथासु तथैव पात्राणि सृष्टानि । तथैव प्रेम्णः साफल्याय लोपामुद्रादिचरित्राणि अवतारयति ।

**देशकालः**

अत्र पौराणिकयुगात् आधुनिकयुगं यावत् कालः क्रोडीकृतः । आधुनिककथासु कविः देशात् विदेशं यावत् कथां निरूप्य कथानायकं विदेशात् पुनः देशस्य ग्रामभूमौ अवतारयति ।

**वातावरणम्**

कथानुगुणं वातावरणं सर्वत्र कल्पितम् । यथा परिचयः इति कथायां गौतमाश्रमस्य वातावरणं वर्णितम्, तथैव मातृष्वसा इत्यादिकथासु कथानायकं विदेशात् पुनः देशस्य ग्रामभूमौ प्रापयति । लोपामुद्रा,

---

[१६] लज्जा, पृ.९६

अत्रिकन्या, अनार्य्यः, वाग्दत्ता, इत्यादिकथासु आश्रमपरिवेशं सृजति। अन्तिमसोपानम् इति कथा तु अतीतस्मरणमाध्यमेन हावडारेलनिस्थाने आरब्धा समाप्ता च।

## उपसंहारः

नारायणदाशस्य कथासु सर्वत्र स्वदार्शनिकदृष्टिः व्यक्ताऽस्ति। कथाकारेण यथार्थेन सह युगपदभावप्रसङ्गयोर्महत्ताऽनुकूला तथा स्वीयसंवेदनाऽभिव्यञ्जिता वर्तते। कथासु सरलता, सहजता, सरसता, धाराप्रवाहता, नवीनता, उत्कृष्टता, समकालीनता, भावगम्यता, रोचकता, गुणसमृद्धा भाषा, कथासङ्ग्रहनिपुणता, पठनीयता चेति दुर्लभसाहित्यगुणा वर्तन्ते। कथावस्तूनां प्रस्तुतौ, घटनानां संयोजने, कथानां विकाशे, पात्राणां चरित्रचित्रणे, भावानुकूलसरलसंस्कृतभाषाप्रयोगे च कथाकारस्य नवीना सृजनशक्तिः प्रभाविता वर्तते। कथासु समस्यासमाधानस्य मार्गनिर्देशनम्, तन्मार्गे आगतानां बाधानां दूरीकरणम्, समस्यासमाधानानन्तरमुत्पन्नविडम्बनात्मकस्थितीनां चित्रायणञ्च लेखकस्य सिद्धतां सूचयति, पटुताञ्च प्रकटयति। किं बहुना, श्रीदाशस्य कथापठनेन आधुनिकसाहित्यपाठस्य सम्प्रत्ययो भवति।

***

## Bibliography


1. *गङ्गे च यमुने चैव (कथासङ्ग्रहः)*; नारायणदाशः ; लोकभाषाप्रचारसमितिः ; वरपदा ; भद्रक ; २००१
2. *नरेन्द्रपुरीयं रेलस्थानकम् (भूतप्रेतदशकम्)*; नारायणदाशः ; कथाभारती ; प्रयागः ; २०१५ ; प्रथमसंस्करणम्
3. *लज्जा*; नारायणदाशः ; श्रीमती सवितादाश (प्रकाशिका) ; कोलकाता ; २०१२ ; द्वितीयसंस्करणम्।
4. *वह्निवलयः (उपन्यासः)*; नारायणदाशः ; श्रीमती सवितादाशः (प्रकाशिका) ; पुरूषोत्तमपुरम् ; गंजामम् ; २००२
5. *वह्निवलयः (हिन्दी अनुवाद समीक्षा)*; विकाससिंहः ; कथाभारती ; कलिकाता ; २०१५ प्रथमसंख्या
6. *श्रावणस्य प्रथमदिवसे*; नारायणदाशः ; तुहिना प्रकाशनी ; कलिकाता ; २०१७ प्रथमसंख्या
7. *संस्कृतसाहित्ये पश्चिमवङ्गस्यावदानम्*; नारायणदाशः ; कथाभारती ; कलिकाता ; २०१९ द्वितीयसंस्करणम्

8. *संस्कृतेऽनूदितं समकालिकं कथासाहित्यम्*; आचार्यः श्रीनिवासवरखेडी (प्रधानसम्पादकः) ; आचार्यः मधुसूदनपेन्ना (सम्पादकः) ; कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालयः ; न्यू भारतीय बुक कर्पोरेशन ; नवदेहली ; २०२० प्रथमसंस्करणम्
9. *हत्याकारी कः (स्पशकथासङ्ग्रहः)*; नारायणदाशः ; श्रीमती सवितादेवी (प्रकाशिका) ; गञ्जामम् ; २००३

✳ ✳ ✳

# कालिदासस्य कृतौ वैदिकप्रभावः

**दीपङ्कर-दत्तः** *

## Abstract

[विद्-धातोः भावे घञ्-प्रत्यये वेदशब्दः निर्मीयते । वेदशब्दः ज्ञानार्थकः । वेदानां प्रभावः प्रत्यक्षतया परोक्षतया च प्रायः सर्वेषु वैदिकोत्तरसाहित्येषु दृश्यते । महाकवि-कालिदासस्य कृतिषु वेदानां प्रभावः बहुधा अवलोकितः । कदाचित् वेदानां प्रभावः चरित्रचित्रणे, कदाचित् छन्दोविचारे, कदाचित् यज्ञप्रतिपादने, कदाचिद्वा विषयविवेचनायाम् अवलोक्यते । अभिज्ञानशाकुन्तलमिति नाटके वृक्षादीनां मेघदूत-गीतिकाव्ये मेघानां च मनुष्यव्यवहाराणामारोपः वैदिकात्मदर्शनस्य सूचकः । कुमारसम्भवमित्यस्य महाकाव्यस्य पञ्चमे सर्गे पार्वत्याः तपस्याप्रभावात् छद्मवेषधारिमहादेवस्य पार्वत्या सह मेलनं वैदिकादर्शं प्रतिबिम्बयति । अभिज्ञानशाकुन्तलमित्यस्मिन् नाटके महर्षिकण्वस्य नित्यक्रियायाः वैदिकाश्रमव्यवस्थायाः परिचयं सूचयति । रघुवंशमहाकाव्यस्य राजनीतिः वैदिकपितृसत्तात्मकसमाजेन प्रभाविता जाता । कुमारसम्भवे महाकाव्ये पार्वत्या योग्यपतिचयनं वैदिकस्वच्छन्दपतिचयनव्यवस्थायाः सूचकम् । एवं महाकविकालिदासस्य ग्रन्थेषु बहुत्र मङ्गलाचरणे, विषयवर्णने, चरित्रचित्रणे वेदानां प्रभावः प्रत्यक्षतया परोक्षतया वा परिलक्ष्यते । एते एव विषयाः अस्मिन् प्रबन्धे आलोच्यन्ते ।]

**कुञ्चिकाशब्दाः** — महाकविः, कालिदासः, वेदः, महाकाव्यम् ।

## निबन्धस्य प्रयोजनम्

अलङ्कारचित्रणदार्शनिकतत्त्वप्रतिपादनप्रकृतिवर्णनचरित्रचित्रणविविध-धर्मानुष्ठानवर्णन-छन्दःप्रतिपादनादीनां विविधविषयाणाम् उपस्थापनाय महाकविकालिदासः कीदृशस्य वैदिकचिन्तनस्य अवलम्वनं कृतवान् इति चास्यालेखस्य विषयः ।

## भूमिका

वैदिकसाहित्यस्य भाषा-समाज-संस्कृति-छन्द-धार्मिकानुष्ठानादि-विषयान् महाकविकालिदासः स्वस्य ग्रन्थेषु वर्णितवान्, तस्य वर्णना अधः विहिता—

---

* शोधच्छात्रः, नव-नालन्दा-महाविहारस्य संस्कृतविभागे, विहारेषु, Email: dipankarduttahpl@gmail.com

**यज्ञः**

वैदिकसाहित्ये विविधयज्ञानाम् वर्णनमस्ति। वैदिकसाहित्ये अग्निहोत्र-दर्शपूर्णमास-अग्निष्टोम-ज्योतिष्टोम-सोमयागादयः वर्णिताः। महाकविकालिदासस्य साहित्येऽपि तथैव विविधवैदिकयज्ञानामुल्लेखः प्राप्तः। यथा अभिज्ञानशकुन्तलमित्यस्य नाटकस्य प्रथमे अङ्के अग्निहोत्रयज्ञवत् प्रातः सायं च यज्ञस्य वर्णनमस्ति। अपि च अभिज्ञानशकुन्तलम् इति नाटकस्य तृतीये अङ्के महर्षिकण्वस्य शिष्यैः यज्ञवेद्याच्छादनार्थं कुशस्य व्यवहारः परिलक्ष्यते— यावदिमान् वेदिसंस्तरणार्थं दर्भान् ऋत्विग्भ्य उपनयामि[१]। अभिज्ञानशकुन्तलम् इति नाटकस्य चतुर्थे अङ्के महर्षिकाश्यपस्य आशीर्वचनेन यज्ञस्याग्नेरुल्लेखः प्राप्तः, अपि च वैदिकयज्ञाग्निस्थापनार्थं समित्कुशाद्यावश्यकविषयस्योल्लेखः प्राप्तः। अपि च वेदेषूल्लिखितस्य यज्ञीयपशुवधस्य प्रसङ्गोऽभिज्ञानशकुन्तलम् इति नाटकस्य षष्ठे अङ्के धीवरस्य भाषणेन प्रस्तूयते—

सहजं किल यद्विनिन्दितं न खलु तत्कर्म विवर्जनीयम्।
पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः॥

[अभिज्ञानशाकुन्तलम् ६.१]

अर्थात्, 'यां वृत्तिं गृहीत्वा जनाः जायन्ते, सा वृत्तिः निन्दनीया चेदपि न त्यक्तव्या। वेदज्ञब्राह्मणः स्वभावतः दयालुः चेदपि यज्ञपशुवधसमये निर्दयो भवति' इति।

अपि च अग्निहोत्रराजसूययज्ञयोरुल्लेखो विक्रमोर्वशीयनाटकस्य तृतीयभागे प्राप्यते। मालविकाग्निमित्रम् इति नाटके अश्वमेधयज्ञोदकुम्भविधानयो विवरणानि प्राप्यन्ते। रघुवंशमहाकाव्यस्य तृतीयसर्गे अश्वमेधयज्ञस्य चतुर्थसर्गे च विश्वजिद्यागस्य वर्णना परिलक्ष्यते।

**छन्दः**

वेदेषु एकाक्षरादारभ्य चतुरधिकशताक्षरयुक्तेसु छन्दःसु 'प्रथम-सप्तकम्' इति नाम्ना प्रसिद्धसप्तप्रकारच्छन्दःसु महाकवि-कालिदासस्याभिज्ञानशकुन्तलम् इति नाटकस्य चतुर्थे अङ्के महर्षिकाश्यपस्याशीर्वादरूपेण शकुन्तलां प्रति चत्वारचरण-

१ अभिज्ञानशाकुन्तलम्, तृतीयाङ्कः

युक्तैकादशाक्षरस्त्रिष्टुप्छन्दसः प्रयोगः दृश्यते—

अमी वेदितं परितः क्लृप्तधिष्ण्याः
समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धै-
र्वैतानास्त्वां वह्नयः पावयन्तु ॥ [अभिज्ञानशाकुन्तलम् ४.८]

चतुष्टयचरणयुक्तश्लोकोऽयं ४४ अक्षरयुक्तत्रिष्टुप्छन्दोविशिष्टः, प्रत्येकस्मिन् चरणे एकादशाक्षरत्वात् ।

**शब्दप्रयोगः**

छन्दःपूरणार्थं शब्दप्रयोगः महाकविकालिदासस्य कृतिषु बहुस्थानेषु दृश्यते । यथा— कुमारसम्भवमहाकाव्यस्य आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श[२] अपि च जडीकृतस्त्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः[३]— एतयोः श्लोकयोः छन्दःपूरणार्थं 'इयादिपूरणः' इत्यनेन सूत्रानुसारेण पाठपरम्परायां त्र्यम्बकशब्दस्य त्रियम्बकमिति रूपं प्रयुक्तम् इति । रघुवंशमहाकाव्यस्य पञ्चदशसर्गस्य ...प्रीतस्तुराषाडिव शार्ङ्गिणम्[४], त्रयोदशसर्गस्य प्रभ्रंशयां यो नहुषं चकार[५], नवमसर्गस्य ...तं पातयां प्रथममास पपात पश्चात्[६], षोडशसर्गस्य संयोजयां विधिवदास समेतबन्धुः[७], पञ्चदशसर्गस्य पश्चादध्ययनार्थस्य धातोरधिरिवाभवत्[८] इत्यादिषु श्लोकेषु छन्दःपूरणार्थं शब्दप्रयोगः अवलोकितः ।

**वैदिकशैली**

अभिज्ञानशकुन्तलम् इति नाटके नृपस्य दुष्यन्तस्य प्रियंवदां प्रति शकुन्तलायाः विषये ज्ञातुमिच्छा प्रकाशिता—

वैखानसं किमनया व्रतमाप्रदाना-
द्व्यापाररोधि मदनस्य निषेवितव्यम् ।

---

२ कुमारसम्भवम् ३.४४
३ रघुवंशम् २.४२
४ रघुवंशम् १५.४०
५ रघुवंशम् १३.३६
६ रघुवंशम् ९९.६१
७ रघुवंशम् १६.८६
८ रघुवंशम् १५.९

अत्यन्तमेव सदृशेक्षणवल्लभाभि-
राहो निवत्स्यति समं हरिणाङ्गनाभिः ॥

[अभिज्ञानशाकुन्तलम् १.२४]

अर्थात्, उपर्युक्तोद्धरणेन महाकविकालिदासः वेदेषूल्लिखितं स्त्रीणां ब्रह्मचर्यस्या अधिकारं प्रस्तुतवान्। परवर्तिकाले प्रियंवदान्तिकात् महर्षिकण्वस्येच्छां श्रुत्वा राजा दुष्यन्तः आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्[९] इत्युक्तवान्। महाकविकालिदासः अभिज्ञानशकुन्तलम् इति नाटके दुष्यन्तमुखेन स्त्रीणां ब्रह्मचर्याधिकारस्य विषयम् उक्तवान्।

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥

[अभिज्ञानशाकुन्तलम् ४.१८]

महर्षिकाश्यपस्य पतिगृहविषयक-कर्तव्यमूलकनिर्देशः निम्नोक्तां वैदिकविचारधारां सूचयति—

गृहान् गच्छ गृहपत्नी यथासः
सम्राज्ञी श्वशुरे भव, सम्राज्ञी श्वश्र्वां भव।
ननान्दरि सम्राज्ञी भव, सम्राज्ञी अधि देवृषु ॥ इति।

[ऋग्वेदः १०.८५.२५, ४६]

अभिज्ञानशकुन्तलम् इति नाटके दुष्यन्तशकुन्तलयोः विवाहः गान्धर्वमतानुसारं सम्पन्नः आसीत्, अनसूयायाः प्रियंवदे यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्याणा शकुन्तला अनुरूपभर्तृगामिनी संवृता इति निवृतं मे हृदयम्...[१०] इति वचनं तस्य प्रमाणम्। अयं गान्धर्वविवाहः वैदिकविवाहरीतिषु अन्यतमः अस्ति।

चतस्रो जाया उपक्लृप्ता भवन्ति। महिषी, बाबाता परिवृक्ता, पालागली...।[११]— अस्य शतपथब्राह्मणस्य मन्त्रेन राज्ञः चतसृणां भार्याणां परिचयः प्राप्यते। महिषी अर्थात् मुख्यपत्नी, बाबाता अर्थात् द्वितीयपत्नी,

---

९ अभिज्ञानशाकुन्तलम् १.२५
१० अभिज्ञानशाकुन्तलम्, चतुर्थाङ्कः
११ शतपथब्राह्मणम् १३.४.१.८

परिवृक्ता अर्थात् पुत्रहीना परित्याज्या, पालागली अर्थात् चतुर्थपत्नी ।

अभिज्ञानशकुन्तलम् इति नाटके एकाधिकपत्नीर्युक्तराजादुष्यन्तस्य परिचयः लभ्यते, यद् वैदिकबहुपत्नीप्रथायाः सूचकमिति ।

अभिज्ञानशकुन्तलम् इति नाटके दुष्यन्तं प्रति मृगयाविषये शकुन्तलायाः ...वः शस्त्रं न प्रहर्तुमनागसि[१२]— एतद्वक्तव्यं निम्नलिखितम् अथर्ववेदस्य मन्त्रस्य प्रतिरूपम्—

भवाशर्वौ मृडतं माभि यातं भूतपती पशुपती नमो वाम् ।
प्रतिहितामायतां मा वि स्राष्टं मा नो हिंसिष्टं द्विपदो मा चतुष्पदः ॥
[अथर्ववेदः ११.२.१]

उपर्युक्तमन्त्रस्यार्थः परमेश्वरप्रदत्त-गुणयुक्तनराणां विविधप्राणिनाम् उपकारसाधनेन धर्मे प्रवर्तनीयः, अन्यथा परमेश्वरस्य कोपोत्पत्तेः ।

## वैदिकऋषयः

यथा महाकविकालिदासस्य ग्रन्थेषु वैदिकयज्ञवैदिकच्छन्दोविविध-वैदिकशब्दानां प्रयोगेण साकं विविधवैदिकऋषिऋषिकाणां वर्णनापि अस्ति । वैदिककाले ऋषयः नियमितरूपेण ध्यान-तपो-याग-यज्ञान् कृतवन्तः । यथा— विश्वामित्रमुनिः ऋग्वेदस्य तृतीयमण्डलस्य ऋषिः, महर्षिकण्वः अष्टममण्डलस्य ऋषिः, गौतमः प्रथममण्डलस्य ऋषिः इति परिचयः प्राप्यते । परवर्तिकाले विश्वामित्रादिमुनीनां विषये अभिज्ञानशकुन्तलमित्यस्मिन् नाटके वर्णितम् । महर्षिमारीचस्य उल्लेखः अभिज्ञानशकुन्तलम् इति नाटकस्य सप्तमे अध्याये मातलिभाषणेन प्राप्यते ।

आयुष्मन्, एष खलु हेमकूटो नाम किंपुरुषपर्वतस्तपःसंसिद्धिक्षेत्रम् । पश्य—

स्वायंभुवान्मरीचेर्यः प्रबभूव प्रजापतिः ।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति ॥
[अभिज्ञानशाकुन्तलम् ७.९]

अपि च विक्रमोर्वशीयम् इति नाटके भरतमुनि-गालबमुन्योः उल्लेखः प्राप्तः ।

## समाजचित्रं वैदिकसंस्काराश्च

विक्रमोर्वशीये नाटके सूर्यप्रस्थानसंस्कारः, चातकव्रतपालनं,

[१२] अभिज्ञानशाकुन्तलम् १.११

अप्सरसा सूर्यस्योपसना, गुरुजनान् प्रति श्रद्धा इत्यादयः वैदिकसंस्काराः प्रतिफलिता आसन् । अपि च छलिकनृत्य-अध्यात्मविद्या-मङ्गलकार्यसिद्धि-तीर्थयात्रामाहात्म्यादयः सामाजिकसंस्काराः मालविकाग्निमित्रम् इति नाटके प्रतिविम्बिताः सन्ति ।

अभिज्ञानशकुन्तलम् इति नाटके महर्षिकण्वस्य नित्यकर्माणि वैदिकाश्रमव्यवस्थायाः सूचकानि । अपि च ब्राह्मणेभ्यः तपस्विभ्यः च बहुमानं प्रदीयते स्म । बहुपत्नीत्वव्यवस्था अपि परिलक्ष्यते । पुरुषशिक्षा इव स्त्रीशिक्षापि समाजे प्रचलिता आसीत्, या शकुन्तलायाः कथनेन लक्षनीया । अथर्ववेदस्य अस्य मन्त्रस्य अनुसारं ये वाऽस्मिन् शुल्कमीषिरे[१३] ब्राह्मणेभ्यः किमपि प्रकारस्य करस्य ग्रहणं पापम्, एतानि ऐतिह्यानि अभिज्ञानशकुन्तलम् इति नाटके दृश्यते ।

कुमारसम्भवमहाकाव्यस्य पञ्चमस्वर्गे पार्वत्याः पञ्चाग्न्यादितपोव्यवस्था वैदिकतपोव्यवस्थायाः सूचिका इति । युवं रथेन विमदाय शुन्ध्युवं न्यूहथुः पुरुमित्रस्य योषणाम् ।[१४] अनेन मन्त्रेन यथा राज्ञः पुरुमित्रस्य दुहिता शुन्ध्युः स्वयम्वरेण विमद्युनिं पतिरूपेण गृहीतवती, तथैव कुमारसम्भवमहाकाव्ये पार्वत्याः पतिचयनं वैदिकस्वच्छन्दपतिचयनव्यवस्थायाः सूचकम् । रघुवंशे महाकाव्ये

अथेश्वरेण क्रथकैशिकानां स्वयं वरार्थं स्वसुरिन्दुमत्याः ।
आप्तः कुमारानयोत्सुकेन भोजेन दूतो रघवे विसृष्टः ॥

[रघुवंशम् ५.३९]

अस्मिन् श्लोके राजा भोजः स्वभगिन्याः इन्दुमत्याः विवाहाय स्वयम्वरसभाम् आयोजितवान्, इदं वैदिकस्वच्छन्दपतिचयनव्यवस्थायाः सूचकम् ।

## काव्यसौन्दर्यम्

उपमा कालिदासस्य— महाकविकालिदासस्य विषये प्रयुक्तम् एतत् वाक्यं तस्य उपमालङ्कारप्रयोगस्य प्रावीण्यं दर्शयति । एषः उपमालङ्कारो वैदिकसाहित्ये अपि प्रयुक्तः इति अथर्ववेदमन्त्रेण ज्ञायते—

१३ अथर्ववेदः ५.१९.३
१४ ऋग्वेदः १०.३९.७

अग्नेरिवास्य दहतो, दावस्य दहतः पृथक् ।
एतामेतस्येर्ष्याम् उद्नाऽग्निमिव शमय ॥ [अथर्ववेदः ७.४५.२]

अर्थात्, ज्वलन्तम् अरण्याग्निमिव पुरुषस्य ईर्षायुक्तं अग्निं शान्तं कुरु, यथा अग्निः जलेन शान्तः भवति । इव इति सादृश्यवाचकशब्देन अस्मिन् मन्त्रे उपमालङ्कारः प्रवर्तते ।

अपि च उत्प्रेक्षा, अतिशयोक्तिः इत्यादीनां अलङ्काराणां प्रयोगः वैदिकसाहित्ये अपि लक्ष्यते ।

**वैदिकादर्शः**

समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ। सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ।[१५]— अर्थात् 'हे विश्वदेव! अस्माकं हृदयद्वयं पूर्णतया प्रकाशयतु। मातरिश्वा, धाता, देष्ट्री (सरस्वती) च आवयोः द्वयोः (वरवधूयोः) मनः परस्परम् अनुकूलं कुर्वन्तु।'— अस्य ऋग्वेदीयमन्त्रस्य प्रतिरूपम् अभिज्ञानशकुन्तलम् इति नाटकस्य पञ्चमे सर्गे शार्ङ्गरवस्य...समानयंस्तुल्यगुणं वधूवरं...— अर्थात्, 'स्वामि-भार्ये च समगुणसम्पन्ने' इत्यनेन कथनेन स्पष्टीकृतम् ।

उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि ।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं वमूथ ॥
[ऋग्वेदः १०.१८.८]

आलोच्यर्ग्वेदीयमन्त्रेण यथा सहमरणप्रथायाः निवारणं कृतं, तथैव महाकविकालिदास्य कुमारसम्भवे तदिदं परिरक्ष शोभने! भवितव्यप्रियसङ्गमं वपुः । रविपीतजला तपात्यये पुनरोधेन हि युज्यते नदी ॥[१६]— अस्मिन् श्लोके कामदेवस्य भस्मीभवनात् परं तस्य भार्यायाः अग्निप्रवेशे इच्छा, आकाशवाण्या तस्याः सहमरणात् निवृत्तिरिति च घटनाद्वयं वैदिकादर्शानां सूचकम् ।

**दर्शनम्**

ब्रह्मणः जीवानां च एकत्वस्य प्रतिपादनं कुर्वन् विक्रमोर्वशीयम् इति नाटकस्य मङ्गलाचरणश्लोके महाकविकालिदासः 'मुमुक्षु' इति शब्देन

---

[१५] ऋग्वेदः १०.८५.४७
[१६] कुमारसम्भवम् ४.४४

प्राणायामादिसाधनेन आत्मतत्त्वमेव स्थाणुपदेन उल्लिखितवान्, स एव वेदान्तदर्शने 'एकपुरुषः' इति—

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षभिर्नियमितप्राणादिभिर्मृग्यते
स त्थाणुः स्थिरभक्तियोगसुलभः निःश्रेयसायास्तु वः ॥

[विक्रमोर्वशीयम् १.१]

आनन्दो ब्रह्मेति व्यजानात्[१७], विज्ञानमानन्दं ब्रह्म...[१८]— एतयोः मन्त्रयोः उल्लिखितमोक्षस्वरूपस्येव महाकविकालिदासः रघुवंशमिति महाकाव्यस्य अष्टादशसर्गे मोक्षस्य भावात्मकस्थितिं प्रतिपादयन् 'अनन्तसुख' इति परिभाषया परिभाषितवान्— पिता पितॄणामनृणस्तमन्तं वयस्यानन्तानि सुखानि लिप्सुः ।[१९]

**निष्कर्षः**

महाकविकालिदासस्य कृतिविश्लेषणेन ज्ञायते यत् महाकविः बहुस्थानेषु वैदिकचिन्तनेन प्रभावितः आसीत्, येन तस्य काव्यसौन्दर्यं वर्धितम् । वैदिकयज्ञ-संस्कार-काव्यसौन्दर्य-छन्द-ऋषि-विविधवैदिक-शब्दादीनां प्रयोगः तस्य काव्यस्य समृद्धौ । तदतिरिक्तं मोक्षस्वरूपप्रतिपादनेन वेदान्तदर्शनस्य तत्त्वं सुकौशलेन काव्यिकरूपेण प्रतिपादितवान् महाकविः । वेदान्तदर्शनस्य 'एकेश्वरवादः' इत्यस्या अनुभूतेः प्रकाशः अभिज्ञानशकुन्तलम्, मेघदूतम्, विक्रमोर्वशीयम्, रघुवंशम् इत्यादीनां ग्रन्थानां मङ्गलाचरणे दरीदृश्यते । यथा ह्याम्नायते ईशोपनिषदि—

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ [ईशोपनिषद् ६]

महाकविकालिदासस्य अभिज्ञानशकुन्तलम् इति नाटके प्रकृतौ मनुष्यव्यवहाराणामारोपः अपि च मेघदूतम् इति खण्डकाव्ये मेघवत् अचेतनवस्तुनि मनुष्यव्यवहाराणामारोपेण यक्षप्रियायाः समीपे वार्ताप्रेरणम् इति विषयद्वयं वैदिकात्मदर्शनस्य सूचकम् इति । अतः वैदिकसाहित्यस्य

[१७] तैत्तिरीयोपनिषद्, भृगुवल्ल्यां षष्ठोऽनुवाकः
[१८] बृहदारण्यकोपनिषद् ३.१.८
[१९] रघुवंशम् १८.२६

प्रभावः महाकविकालिदासीयसाहित्ये प्रत्यक्षतया परोक्षतया च परिलक्षित आसीत्, एवं प्रकारेण महाकविकालिदासस्य रचना वैदिकभावसौन्दर्येण अनन्यता प्राप्ता इति शम् ।

✶✶✶

## Bibliography


1. *कालिदास समग्र*; ज्योतिभूषण चाकी (सम्पादकः) ; नवपत्र प्रकाशन ; कोलकाता ; २००० ।
2. *महाकवि कालिदासेर समग्र रचनावली*; ध्यानेश नारायण चक्रवर्ती (सम्पादकः) ; बुक हाउस ; कोलकाता ; १९७७ ।
3. *अभिज्ञान-शाकुन्तलम्*; सत्यनारायण चक्रवर्ती (सम्पादकः) ; संस्कृत पुस्तक भंडार ; कोलकाता ; २०१३ ; अष्टमसंस्करण ।
4. *तैत्तिरीयोपनिषद्*; गीताप्रेस ; गोरखपुर ; २००० ; तृतीय संस्करण ।
5. *कालिदास ग्रन्थावली*; ब्रह्मानन्द त्रपाठी (सम्पादकः) ; चौखाम्बा सुरभारती प्रकाशन ; वाराणसी ; २०१५ ।
6. *कालिदासीय रचनावलीते वेदादिशास्त्रेर उत्स समीक्षा*; प्रद्योत् कुमार दत्त ; संस्कृत पुस्तक भंडार ; कोलकाता ; १४१६ ।
7. *कुमारसंभवम्*; बासुदेव लक्ष्मण शास्त्री पणशीकर (सम्पादकः) ; पाण्डुरङ्ग जावजी ; मुंबई ; १९३५ ; द्वादश संस्करण ।
8. *रघुवंश-महाकाव्य*; धारादत्त मिश्र (अनुवादकः) ; मोतीलाल बनारसीदास ; दिल्ली ; १९८७ ; द्वितीय परिवर्धित संस्करण ।
9. *ऋग्वेद संहिता*; प्रो. उमाशङ्कर शर्मा ऋषिः (सम्पादकः) ; चौखम्बा विद्याभवन ; वाराणसी ; १९९४ ; चतुर्थ संस्करण ।
10. *विक्रमोर्वशीयम्*; सुरेन्द्रनाथ शास्त्री (व्याख्याकारः) ; सत्यभामाबाई पाण्डुरङ्ग ; मुंबई ; १९४२ ; प्रथम संस्करण ।


✳ ✳ ✳

# श्रीश्रीरामकृष्णपरमहंसस्य अपाररामभक्तिः

डॉ.विष्णुपदपालः *

## Abstract

[आदिकाव्यं रामायणं भारतीयसभ्यतायाः मूलाधारः। स्वामिविवेकानन्दस्य मतेन— 'भारतस्य सर्वे बालाः रामस्वरूपाः, सर्वाः बालाः सीतास्वरूपाः' इति। रवीन्द्रनाथस्य मतेन— 'अस्माकं परिवारस्य सदस्यापेक्षया रामायणस्य पात्रादिषु अधिको विश्वासो राजते' इति। पश्चिमवङ्गेषु तथा समग्रभारतेषु श्रीश्रीरामकृष्णस्य स्वामिविवेकानन्दस्य मातुः सारदादेव्याश्च भावधारा प्रसरति। कोटिशः भक्ताः रामकृष्णपरम्पराम् अनुसृत्य धन्याः अभवन्। रामस्य कृष्णस्य च संमिश्रणम् एव कलियुगस्य परमहंसदेवः श्रीश्रीरामकृष्णः। तस्यापि पवित्रजीवने रामायणस्य बहुधा प्रभावो वरीवर्तते। रामकृष्णदेवः भक्तेभ्यः उपदेशवेलायां रामस्य, लक्ष्मणस्य, सीतायाः, जनकस्य, हनुमतश्च कथां पुनःपुनः श्रावयति स्म। आबाल्यादेव रामकृष्णः गृहदेवतायाः रघुवीरस्य एकनिष्ठः परमभक्त आसीत्। पुनश्च दक्षिणेश्वरे राम राम इति उच्चैःस्वरेण नादं करोति स्म। रामललाख्येन देवेन सह भ्रमणं, हसनं, भोजनं, रोदनं च अकरोत्। रामनाम श्रुत्वैव मूर्च्छतां प्राप्नोति स्म। पुरुषोत्तमस्य रामचन्द्रस्य दिव्यदर्शनलाभाय स्वात्मनि हनुमतः भावं समारोप्य रामचन्द्रं सिषेव। एतेन प्रतिभाति यत् श्रीश्रीरामकृष्णस्य रामे अपारभक्तिः आसीत्।]

**कुञ्चिकाशब्दाः** — रामायणम्, रामकृष्णः, श्रीश्रीरामकृष्णकथामृतम्, स्वामिविवेकानन्दः, अध्यात्मरामायणम्, सारदादेवी, रामलाला, श्रीश्रीरामकृष्णलीलाप्रसङ्गम्, रघुवीरः, वाल्मीकिः, कालीमाता, दक्षिणेश्वरम्, भवतारिणी।

## भूमिका

भारतीयसंस्कृतेः सभ्यतायाश्च प्रतिमूर्त्तिः आदिकाव्यं रामायणम्। महामुनिः वाल्मीकिः क्रौञ्चवियोगाद् लब्धशोकः श्लोकात्मना रामचरितं लिलेख। यथा लोके गङ्गासमं नास्ति तीर्थं, मातृसमो नास्ति गुरुः, विष्णुसमो नास्ति देवः तथैव न हि लोके रामायणसमं श्रेष्ठं किमपि महाकाव्यम्। तथा च पुराणम्— 'नास्ति रामायणात् परम्' इति। यावत् परिवर्तनधर्मशालिनि प्रपञ्चात्मकेऽस्मिन् हिमालयसलिलमरुतः स्थास्यन्ति, तावत् लोके रामायणं

* सहायकाध्यापकः, संस्कृतपालिप्राकृतविभागः, विश्वभारती, शान्तिनिकेतनम्, पश्चिमवङ्गाः, ७३१२३५।

मुहुर्मुहुः प्रचरिष्यति । रामायणस्य प्रशंसामूलिका स्तुतिः श्रूयते—

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद् रामायणीकथा लोकेषु प्रचरिष्यति ॥

अचिरेणैव रामायणकथा लोकप्रियतायाम् अद्वितीया सती समग्रभूमण्डलस्य नाना काव्यकलायाः उपजीव्यग्रन्थरूपेणापि प्रसिद्धा जाता। वाल्मीकिपरवर्त्तिनः व्यासप्रभृतिमहाकवयः रामकथां समादृत्य अध्यात्मरामायणादिकं ससर्जुः। ततश्च भासकालिदासप्रभृतयोऽपि रामायणीकथां समाधारीकृत्य बालरामायणरघुवंशादिकं विरच्य संस्कृतसाहित्ये विशिष्टं स्थानम् अवापुः। ततश्च कालान्तरे वङ्गसाहित्ये, ओडियासाहित्ये हिन्दीसाहित्ये तथा च वैदेशिकसाहित्ये अपि रामायणम् आदर्शपुरुषं रघुपतिं च मनसि निधाय काव्यग्रन्थादिकं निर्ममुः। जगत्संसारेऽस्मिन् आदर्शभ्राता, आदर्शपुत्रः, आदर्शपतिः, आदर्शनराधिपतिः, आदर्शपिता, आदर्शमानवः श्रीमान् रघुपतिः सकलमानवानाम् अत्यन्तं श्रद्धाविषयः, स्नेहभाक्, भक्तिविषयः, श्लाघार्हश्च। तादृशानां महामानवानां प्रभावः न केवलं साधारणमानवेषु अपि तु रामकृष्णप्रभृतिषु सिद्धपुरुषादिष्वपि रराजते। केचन सिद्धपुरुषाः अपि रघुपतिजीवनमार्गं पाथेयं कृत्वा स्वस्वसाधनजीवनम् अतिवाहितवन्तः। युगावतारः श्रीरामकृष्णपरमहंसदेवः धर्मसंरक्षणाय धर्माधर्मविवेकज्ञानबोधनाय भक्तसमूहान् समुद्दिश्य रामायणादिकथाच्छलेन आध्यात्मिकतत्त्वम् उपदिशति स्म। ठाकुरस्य अभिहितगल्पमालिका श्रीश्रीरामकृष्णकथामृते श्रीश्रीरामकृष्णलीलाप्रसङ्गे रामकृष्णकथासम्बन्धिग्रन्थे च निबद्धा। एवञ्च दक्षिणेश्वरे सायंकाले प्रत्यहम् अध्यात्मरामायणस्य पाठो व्याख्यानं च जायते स्म। रामकृष्णपरमहंसदेवः रामायणपाठश्रवणवेलायां परमपुरुषस्य क्लेशमयजीवनकथां श्रुत्वा सजलनेत्रेण राम राम इति उच्चैः आर्तनादं कुर्वन् मूर्छां गच्छति स्म। रामकृष्णदेवः भक्तान् उद्दिश्य धर्मोपदेशवेलायां कथारूपेण रामसीताहनुमत्प्रभृतीनां आदर्शं चरितं वर्णयामास। अर्थात् श्रीश्रीरामकृष्णपरमहंसस्य आध्यात्मिकजीवने पुरुषोत्तमरामचन्द्रस्य अनन्या भूमिका आसीत्। पुनश्च रामे अकुण्ठितश्रद्धा, अकृत्रिमश्रद्धा, अपारभक्तिश्चासीत्। पत्रेऽस्मिन् श्रीश्रीरामकृष्णस्य रामविषयकभक्तेः चर्चा यथामति सविस्तरं करिष्यते।

क्षुदिरामः भूस्वामिनः अत्याचारेण पीडितः निःस्वः सन् कुलदेवस्य रघुवीरस्य भव्यमूर्तिं समाहृत्य कामारपुकुरग्रामं समागमत्। स च गयातीर्थभ्रमणसमये स्वप्नम् अद्राक्षीत्— स्वयम् एव गदाधरः पुत्रत्वेन तस्य गेहे आविर्भवितुं वाञ्छति।[१] ततःपरं क्षुदिरामस्य पुत्रसन्तानः अभवत्। स्वप्ने गदाधरस्य दर्शनात् जातस्य पुत्रस्य नाम गदाधरः। अर्थात् रामकृष्णः भगवतः विष्णोः अवतारः अंशविशेषो वा इति रामकृष्णपरम्परायां स्वीक्रियते। एवञ्च अध्यात्मरामायणे अपि अवर्णयत— सशङ्खचक्रः विष्णुः अत्याचारिणं रावणं नाशयितुं स्वात्मानं चतुर्धा विभज्य रामलक्षणभरतात्मना मर्त्यलोके मानवरूपेण अवततार। पुरुषोत्तमः रामः भगवतः विष्णोः अंशविशेषः। अध्यात्मरामायणे प्रसिद्धः श्लोकः—

तस्याहं पुत्रतामेत्य कौसल्यायां शुभे दिने।
चतुर्धात्मानमेवाहं सृजामीतरयोः पृथक्॥

[अध्यात्मरामायणम् (बालकाण्डम्-२/२७)]

एतेन समायातं यत् भगवान् रामचन्द्रः रामकृष्णश्च भगवतः विष्णोः अंशविशेषः। अर्थात् रामचन्द्ररामकृष्णयोः उभयोः एकात्मता अभेदता च प्रतिफलिता।

द्विजपुत्रः श्रीरामकृष्णः आ बाल्याद् एव रघुवीरस्य भव्यविग्रहं सानन्दं सश्रद्धं पूजयामास। पुनश्च ठाकुरः दक्षिणेश्वरे जगज्जननीकालीमातुः मुख्यार्चकत्वेन नियोगकालेऽपि प्रत्यहं रघुवीरं सश्रद्धं सिषेव। पुनश्च श्रीरामचन्द्रस्य दिव्यदर्शनलाभाय स्वात्मनि हनुमत्त्वभावम् आरोप्य दास्यभक्त्या रघुवीरम् अभजत। पुनश्च रामविषयकध्यानेन निमग्नः सन् स्वात्मानं जहौ। एवञ्च तस्मिन् समये श्रीरामकृष्णः आहारविहारं त्यक्त्वा हनुमदात्मना सकलकर्म अकुरुत। पुनश्च वस्त्रं पुच्छवत् धृत्वा इतस्ततः लम्फनम् अकुरुत। पुनश्च केवलं फलमेव अखादत्। विश्रामकाले वृक्षम् आरुह्य तत्र एव तस्थे। एवञ्च सजलनेत्रेण सदैव रघुवीर, रघुवीर इति उच्चैः नादम् अकुरुत। एवञ्च मेरुदण्डस्य प्रान्तभागः किञ्चित् वर्धितः आसीत् इत्यपि श्रूयते स्म।[२] एतेन प्रमाणितं भवति यत्— रामं प्रति निगूढप्रेम,

[१] तोमार भक्तिते परम प्रसन्न हइयाछि, पुत्ररूपे तोमार गृहे अवतीर्ण हइया आमि तोमार सेवाग्रहणं करिव। (श्रीरामकृष्णजीवनी-पृष्ठासंख्या-१०)

[२] ऐ समये आहारविहारादि सकल कार्य हनुमानेर न्याय करिते हइत-इच्छा करिया ताहा

अकृत्रिमा भक्तिः आसीत् रामकृष्णस्य। तदर्थमेव पुरुषोत्तमरामस्य अनन्यभक्तरूपेण हनुमदात्मना रघुवीरम् अभजत। अर्थात् सिद्धपुरुषस्य रामकृष्णस्य अत्यन्तं परमादरणीयः प्रियपात्रो रामचन्द्रः इति निश्चयः।

१८६४ खीष्टाब्दे जटाधारी इति नाम्ना कश्चन परमो रामभक्तः श्रीरामचन्द्रस्य अष्टधातुनिर्मितं रामविग्रहं दक्षिणेश्वरम् समानयत्। रामकृष्णदेवः तां राममूर्तिं रामलाला इति सम्बोध्य परमनिष्ठया सभक्ति असेवत। अल्पेषु दिवसेषु रामलालाख्येन भगवता सार्धं श्रीश्रीरामकृष्णदेवस्य दैवी मित्रता समुत्पन्ना। तस्मादेव परमरामभक्तो जटाधारी रामलालाख्यं भगवन्तं दक्षिणेश्वरे परमहंसदेवस्य सकाशे स्थापित्वैव जगाम। ठाकुरः अकथयत्— रामलालाख्यो भगवान् स्वस्य पूजार्यपेक्षया रामकृष्णम् अधिकं प्रीणाति स्म। सर्वदा एव ठाकुरेण सह गमनं, भ्रमणं, हसनम् अकुरुत। पुनश्च ठाकुरः स्वस्य क्रोडे संस्थाप्य परमप्रीत्या भोजनं खादयति स्म। तदा स भगवान् झटित्येव क्रोडात् बहिः समागत्य गङ्गायां जलकेलिं करोति स्म। कदाचित् कण्टकमये अरण्ये पुष्पाणि अवचिनोति स्म। क्वचित् प्रचण्डदावदाहे आतपे धावति स्म। अर्थात् स रामलालाख्यो भगवान् बाललीलाजनितकर्म अकुरुत। ननु शीघ्रम् अस्वस्थः स्यादिति भीत्या ठाकुरः तं भगवन्तं तर्जयति स्म। कदाचित् तर्जनात् परं स्वयमेव दुःखं प्राप्य परमस्नेहेन भक्त्या च क्रोडे संस्थाप्य प्रीणाति स्म। इयञ्च रामललाख्येन भगवता सह श्रीरामकृष्णस्य अकृत्रिमा बाललीला परमभक्तिः अपारभक्तिश्च। अर्थात् प्रत्यक्षेण समुपस्थितस्य पुरुषस्य यथा साक्षादेव प्रत्यक्षीकरणं जायते तथैव अपरसामर्थ्ययुक्तेन ईश्वरेण सार्धं तथैव प्रत्यक्षीकरणं जातम्।

पुनश्च रामकृष्णः प्रोवाच— रामलालाख्यस्य भगवतः धूर्तता प्रतिदिनम् अवर्धत। तदर्थमेव सलिलातपेभ्यः सदैव वारयति स्म। किन्तु स भगवान् ठाकुरमेव उपहास्य अधिकां धूर्ततां विदधाति स्म। एवमेव कदाचित् ठाकुरः अतीव क्रुद्धः सन् भगवन्तं सलिले क्षणकालपर्यन्तं निमज्जितवान्। ततश्च तस्य कष्टं वीक्ष्य स्वयमेव अधिकं कष्टम् अवाप। अर्थात् श्रीठाकुरो

---

नहे, आपना आपनि हइया पड़ित!परिवार कापडखानाके लेजेर मतो करिया कोमरे जडाइया वाँधिताम, उल्लम्भने चलिताम, फलमूलादि भिन्न अपर किछुइ खाइताम ना-ताहाओ आवार खोसा फेलिया खाइते प्रवृत्ति हइत ना, वृक्षेर उपरइ अनेक समय अतिवाहित करिताम एवं निरन्तरं 'रघुवीर रघुवीर' वलिया गम्भीरस्वरे चीत्कार करिताम।(श्रीश्रीरामकृष्णलीलाप्रसङ्ग प्रथमभाग, साधकभाव, १३८६, पृः १४२-४३)।

रामलालाख्यस्य भगवतः अभिभावकत्वेन सर्वं द्वायित्वं पालयति स्म । अर्थात् यथा अस्मदीये गेहे वयोज्येष्ठाः सकलापद्भ्यः अस्मान् कनिष्ठान् सदस्यान् पुनः पुनः वारयन्ति, तथैव रामलालाख्यस्य भगवतः अभिभावकत्वेन उपस्थितः श्रीठाकुरः सर्वविपद्भ्यः प्रेम्णा वारयति स्म । एतेन उभयोः पितापुत्रवत् सम्बन्धः द्योत्यते ।

अपरा घटना— ठाकुरः भगवते रामलालाख्याय भोक्तुं चिपिटकं प्रददौ । तस्य चिपिटकस्य भक्षणकाले भगवतः मुखे व्रणः समुत्पन्नः । एतत् दृश्यं प्रेक्ष्य ठाकुरः भगवन्तं क्रोडे उपावेश्य स्वयमेव बहु रोदनम् अकुरुत । पुनश्च बहुवारम् अकथयत्— माता कौशल्या बहु सुस्वादु क्षीरपायसप्रभृतिकं प्रयच्छति स्म, अहं तु दरिद्रो ब्राह्मणः भवते किं वा दातुं समर्थः । इयं घटना श्रीश्रीरामकृष्णलीलाप्रसङ्गे वर्णितम् ।[३] अर्थात् श्रीरामकृष्णः पुत्ररूपेण अष्टधातुनिर्मितं रघुवीरविग्रहम् असेवत । अर्थात् उक्तप्रसङ्गेन श्रीरामकृष्णस्य श्रीरामचन्द्रे पुत्रवात्सल्यम् अनुमीयते ।

रघुपतेः एकनिष्ठः परमः साधकः । पवित्रगङ्गामातुः चरणकमले दक्षिणेश्वरे सायंकाले रामायणश्रवणवेलायां राम राम इति उच्चैः नादं कुर्वन् मूर्छां गच्छति स्म । पुनश्च दक्षिणेश्वरे समागतान् भक्तसमूहान् रामविषये नाना कथाः प्रोवाच । परमहंसदेवः रामकृष्णः रामनाममन्त्रेण स्वशिष्याय नरेन्द्रनाथाय दीक्षाम् अयच्छत् । तस्मै च प्रोवाच— मन्त्रोऽयं गुरोः सकाशात् प्राप्त आसीत् । ततश्च नरेन्द्रनाथोऽपि सायंकाले प्रतिदिनं राम राम इति उच्चैः रवं कुर्वन् उन्मत्तवत् भ्रमति स्म ।[४] एतेन भारतीयसंस्कृतेः धारके वाहके पात्रविशेषे रामे श्रीठाकुरस्य अपारभक्तिः परमा श्रद्धा च पुनःपुनः द्योत्यते ।

पारमर्थिकसिद्धताप्राप्तौ स्वसाध्याभीष्टवस्तुनि आत्यन्तिको विश्वासो नितराम् आवश्यकः । राद्धान्तोऽयं मोक्षप्राप्तिपरकवेदान्तादिशास्त्रे स्फुटः । तेन गुरुनिष्ठविश्वासेनैव अल्पशक्तिमान् पुरुषोऽपि स्वसामर्थ्यातिरिक्तं कर्म अनायासेन कर्तुं प्रभवति । एतत्प्रसङ्गे ठाकुरेण समुद्धृता कथा— स्वयमेव

---

३ से वावाजि ए ठाकुरटिर चिरकाल...चक्षे जल आसिल । (श्रीश्रीरामकृष्णलीलाप्रसङ्ग, द्वितीय भाग, गुरुभाव १३८६, पृः १३५) ।

४ श्रीरामकृष्ण नरेन्द्रनाथके राममन्त्रे दीक्षित करिया वलेन :एइ मन्त्रटि आमि आमार गुरुर काछे पेयेछिलाम । कथाटि शुनिवामात्र नरेन्द्रेर मने एक तीव्र अध्यात्म प्रेरणा जाग्रत हइल एवं तिनि सन्ध्या हइते राम राम वलिते वलिते उन्मादप्राय वाटीर चारिपार्श्वे घुरिते लागिलेन । (युगनायक विवेकानन्द, १म भाग, पृः-१३५)

अवतारपुरुषः सर्वशक्तिमान् श्रीरामचन्द्रः लङ्कां गन्तुं सेतुं प्रयुक्तवान् । किन्तु रामभक्तो हनुमान् रामनाम्नि विश्वासं संस्थाप्य लम्फनेनैव समुद्रम् अवततार । अर्थाद् हनुमतः प्रभुनिष्ठविश्वास एव समुद्रलङ्घनरूपदुःसाध्यस्य कर्मणः साधकः । इदञ्च श्रीश्रीरामकृष्णकथामृते स्पष्टीकृतम् ।[५] वङ्गभाषयापि श्रूयते काचित् आभाणकम्— 'विश्वासे मिलाय वस्तु तर्के बहु दूर' इति । एवमेव श्रीरामकृष्णस्य अपि जगज्जनन्याः कालीमातुः उपरि आत्यन्तिको विश्वास आसीत् । पुनश्च नानाविधसाधनासु तत्तद्ध्येयवस्तुनि श्रीरामकृष्णस्य अपि आत्यन्तिको विश्वास आसीत् । एवञ्च एतादृशो विश्वासः स्वाराध्ये भगवति संस्थापनीय इति भक्ताय निवेदयामास ।

श्रीश्रीठाकुरः रामनाम्नः माहात्म्यं कीर्तयन् अन्यां घटनां[६] स्वभक्तेभ्यः प्रोवाच । कश्चित् जनः समुद्रं तीर्त्वा कुत्रचित् गन्तुमिष्टः । तदा विभीषणः एकं पुटीकृतं पत्रं दत्त्वा ऊचे— इदं स्वीकृत्य गच्छ, नितरां समुद्रपारो भविता । स च किञ्चित् अध्वानम् अतिक्राम्य सन्दिहानः सन् पुटीकृतं पत्रं समुद्घाट्य अपश्यत् यत्— केवलं रामनाम एव लिखितम् । रामनाम्ना एव एतद्भवति वेति अविश्वासे सति तस्य पातो जातः । अर्थात् स्वाभीष्टदेवे विश्वास एव परमपुरुषार्थप्रापकः । सन्देहयुक्तं मन एव भगवत्प्राप्तिमार्गे बाधां जनयति । तस्मादेव शास्त्रोक्तमार्गेण स्वाभीष्टलक्ष्ये विश्वासं श्रद्धां च समर्प्य आजीवनं साधनं करणीयम् ।

भगवान् श्रीरामकृष्णदेवः श्रीरामचन्द्रस्य दर्शनलाभाय रामभक्तेन हनुमदात्मना स्वात्मानं सज्जीकृतवान् । यतो हि महावीरः हनुमान् एव सर्वतोभावेन रामम् अजानीत प्रापत् च । हनुमतः अपाररामभक्तिकथनसमये भित्तिकास्थं हनुमच्चित्रं परिप्रेक्ष्य राम राम इति उच्चैःस्वरैः आह्वयन् मूर्च्छां प्राप्तः । श्रीरामं प्रति श्रीरामकृष्णस्य अपारभक्तिः कथामृते पौनःपुन्येन निबद्धा ।[७]

कुतो वयम् ईश्वरं द्रष्टुं न समर्थाः इति प्रश्नः । जीवस्य अहंकार एव माया, सा एव सर्वम् आच्छाद्य तिष्ठति । यथा मेघः विशालाकारं

५ हनुमान रामनामे विश्वास करे लाफ दिये समुद्रेर पारे गिये पड़ल । तार सेतुर दरकार हय नाइ । (श्रीश्रीरामकृष्णकथामृतम्-२६)

६ विश्वास आर भक्ति चाइ...अमनि डुवे याओया । (श्रीश्रीरामकृष्णकथामृतम्-५४)

७ श्रीश्रीरामकृष्णकथामृतम्-३० ।

सूर्यम् आवृत्य तिष्ठति । मेघस्य अपसारणे सूर्यदर्शनं सम्भवति । अत्रापि गुरुकृपया अहंकारस्य नाशे ईश्वरदर्शनं नितरां भवति । एतत्प्रसङ्गे ठाकुरः स्वस्य परमश्रद्धापात्रं रामचन्द्रं सातीमातरं लक्षणञ्च उदाहरति स्म । ठाकुरः कथयति स्म— अनतिदूरे श्रीरामचन्द्रः साक्षादेव ईश्वरः वर्तते । मध्ये सीतारूपिणी माया व्यवधानरूपेण तिष्ठति । तस्मादेव लक्षणरूपस्य जीवस्य ईश्वरदर्शनं न भवति । इदञ्च श्रीश्रीरामकृष्णकथामृते स्पष्टीकृतम् ।[८] अर्थात् श्रीश्रीपरमहंसदेवस्य आध्यात्मिकजीवने रामायणस्य तत्पात्राणां विशेषस्थानम् आसीत् । तद्धेतोः भक्तानां कृते सरलतया भक्तिमार्गस्य बोधनाय रामकथामेव पुनः पुनः समाश्रयति स्म । प्रकारान्तरेण राम एव सर्वशक्तिमान् जगदुद्धारकः इत्यनुमीयते स्म ठाकुरेण ।

कालीसाधकः श्रीठाकुरः क्षणे क्षणे श्रीरामचन्द्रम् अन्वभूत् । तदर्थमेव भक्तान् निर्दिश्य उपदिदेश— रामनाम्नः जपेन मुक्तिः भविता । रघुपतेः श्रीरामचन्द्रस्य माहात्म्यं कीर्तयन् ठाकुरः प्रोचे— स दशरथस्य पुत्रः, स एव समग्रं जगत् ससर्ज, स एव सर्वभूते विराजमानः, अत्यन्तं निकटे, अन्तः बहिश्च ।[९] सर्वं प्रपञ्चात्मकं जगत् राममयम् इति समाद्रियते ठाकुरेण । अर्थात् श्रीरामनाम्नः संकीर्तनं सदैव रामकृष्णस्य जीवने आसीत् ।

श्रीश्रीरामकृष्णदेवः अद्वैततत्त्वस्य प्रबोधनाय रामहनुमतोः वार्तालापम् उदाहरति स्म । क्वचित् हनुमान् रामं प्रोवाच— हे राम कदाचित् त्वं पूर्णः, अहम् अंशः, त्वं प्रभुः, अहं दासः इति भेदज्ञानं समुदेति । परन्तु आत्मतत्त्वज्ञानात् साक्षात् परमेव अनुभवामि— त्वमेव अहम्, अहमेव त्वम् इति अभेदज्ञानम् । एवमेव श्रीमद्भिः ठाकुरैः उपनिषदादिग्रन्थगतनिगूढाद्वैततत्त्वं सरसतया कथाच्छलेन कथामृते निगदितम् ।[१०] नैकेषु सत्सु दृष्टान्तेषु अभेदतत्त्वस्य प्रतिपादनाय रामायणे विद्यमानं रामहनुमतोः वार्तालापं स्वीकृतवान् भगवान् रामकृष्णः । एतेन

[८] आडाइ हात दूरे श्रीरामचन्द्र, यिनि साक्षात् ईश्वर, मध्ये सीतारूपिणी माया व्यवधान आछे वले लक्षणरूप जीव सेइ ईश्वरके देखते पान नाइ । (श्रीश्रीरामकृष्णकथामृतम्-१२०)

[९] रामनाम करा वेश । ये राम दशरथेर छेले, आवार जगद् सृष्टि करेछेन, आर सर्वभूते आछेन । आर अति निकटे आछेन । अन्ते बाहिरे । (श्रीश्रीरामकृष्णकथामृतम्-१२०)

[१०] राम, कखन भावि तुमि पूर्ण, आमि अंश, तुमि प्रभु, त्वं दास, आर यखन तत्त्वज्ञान हय, तखन देखि तुमिइ आमि, आमिइ तुमि । (श्रीश्रीरामकृष्णकथामृतम्-३६४)

स्पष्टं प्रतिभाति यत् रामकृष्णस्य अध्यात्मजीवने रामस्य महद् योगदानम् आसीत् ।

अपरञ्च मनोवासनायां सत्यामेव जीवस्य शरीरधारणम् । अर्थात् कस्यचित् लक्ष्यस्य सिद्धौ दृढा मानसिकी इच्छा नितराम् आवश्यकी । एतत्प्रसङ्गे श्रीश्रीठाकुरः रामायणकथां श्रावयामास । महापराक्रमशालिनः लङ्काधिपतेः रावणस्य वधात् परमेव निकषा झटिति एव अपगच्छति स्म । श्रीरामचन्द्रः निकषायै शीघ्रगमनस्य हेतुं प्रपच्छ । तदा उत्तरति— जीवद्दशायां रामस्य अपूर्वलीलां दृष्टवान्, इतोपि जीवनं यदि स्यात् तर्हि बहुविधां लीलां आगामिनि काले द्रष्टुं शक्ष्यामि । अर्थात् श्रीरामचन्द्रलीलामाहात्म्यमेव इतोऽपि अग्रे जीवयति निकषाम् । अर्थात् रामचन्द्रः साक्षादेव सर्वसामर्थ्यशाली परमेश्वरः, तस्य किमपि कार्यं लीलासदृशमेव । एवञ्च निकषादिभक्ताः एकाग्रमनसा परमपुरुषार्थस्य लीलां परिप्रेक्ष्य स्वात्मानं धन्यं मन्यन्ते स्म । अर्थात् रावणसम्बन्धिनः आत्मीयाः अपि रामभक्ता आसन् । इदम् एव रामस्य माहात्म्यम् ।

आत्मतत्त्वविज्ञाने गृहत्याग उचितो वेति जिज्ञासायां श्रीरामकृष्णठाकुरः अध्यात्मरामायणकथां शिष्येभ्यः श्रावयामास । आत्मतत्त्वविवेकज्ञाने सति भवाब्धेः त्यागं कर्तुं वाञ्छति स्वयं रघुपतिः । घटनाम् इमाम् आकर्ण्य दशरथो कुलगुरुं वसिष्ठं प्रार्थयामास । स महाज्ञानी वसिष्ठः रामं पप्रच्छ— संसारोऽयम् ईश्वरहीनो वा । निषेधात्मके उत्तरे सति त्वं संसारवियोगं कर्तुं पारयसि । जिज्ञासायाः अस्त्यात्मकोत्तरस्य सत्त्वात् श्रीरामचन्द्रो मौनः चासीत् । जगदिदं नेश्वरहीनम् ।[११] अर्थात् गृहे स्थित्वा अपि ईश्वरलाभो भविता इति आशयः । अत्रापि श्रीरामकृष्णः स्वशिष्याणां प्रवचनवेलायां रामजीवनं रामायणं च समुद्धृतवान् । एतेन रामकृष्णस्य जीवने रामं प्रति अपारा भक्तिः एव द्योत्यते ।

श्रीमान् रामकृष्णदेवः भगवतः भक्तिप्रसङ्गे अध्यात्मरामायणात् समुद्धृतं रामनारदसंवादं प्रोवाच । कदाचित् रामः प्रसन्नः सन् नारदम् अकथयत्— त्वं कमपि वरं प्रार्थय । नारदः वरं प्रार्थयामास— तव पादपद्मे शुद्धभक्तिः अहर्निशि भवतु इति । रामगतशुद्धभक्त्या एव सकलं कार्यम् अनायासेन सेत्स्यति । ईश्वरः क्व राजते इति प्रश्ने रामः अकथयत्— यत्र भक्तिः तत्रैव

[११] विज्ञान हले संसारेओ थाका याय ।...ताइ तार संसार त्याग करा आर हल ना । (श्रीश्रीरामकृष्णकथामृतम्-४१६)

ईश्वरो राराजते । भक्त्यैव भगवत्पूजनं, नृत्यं, रोदनं, हसनं भवति । एतादृशी अवस्था चैतन्यमहाप्रभौ दरीदृश्यते । वृत्तान्तोऽयं परमहंसदेवेन भक्तपुरस्तात् उपस्थापितः ।[१२] अर्थात् रामकृष्णस्य एतादृशी भक्तिः रामकथाश्रिता । शुद्धचित्तवतः सिद्धपुरुषस्य रामकृष्णस्य प्रायः किमपि चित्रं, वस्तु, विग्रहं वा वीक्ष्य रोदनं, हसनं, नृत्यं, मूर्च्छनं च भवति स्म । इयमेव परमा भक्तिः प्रोच्यते । तच्च रामादिपात्रश्रवणमननेन श्रीरामकृष्णस्य चित्तं निर्मलं संजातम् ।

भगवतः सन्निधिप्राप्त्यर्थं तैलधारावद् अविच्छिन्नतया इष्टदेवतास्मरणं विधेयम् । एतत्प्रसङ्गे श्रीरामकृष्णेन रामसम्बधिकथा निगदिता ।[१३] रामलक्ष्मणौ पम्पासरोवरं गत्वा एकं पिपासार्तं काकं ददृशतुः । पिपासार्ते सत्यपि जलपानं कर्तुं गच्छन्नपि जलपानं न करोति । को हेतुः इति प्रश्ने रामः उत्तरति— कुर्वतः रामनामजपस्य विच्छेदः स्यादिति धिया जलं न पिबति । अर्थात् स्वाभीष्टदेवतादर्शनाय निरन्तरं तस्य रामसंकीर्तनम् इष्टस्मरणं नितराम् आवश्यकम् । श्रीरामकृष्णोऽपि स्वेष्टदेवतायाः दर्शनाय सिद्ध्यर्थं वा अविच्छिन्नतया अहर्निशम् इष्टदेवतास्मरणं, इष्टदेवतागुणसंकीर्तनं च चकार । तदर्थमेव श्रीरामकृष्णः विविधधर्मान् तत्तच्छास्त्रोपदिष्टमार्गदिशा असेवत । ततश्च रामकृष्णस्य सिद्धिलाभोऽपि जातः । 'यत मत तत पथ' इति सिद्धान्तेन स्वसाधनां चकार । पुनश्च श्रीमतः ठाकुरस्य स्वाध्यात्मिकजीवने प्रियः आदर्शपुरुषः रघुपतिः च आसीदिति न संशयः ।

परमहंसदेवः ज्ञानाज्ञानविवेकबोधनाय भक्तेभ्यः मनोरमाम् एकां कथां प्रोवाच । लक्ष्मणः पुत्रशोकेन दुःखिनं वसिष्ठं प्रेक्ष्य रामं पप्रच्छ । कथं ज्ञानिनः गुरोः दुःखम् । तदा रामः उत्तरति स्म— स्वभाविकी इयं घटना । यत्र ज्ञानं तत्रैव अज्ञानम् । यथा— कदाचित् पादे कण्टकः प्रविष्टः चेत् अपरेण कण्टकेन पादगतकण्टकः निष्कासयितव्यः । ततः परं कण्टकद्वयम् एव त्यक्तव्यम् । एवमेव ज्ञानरूपकण्टकेन अज्ञानरूपकण्टकम् आदौ अपसारणीयम् । अर्थात् यथार्थतत्त्वज्ञाने जाते शास्त्रगतज्ञानम् अपि

---

[१२] श्रीरामकृष्ण-नारदके राम वललेन...चैतन्यदेवेर ओइरूप हयेछिल । (श्रीश्रीरामकृष्णकथामृतम्-६४६) ।

[१३] राम लक्ष्ण पम्पा सरोवरे गियाछेन...पाछे रामनाम जप फाँक याय़ । (श्रीश्रीरामकृष्णकथामृतम्-७००) ।

उपकाराय न जायते । तदेवोच्यते— वेदाः अवेदाः भवन्ति इति श्रुतिवाक्यम् । अर्थात् वेदान्तगतगूढतत्त्वम् अत्यन्तं सरलरीत्या सरसतया भक्तेभ्यः बोधनाय रामाश्रितकथाम् एव स्वीचकार । अर्थात् रामायणं परमश्रद्धायाः विषयः आसीत् ठाकुरस्य ।[१४] तदर्थमेव सत्स्वपि नैकेषु दृष्टान्तग्रन्थेषु रामायणाश्रितं दृष्टान्तं स्वीकृत्य उपदिशति स्म ।

